ॐ

69/1

श्रीमद्भागवतपुराणम्
११ स्कन्धः
भावार्थदीपिका-
श्रीधरीकृतटीकासहितम्

69/1

563

अथ

भावार्थदीपिका

श्रीधरीटीका सहित:

॥एकादशस्कंध प्रारंभः॥

॥ ॥श्रीगणेशायनमः ॥ ॥ॐ नमोभगवतेवासुदेवाय ॥ॐ नमःपरमहंसास्वादितचरणकमलचिन्मकरंदायभ
क्तजनमानसनिवासायश्रीरामचंद्राय १ विजयंतेपरानंदकृष्णपादरजस्रजः ।याधृतामूर्ध्निजायंते महेशब्रह्महृस्र
जः॥ २॥ उक्तैकत्रिंशताध्यायैर्मुक्तिरेकादशेततः ।जायंतेयत्रिहासाधैः समासव्यासरूपतः ३ नारदोवसुदेवायसमासेन
न्यवर्णयत् ॥भगवानुद्धवायाथविस्तरेणोपपत्तिभिः ४ तत्रतुप्रथमेध्यायेयदुवंशस्यसंक्षयः॥उपक्षिप्तोविरागायमौ
सलव्यपदेशतः ५ प्रवृत्तितःपरानंदकृष्णक्रीडानुवर्णिता॥तन्निवृत्त्यापरानंदपदारोहोनुवर्ण्यते ६ एवंतावद्दशमस्कंधे
भूभारावतारणायनिजविभूतिविभूषितयदुवंशस्ययदुवंशावतारितसकलसुरांशस्यभगवतःश्रीकृष्णस्यतदुचितप्रवृ
त्तिविडंबनेनतच्छ्रवणस्मरणादिपराणांपरेषामानंदकारणंक्रीडा निरूपिता।अथेदानीमुपरमितयोगमायावैभव
स्यभक्तानामात्मतत्वोपदेशपूर्वकंक्रीडार्थंभूतलेअवतारितानांचाधिकारिणांसुरांशानांमौसलापदेशेन तत्तदधिकारि
पदप्रापणपूर्वकंच ब्रह्मशापानुग्रहायनिजपदारोहोनिरूप्यते। तत्रकुरुक्षेत्रस्ययात्रायामचिरक्तस्यवसुदेवस्य कर्म्मणाक
र्मनिर्हारोयथास्यात्तथास्मदुच्यतामित्येवं कर्मयोगपृष्टवतोनारदादिभिःकर्मयोगोनिरूपितः ।कर्मणाकर्मनिर्हारएवसाधु
निरूपितः।यद्व्ययापापविद्धेनशुक्लेनेज्येतपुरुषइत्यादिनातेनचविशुद्धसत्वस्यश्रीरामकृष्णोपरमेश्वरत्वेनज्ञातवतःषडुभा
नयनाध्यायेश्रीकृष्णेनात्मतत्वमुपविष्टंचबोवःसमवेतार्थंतोतेतदुपमन्महे ।यत्रपुत्रानुसमुद्दिश्यतत्वयामउदाहृतेत्यादि
नातश्चविषयभोगातिशयेनपुनस्तिरोहितमासीत्॥तदेवेदानींनारदमुखेनप्रथमपंचाध्यायानिरूप्यते।तत्रप्रथमेध्या
येवैराग्योत्पादनाययदुकुलस्यब्रह्मशापापदेशेनात्युन्नतविषयसुखानामप्यनित्यताप्रतिपाद्यतेततश्चतुर्भिर्निमिजायंते

यसंवादेन सपरिकरपरमतत्वनिरूपणं। ततः षष्ठे भगवदुद्धवसंवादप्रस्तावस्ततस्त्रयोविंशत्याउद्धवं प्रति भगवत
त्त्वनिरूपणं। ततो द्वाभ्यां मौसलक्रीडेत्येवमेकत्रिंशताध्यायैरेकादशस्कंधस्य प्रवृत्तिः तस्य च यथामति व्याख्यान
मारभ्यते। तत्र मौसलप्रसंगार्थं पूर्वस्कंधार्थमनुवदति श्लोकद्वयेन। कृत्वेति। अवतारयत् अवतारयदित्यडागमो द्रष्ट
व्यः। जविष्ठं वेगवत्तरं अतिशीघ्रं हिंसापर्यवसायिनमित्यर्थः। कलिं कलहं १ एतद्विवृणोति ये कोपि ताः इति सपत्नैः दुर्यो
धनादिभिः कोपिताः कोपं कारिताः सुबहु यथा भवति तथा बहुवारानित्यर्थः तदेवाह दुर्द्यूतहेलनकचग्रहणादिभिरिति दु
र्द्यूतं कपटद्यूतं हेलनमवज्ञा कचग्रहणं दुःशासनेन द्रौपद्याः केशाकर्षणं एतानि आदिर्येषां गरदानजतुगृहादीनां तैः कृत्वा

श्रीबादरायणिरुवाच कृत्वा दैत्यवधं कृष्णः सरामो यदुभिर्वृतः॥ भुवोवतारयद्भारं जविष्ठं जनयन्क
पि लिं १ ये कोपिताः सुबहु पांडुसुताः सपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्तान्॥ कृत्वा निमित्तमितरेतर
तः समेतान्हत्वा नृपान्निरहरत् क्षितिभारमीशः २ भूभारराजपृतना यदुभिर्निरस्य गुप्तैः स्वबाहुभिरचिं
तयदप्रमेयः॥ मन्ये वनेर्ननु गतोप्यगतं हि भारं यद्यादवं कुलमहो अविषह्यमास्ते ३ श्रीनारायणाय

मि ये कोपिताः तान्पांडुसुतान् निमित्तं कृत्वा इतरेतरतः उभयोः पक्षयोः समेतान् मिलितान् नृपान् हत्वा क्षितेर्भारं निरहरत् अहारयत् द्वाभ्यां को
पिताः येभ्यश्च कोपिताः तान् इतरेतरतः परस्परं निमित्तं कृत्वेत्यन्वयः येतावत्कुरुदैत्याः पृतनाद्यः तान्स्वयमेव हतवान् येन्ये दैत्याः बांधव
छद्मनाश्रिताः तान् परस्परं निमित्तं विधाय हत्वा भूभारमपाकृतवानित्यर्थः २ अथ च भूभारेत्यादि अन्याश्च भुवो भारभूताः राजपृत
नाः राज्ञां पृतनाः सेनाः भूभारराजपृतनाः तांश्च पृतनाश्चेति वा स्वबाहुभिर्गुप्तैः परिरक्षितैर्यदुभिर्विवाहादिच्छलेन निरस्य हत्वा बाहुभिरिति बहुवचनं वस्तु
तः चतुर्भुजाभिप्रायेण नन्वेवं कृष्णः चिकीर्षतीति ज्ञात्वा कथं तस्यैषापराधबान्धवेषु प्रवृत्तिरित्यत्राह। अप्रमेयः अप्रमातुमशक्यः एवं तर्हि अहमे

भा॰ए॰
२

तर्हीदमप्यन्यैर्दुर्लंघ्यतां तत्राह नैवेति । अन्यतः देवादिभ्योपि यादवकुलस्य परिभवः तिरस्कारो न भवेत् । कुतः मत्संश्रयस्य मां सं-
श्रयत इति मत्संश्रयं कुलं तस्य किंच नित्यं विभवोन्नहनस्य विभवैर्गजतुरगादिभिरुछृंखलस्य यद्युत हीदं किमिति संहर्तव्यं तत्राह विभ-
वोन्नहनस्येति तस्मादेवं करिष्यामीत्याह अंतःकलिमिति शांतिमुपशमं उपैमि वर्तमानसामीप्ये वर्तमानवद्वा उपैष्यामि तदनंतरं
धामैव कुंठाख्यमुपैष्यामीत्यर्थः ४ व्यवसितः कृतनिश्चयः संजह्रे उपसंहृतवान् ५ तदेवमवतारप्रयोजनं सर्वं संपाद्य स्वं लोकं जग-
मेत्याह श्लोकद्वयेन स्वमूर्त्येति लोकानां लावण्यस्य निर्मुक्तिः संभोगो यया तामवेक्ष्य लोके खलु लावण्यं नास्तीत्यर्थः यद्वा लोके श्योला-

नैवान्यतः परिभवोस्य भवेत्कथंचित् मत्संश्रयस्य विभवोन्नहनस्य नित्यं ॥ अंतःकलिं यदुकुलस्य विधाय वे-
णुस्तंबस्य वह्निमिव शांतिमुपैमि धाम ४ एवं व्यवसितो राजन् सत्यसंकल्प ईश्वरः ॥ शापव्याजेन वि-
प्राणां संजह्रे स्वकुलं विभुः ५ स्वमूर्त्या लोकलावण्यनिर्मुक्त्या लोचनं नृणां ॥ गीर्भिस्ताः स्मरतां चित्तं
पदैस्तानीक्षतां क्रियाः ६ आछिद्य कीर्तिं सुश्लोकां वितत्य ह्यंजसानु कौ ॥ तमोनया तरिष्यंतीत्यगात्स्वं
पदमीश्वरः ७ श्रीराम ॥ ॥

वण्यस्य विनिर्मुक्तिर्दानं यतः यत्प्रकर्षेण लोकाः लावण्यवंतो भवंतीत्यर्थः
तया स्वमूर्त्या नृणां लोचनमाछिद्य आकृष्य ततोन्यस्यावलोकने लोचनस्याप्रवृत्तेः तथा स्वगीर्भिस्ताः गिरः स्मरतां चित्तं वा छिद्य
तथा पदैस्तत्र तत्रांकितैस्तानि पदानीक्षतामीक्षमाणानामन्यतो गमनादिकाः क्रियाश्चाछिद्य तदानीं तनानां सर्वेषां चक्षुरादि-
वृत्तीः स्वैकनिष्ठाः कृत्वेत्यर्थः ६ किंच इतउपरि जनिष्यमाणानां संसारतरणाय कौ पृथिव्यां शोभनाः श्लोकाः कवीनां य- २
स्यां तां स्वकीर्तिं वितत्य विस्तार्य अनया कीर्त्या अंजसा सुखेनैव सुनिश्चितं तमस्तरिष्यंतीत्यभिप्रेत्य ईश्वरः स्वं परं स्थानमागमदिति ७ रामे

अब्रह्मण्येभ्योऽदातृभ्यो वा असेवकेभ्यो वा विप्राः कुप्यंति वृष्णयस्तु न तथेत्याह ब्रह्मण्यानामित्यादिना किंच कोपेऽज्ञा
ते पि कृष्णचेतसां कथमभूत् कथं प्रादुरभूदित्यर्थः ८ अतः स्पष्टस्य निमित्तस्याभावात् निमित्तांतरं पृच्छति यन्नि
मित्त इति एकात्मनां एकचित्तानां कथं भेदः कलहः ९ ईश्वरेच्छैवात्र निमित्तमिति परिहरति बिभ्रदिति सकलानां
सुंदरवस्तूनां संनिवेशो विन्यासविशेषो यस्मिन् तत्तद्वपुर्बिभ्रत् तर्हि किमिति सौंदर्यादिविषयपरः नसुमंगलं कर्माचरन् त
त्किं कयापि कामनया न आप्तकामः तर्हि किमिति कर्माचरति [illegible] धाम द्वारवत्याख्यं गृहमास्थाय रममाणः य्रहरमभा

राजोवाच ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनां ॥ विप्रशापः कथमभूद्वृष्णीनां कृष्णचेतसां ८
यन्निमित्तः स वै शापो यादृशो द्विजसत्तम ॥ कथमेकात्मनां भेद एतत्सर्वं वदस्व मे ९ श्रीशुक उवाच
बिभ्रद्वपुः सकलसुंदरसंनिवेशं कर्माचरन्भुवि सुमंगलमाप्तकामः ॥ आस्थाय धाम रममाण उदारकी मा
र्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेषः १० कर्माणि पुण्यनिवहानि सुमंगलानि गायज्जगत्कलिमलाप
हराणि कृत्वा ॥ कालात्मना निवसता यदुदेवगेहे पिंडारकं समगमन्मुनयो निसृष्टाः ११ श्रीरामाय

नू णोऽकर्म ग्राहयितुमित्यर्थः ननु किमाप्तकामस्य गृहरत्या कर्मभिर्वर्तितव्यमाह उदारकीर्तिर्बहुफलप्रदा कीर्तिर्यस्य सः कीर्तिविस्तारार्थमि
त्यर्थः एवं परमैश्वर्येण वर्तमान एव कुलं संहर्तुमैच्छत् तत्र कस्य हेतोः स्थितः कृत्यैर्भूभारहरणादिशेषो यस्य सः १० ईश्वरेच्छया भिते
ब्रह्मशापनिमित्तं वक्तुमाह कर्माणीति कर्मर्षिमाहृताः कर्माणि कृत्वा निसृष्टा मुनयः पिंडारकं समगमन्नित्यन्वयः निसृष्टाः प्रस्थापिताः
पूर्वोक्ता उदारकीर्तितां विवृण्वन् कर्माणि विशिनष्टि पुण्यनिवहानीत्यादिभिस्त्रिभिः पादैः कानिचिद्दृश्यमेधादिकर्माणि पुण्यमेव जनयंति
पुत्रोपलालनादीनि तु तत्कालसुखमेव कुर्वंति प्रायश्चित्तादीनि तु पापमेव हरंत्येतानि तु सर्वतो मुखानीत्याह पुण्यनिवहानि कीर्तनादिना पु
ण्यानि निवहंति प्रापयंति तथा सुमंगलानि अतिसुखावहानि गायतो जगतः कलिमलापहराणि कृत्वा मुनिप्रस्थापने हेतुः कालात्मना संहार
कारूपेण यदुदेवगेहे निवसता स्वकुलं जिहीर्षतेत्यर्थः पिंडारकं तन्नाम तीर्थविशेषं ११

ति पि

भा॰स्कं॰

३

१२ उपसंगृह्य पादसंग्रहं कृत्वा १३ प्रश्नप्रकारमाह तेवेषयित्वेति द्वाभ्यां हे अमोघदर्शनाः विप्राः एषा अंतर्वत्नी गर्भिणी वः युष्मान्साक्षात्प्रष्टुं विलज्जती लज्जमाना अस्मन्मुखेन पृच्छति प्रसोष्यंती आसन्नप्रसवा किंस्वित्सुतं जनयिष्यति कन्यां वा पुत्रं वा तत्प्रश्न १४ १५ प्रलब्धा वंचिताः १६ तस्मिन्नुदरे अयस्मयं लोहमयं १७ मंदभाग्यैर्नोस्माभिः किमेतत्

विश्वामित्रोसितः कण्वो दुर्वासा भृगुरंगिराः॥ कश्यपो वामदेवोत्रिर्वसिष्ठो नारदादयः १२ क्रीडंतस्तानुप
व्रज्य कुमारा यदुनंदनाः॥ उपसंगृह्य पप्रच्छुरविनीता विनीतवत् १३ ते वेष[illegible]यित्वा स्त्रीवेषैः सांबं जां
बवतीसुतं॥ एषा पृच्छति वो विप्रा अंतर्वत्न्यसितेक्षणा १४ प्रष्टुं विलज्जती साक्षात्प्रब्रूतामोघदर्शनाः॥
प्रसोष्यंती पुत्रकामा किंस्वित्संजनयिष्यति १५ एवं प्रलब्धा मुनयस्तान्स्तु कुपिता नृप॥ जनयिष्यति वो मं
दा मुसलं कुलनाशनं १६ तच्छ्रुत्वा तेतिसंत्रस्ता विमुच्य सहसोदरं॥ सांबस्य ददृशुस्तस्मिन्मुसलं ख
ल्वयस्मयं १७ किं कृतं मंदभाग्यैर्नः किं वदिष्यंति नो जनाः॥ इति विह्वलिता गेहानादाय मुसलं ययुः
१८ तच्चोपनीय सदसि परिम्लानमुखश्रियः॥ राज्ञ आवेदयांचक्रुः सर्वयादवसंनिधौ॥ १९ श्रुत्वामोघं वि
प्रशापं दृष्ट्वा च मुसलं नृप॥ विस्मिता भयसंत्रस्ता बभूवुर्द्वारकौकसः २० तच्चूर्णयित्वा मुसलं यदुराजः
स आहुकः॥ समुद्रसलिले प्रास्यल्लोहं चास्यावशेषितं २१ कश्चिन्मत्स्योग्रसील्लोहं चूर्णानि तरलैस्ततः॥
उह्यमानानि वेलायां लग्नान्यासन्किलैरकाः २२

कृतं नः अस्माकं वदिष्यंतीति विह्वलिताः संतो मुसलमादाय गेहान्ययुः १८ राज्ञे उग्रसेनाय न तु श्रीकृष्णाय १९
२० आहुकः उग्रसेनः सोपि श्रीकृष्णमपृष्ट्वैव प्रास्यत् प्रक्षिप्तवान् अस्य मुसलस्य चूर्णीक्रियमाणस्यावशेषितं लोहं च प्रास्यत् २१
तृणविशेषः
तरले स्तरंगैः २२ श्री राम॥

राम
३

४ मत्स्योगृहीतोमत्स्यप्रैर्जालेनान्यैःसहार्णवे॥तस्योदरगतंलोहंसशल्येलुब्धकोकरोत् २३ भगवान्ज्ञातसर्वार्थईश्वरोपितदन्यथा॥
अन्यैर्मत्स्यैःसहशल्येशरारोग्र २३ ज्ञाताःसर्वेर्थायेनसःईश्वरोपीतिसमर्थोपिसन्नन्यथाकर्तुंनैच्छत् किंत्वन्वमोदत यतः (२४ इति श्री ... दशे प्रथमः)
तोपि कालरूपी २४ इतिश्रीभागवतेभावार्थदीपिकायांएकादशेप्रथमः॥ ॥द्वितीयेनिमिजायंतसंवादेनाहनारदः॥धर्माननु
भागवतान्भक्त्यावसुदेवायपृच्छते १ अभीक्ष्णंप्रस्थापिपुनःपुनरवात्सीदित्यर्थः ननुनारदस्यदक्षादिशापान्नैकत्रवा
सःसंभवतीत्याहगोविंदभुजगुप्तायामितिनतस्यांशापोदःप्रभावइत्यर्थःकृष्णोपासनेलालसाऔत्सुक्यंयस्यसः १
४॥ श्रीशुकउवाच गोविंदभुजगुप्तायांद्वारवत्यांकुरूद्वह॥अवात्सीन्नारदोभीक्ष्णंकृष्णोपासन
लालसः १ कोनुराजन्निंद्रियवान्मुकुंदचरणांबुजं॥नभजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः २ तमेकदा
तुदेवर्षिंवसुदेवोगृहागतं॥अर्चितंसुखमासीनमभिवाद्येदमब्रवीत् ३ श्रीवसुदेवउवाच भगवन्भवतो
यात्रास्वस्तयेसर्वदेहिनां॥कृपणानांयथापित्रोरुत्तमश्लोकवर्त्मनां ४ भूतानांदेवचरितंदुःखायचसु
खायच॥सुखायैवहिसाधूनांत्वादृशामच्युतात्मनां ५ भजंतियेयथादेवान्देवाअपितथैवतान्॥
छायेवकर्मसचिवाःसाधवोदीनवत्सलाः ६
यद्धनेनमुक्तानामपीज्यमानोत्सुक्यंतेकोनामनभजेदित्याहकोन्विति॥इंद्रियवानिति॥इंद्रियवत्वमात्रमेवयत्राधिकारिविशे
णमित्यर्थःसर्वतःसर्वेभ्योपिलोकेभ्योमृत्युर्यस्यसः २ ३ यथापित्रोर्यात्राआगमनमपत्यानांस्वस्तयेमंगलायतथावत्तम
श्लोकस्यवर्त्मभूतानांमहतांयात्राकृपणानांस्वस्तयेतथाभगवद्रूपस्यभवतोयात्रासर्वदेहिनांस्वस्त्यइति ४ देवैरपिमहतामु
पमानमनुचितमित्याहभूतानामिति॥देवानांचरितमतिवृष्ट्यादिनाभूतानांदुःखायापिभवतित्वादृशांत्वयासदृशानांअच्यु नां
तेषां तात्मनांयेषां ५ किंचसुखंकुर्वतोपिभजनानुसारेणकुर्वंतिनतथासाधवइत्याहभजंतीतिछायेव॥यथापुरुषोयावत्क
रोतितावदेवतस्यछायापितथाकर्मसचिवाःकर्मसहायाः ६ श्रीरामायनमः श्रीकृष्णायनमः श्रीरामाय
१२ ॥कर्तुंनैच्छद्विप्रशापंकालरूप्यन्वमोदत २४ इतिश्रीभाग॰भा॰एकादशेप्रथमः॥ ॥७॥ ॥
देवा३

४ मत्स्योगृहीतो मत्स्यैर्जालेनान्यैः सहार्णवे ॥ तस्योदरगतं लोहं स शल्ये लुब्धकोकरोत् २३ भगवान् ज्ञातसर्वार्थ ईश्वरोपि तदन्यथा ॥

अन्यैर्मत्स्यैः सह जाल्येन गृहीतः २३ ज्ञाताः सर्वेर्था येन सः ईश्वरोपि तिसमर्थोपि सन्नन्यथा कर्तुं नैच्छत् किं त्वन्वमोदत यतः
कालरूपी २४ इति श्रीभागवते भावार्थदीपिकायां एकादशे प्रथमः ॥ ॥ द्वितीये निमिजायंतसंवादेनाह नारदः ॥ धर्मान्
तोपि भागवतान् भक्त्या वसुदेवाय पृच्छते १ अभीक्ष्णं प्रस्थायापि पुनः पुनरवात्सीदित्यर्थः ननु नारदस्य दक्षाद्धिशापान्नैकत्रवा
सः संभवतीत्याह गोविंदभुजगुप्तायामिति न तस्योक्तशापोदः प्रभावदित्यर्थः कृष्णोपासने लालसा औत्सुक्यं यस्य सः १

॥ श्रीशुक उवाच गोविंदभुजगुप्तायां द्वारवत्यां कुरूद्वह । अवात्सीन्नारदो भीक्ष्णं कृष्णोपासन
लालसः १ को नु राजन्निंद्रियवान्मुकुंदचरणांबुजं ॥ न भजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः २ तमेकदा
तु देवर्षिं वसुदेवो गृहागतं ॥ अर्चितं सुखमासीनमभिवाद्येदमब्रवीत् ३ श्रीवसुदेव उवाच भगवन्भवतो
यात्रा स्वस्तये सर्वदेहिनां ॥ कृपणानां यथा पित्रोरुत्तमश्लोकवर्त्मनां ४ भूतानां देवचरितं दुःखाय च सु
खाय च ॥ सुखायैव हि साधूनां त्वादृशामच्युतात्मनां ५ भजंति ये यथा देवान्देवा अपि तथैव तान् ॥
छायेव कर्मसचिवाः साधवो दीनवत्सलाः ६

यद्वनेन मुक्तानामपि दुरात्मो तु सुक्ष्यते को नाम न भजेदित्याह को न्विति । इंद्रियवानिति । इंद्रियवत्वमात्रमेव यत्राधिकारे विशेष
णमित्यर्थः सर्वतः सर्वेभ्योपि लोकेभ्यो मृत्युर्यस्य सः २ ३ यथा पित्रोर्यात्रा आगमनमपत्यानां स्वस्तये मंगलाय यथा वत्तम
श्लोकस्य वर्त्मभूतानां महतां यात्रा कृपणानां स्वस्तये तथा भगवद्रूपस्य भवतो यात्रा सर्वदेहिनां स्वस्त्यय इति ४ देवैरपि महतामु नीं
तेषां पमानमनुचितमित्याह भूतानामिति । देवानां चरितमतिवृष्ट्यादिना भूतानां दुःखायापि भवति त्वादृशां तथा सदृशे अच्यु
तआत्मा येषां ५ किं तु सुखं कुर्वंतोपि भजनानुसारेण कुर्वंति न तथा साधव इत्याह भजंतीति छायेव । यथा पुरुषो यावत्क
रोति तावदेव तस्य छायापि तथा कर्मसचिवाः कर्मसहायाः ६ श्रीरामाय नमः श्रीकृष्णाय नमः श्रीरामाय
१२ ॥ कर्तुं नैच्छद्विप्रशापं कालरूप्यन्वमोदत २४ इति श्री भाग० भा० एकादशे प्रथमः ॥ ॥७॥ ॥

देवाइ

४ तदेवं यद्यपि भगवत आगमनमात्रेणैव वयं कृतार्थास्तथापि पृच्छामः तवेति । तव यैर्धर्मैः प्रसन्नो भगवान् तानित्यर्थः ७ ननु
त्वत्तोऽपि किमन्यो भगवत्प्रसादपात्रमस्ति तत्राह अहं किलेति । भुवि प्रजार्थोऽपत्यं पुत्रलाभप्रयोजनः सन् पूजितवान् किलेति ।
८ सुतो गृहे भगवद्रूपं मनुस्मरति । अतो यथा मुच्येमहि तथा नोऽस्मान् शाधि शिक्षयेति ८ विचित्राणि व्यसनानि यस्मिन् संसारे तस्मा
त्संसारात् तथा विश्वतः सर्वतो भयं यस्मिन् तस्माद्द्वं वं द्विर्हेतुभूतैः अञ्जसा अनायासेन अद्धा साक्षात् ९ हरेर्गुणैर्वर्णनीयत्वे

ब्रह्मंस्तथापि पृच्छामो धर्मान् भागवतांस्तव ॥ यान् श्रुत्वा श्रद्धया मर्त्यो मुच्यते विश्वतो भयात् ७ अहं किल पुराऽनं
तं प्रजार्थो भुवि मुक्तिदं । अपूजयं न मोक्षाय मोहितो देवमायया ८ यथा विचित्रव्यसनाद्भवद्भिर्विश्वतोभ
यात् ॥ मुच्येम ह्यञ्जसैवाद्धा तथा नः शाधि सुव्रत ९ श्रीशुक उवाच ॥ राजन्नेवं कृतप्रश्नो वसुदेवेन धीमता ॥
प्रीतस्तमाह देवर्षिर्हरेः संस्मारितो गुणैः १० श्रीनारद उवाच ॥ सम्यगेतद्व्यवसितं भवता सात्वतर्षभ ॥
यत्पृच्छसे भागवतान् धर्मांस्त्वं विश्वभावनान् ११ श्रुतोऽनुपठितो ध्यात आदृतो वानुमोदितः ॥ सद्यः पुना
ति सद्धर्मो देवविश्वद्रुहोऽपि हि १२ त्वया परमकल्याणः पुण्यश्रवणकीर्तनः ॥ स्मारितो भगवानद्य देवो
नारायणो मम १३ अत्राप्युदाहरन्तीममितिहासं पुरातनं ॥ आर्षभाणां च संवादं विदेहस्य महात्मनः ॥
१४ प्रियव्रतो नाम सुतो मनोः स्वायंभुवस्य यः ॥ तस्याग्नीध्रस्ततो नाभिरृषभस्तत्सुतः स्मृतः १५

नत्र स्तुते हरिं संस्मारित इत्यर्थः १० प्रीतिमाविष्करोति सम्यगिति त्रिभिः पृच्छसे पृच्छसि विश्वभावनान् सर्वशोधकान् ११ आदृतः
आस्तिक्येन गृहीतः अनुमोदितः परैः क्रियमाणः संस्थितः सद्धर्मो भागवतो धर्मः देव हे वसुदेवेत्यर्थः यद्वा देवेभ्यो विश्वस्मै च द्रुह्यंति ये राम
तानपि १२ किं च त्वया महानुपकारः कृत इत्याह त्वयेति पुण्ये श्रवणकीर्तने यस्य सः १३ अत्रापि भागवतधर्मनिर्णये विदे ४
हस्य जनकस्य १४ आर्षभाणामुत्पत्तिं सान्वयां विविच्य कथयति प्रियव्रत इति सप्तभिः १५ श्रीरामभद्राय नमः श्रीकृष्णाय

मोक्षधर्मविवित्सया मोक्षधर्माणां प्रवर्तनेछयाअवतीर्णवासुदेवांशमाहुः तस्यचवेदपारगं सुतशतमासीत् १६ तेषामृषभसुता
नांमध्ये नवयोगीश्वरा याचरितं वक्ष्ये इतरेषां चरितं ततो विविच्याहते षामिति। एतदर्थं नाभिनामवर्षं यस्य नाम्नाभारतमित्यद्भुतं
विख्यातमासीत् एतेन तस्य धर्मातिरेको निरूपितः १७ इमां श्रियं गृहान्निर्गतः हरिमुपासीनः सेवमानः सन् १८ नवसुताः
नवद्वीपपतयः नवानां ब्रह्मावर्तादिभूखंडानां पतयः अस्य भारतवर्षस्य एकाशीतिः सुताः कर्ममार्गप्रवर्तकाः ब्राह्मणा अभवन् १९

तमाहुर्वासुदेवांशं मोक्षधर्मविवित्सया॥ अवतीर्णं सुतशतं तस्यासीद्ब्रह्मपारगं १६ तेषां वै भरतो ज्येष्ठो नारायण
परायणः॥ विख्यातं वर्षमेतद्यन्नाम्ना भारतमद्भुतं १७ स भुक्तभोगां त्यक्त्वेमां निर्गतस्तपसा हरिं॥ उपासीनस्तत्पद
वीं लेभे वै जन्मभिस्त्रिभिः १८ तेषां नव नवद्वीपपतयोस्य समंततः॥ कर्मतंत्रप्रणेतार एकाशीतिर्द्विजातयः
१९ नवाभवन्महाभागा मुनयो ह्यर्थशंसिनः॥ श्रमणा वातरशना आत्मविद्याविशारदाः २० कविर्हरिरंतरिक्षः
प्रबुद्धः पिप्पलायनः॥ आविर्होत्रोथद्रुमिलश्चमसः करभाजनः २१ त एते भगवद्रूपं विश्वं सदसदात्मकं॥ आत्म
नोऽव्यतिरेकेण पश्यंतो व्यचरन्महीं २२ अव्याहतेष्टगतयः सुरसिद्धसाध्यगंधर्वयक्षनरकिन्नरनागलोका
न्॥ मुक्ताश्चरंति मुनिचारणभूतनाथविद्याधरद्विजगवां भुवनानि कामं २३ त एकदा निमेः सत्रमुपजग्मुर्य
दृच्छया॥ वितायमानमृषिभिरजनाभे महात्मनः २४ तान्दृष्ट्वा सूर्यसंकाशान्महाभागवतान्नृप॥ यजमा
नोग्नयो विप्राः सर्व एवोपतस्थिरे २५ विदेहस्तानभिप्रेत्य नारायणपरायणान्॥ प्रीतः संपूजयांचक्रे आसनस्था
न्यथार्हतः २६

अर्थशंसिनः परमार्थनिरूपकाः श्रमणाः श्रमवंतः आत्माभ्यासे कृतश्रमाः इत्यर्थः वातरशना दिगंबराः आत्मविद्यायां विशार
दाः निष्णाताः २० तेषांपारमहंस्यचरितमाह तएतइतिद्वाभ्यां भगवद्रूपं विश्वं पश्यंतः सदसदात्मकं स्थूलसूक्ष्मरूपं आ
व्यतिरेकेणपश्यंतः २२ अव्याहताअप्रतिहताइष्टाअभिप्रेतागतिर्येषांते मुक्ताअनासक्ताः २३ महात्मनो निमेः वि
तायमाने अनुष्ठीयमाने अजनाभे भारतवर्षे २४ यजमानो निमिः अग्नयः आहवनीयादयः विप्राः ऋत्विगादयः २५ अभि

भा·ए·
५

स्वरूचैवरोचमानान्नत्वाभरणादिप्रकाशैः ब्रह्मपुत्रोपमान्सनत्कुमारादिसदृशान् २७ परमप्रीत्यातद्दर्शनमभिनं
दतिद्वाभ्यांमन्यइति। ननुभगवतः पार्षदानांकथमत्रोपलब्धिस्तत्राह विष्णोरिति विष्णुभक्तालोकपावनार्थंसर्वत्रप
र्यटंतीत्यर्थः २८ मयादुर्लभंलब्धंअहोभाग्यंइत्याह दुर्लभइति। बहवोदेहाभवंतियेषांतेदेहिनोजीवास्तेषांक्षणभं
गुरोपिमानुषोदेहोदुर्लभः परमपुरुषार्थसाधनत्वात् वैकुंठः प्रियोयेषां। वैकुंठस्यवाप्रियास्तेषांदर्शनं २९ हेअनघाः

तान्रोचमानान्स्वरूचाब्रह्मपुत्रोपमान्नव॥ पप्रच्छपरमप्रीतःप्रश्रयावनतोन्नृपः २७ विदेहउवाच
मन्येभगवतःसाक्षात्पार्षदान्वोमधुद्विषः॥ विष्णोर्भूतानिलोकानांपावनायचरंतिहि २८ दुर्लभोमानु
षोदेहोदेहिनांक्षणभंगुरः॥ तत्रापिदुर्लभंमन्येवैकुंठप्रियदर्शनं २९ अतआत्यंतिकंक्षेमंपृच्छामोभ
वतोनघाः॥ संसारेस्मिन्क्षणार्धोपिसत्संगःशेवधिर्नृणां ३० धर्मान्भागवतान्ब्रूतयदिनःश्रु
तयेक्षमं॥ यैःप्रसन्नःप्रपन्नायदास्यत्यात्मानमप्यजः ३१ श्रीनारदउवाच एवंतेनिमिनापृष्टावसु
देवमहत्तमाः॥ प्रतिपूज्याब्रुवन्प्रीत्याससदस्यर्त्विजंनृपं ३२ श्रीकविरुवाच मन्येकुतश्चिद्भयमच्
युतस्यपादांबुजोपासनमत्रनित्यं॥ उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मनायत्रनिवर्ततेभीः ३३

निरवद्याःभवतोयुष्मान्आत्यंतिकंक्षेमंपृच्छामःयतःक्षणार्धकालभवोपिसत्संगःशेवधिःनिधिलाभेयथानंदोभवतित
थात्रपरमानंदइत्यर्थः ३० तदर्थंभागवतान्धर्मान्ब्रूतयदिनोस्माकंश्रयतेतच्छ्रवणायक्षमंयोग्यंभवति। कथंभूतान्
येर्धर्मैःप्रपन्नायभक्तायअजोहरिःआत्मानमपिदास्यतितान् ३१ ससदस्यैःऋत्विग्भिश्चवर्तमानंतेपिभगवद्धर्मश्रवण
पराबभूवुरित्यर्थः भगवद्धर्मंतद्दुस्तमायातत्तरणाभिधा। ब्रह्मकर्मावतारेहाभक्तप्राप्त्युयुगक्रमान्। शास्तुक्रमेणकृतवान्नवप्र
श्नान्निमिर्नवाप एकैकस्योत्तरंप्रोचुःकविमुख्यामुनीश्वराः ३२ प्रथममात्यंतिकंक्षेमंकथयतिमन्यइतिनकुतश्चिद्भयंय
स्मात्तदकुतश्चिद्भयंअत्रसंसारेअसदात्मभावान्असतिदेहा
दावात्मभावनातःनित्यंसर्वदाउद्विग्नबुद्धेःविश्वात्मनासर्वथा
५ निःशेषंयत्रपादांबुजोपासनेभीर्निवर्ततेतत् ३३

भागवतधर्मलक्षणमाह येवैइति मन्वादिमुखेनवर्णाश्रमादिधर्मानुक्त्वातिरहस्यत्वात्स्वमुखेनैवभगवताविदुषामपिपुं
सांअंजःसुखेनैवात्मलब्धयेयेवैउपायाःप्रोक्तास्तान्भागवतान्धर्मान्विद्धि ३४ अंजःपदेनसुकरत्वमुक्तं विवृणोति
यानितियानास्थायाश्रित्ययोगादिष्विवनप्रमाद्येतविघ्नैर्नविहन्येत।किंचनिमील्यनेत्रेधावन्नपिइहयेषुभागवतधर्मेषुन
स्खलेत्निमीलनंनामाज्ञानंयथाहुःश्रुतिस्मृतीउभेनेत्रेविप्राणांपरिकीर्तिते॥एकेनविकलःकाणोद्वाभ्यामंधःप्रकीर्तितइति
अज्ञात्वापीत्यर्थःयथापदन्यासस्थानमतिक्रम्यशीघ्रंपरतःपदन्यासेनगतिर्धावनंतद्दूरस्थापिकिंचित्किंचिदतिक्रम्यातिक्रम्या

येवैभगवताप्रोक्ताउपायाह्यात्मलब्धये।अंजःपुंसामविदुषांविद्धिभागवतान्हितान् ३४ यानास्थायनरो
राजन्नप्रमाद्येतकर्हिचित्॥धावन्निमील्यवानेत्रेनस्खलेन्नपतेदिह ३५ कायेनवाचामनसेंद्रियैर्वाबुध्यात्म
नावानुसृतस्वभावात्॥करोतियद्यत्सकलंपरस्मैनारायणायेतिसमर्पयेत्तत् ३६ श्रीगोपालायनमः॥

तिशीघ्रमनुष्ठानंधावनंतथानुतिष्ठन्नपिनस्खलेत्नप्रत्यवायीस्यात्तथानपतेत्फलात्नभ्रश्येत्।ब्राह्मणादीनामु
क्तान्धर्मान्कश्चिदकुर्वाणोभागवतान्धर्मान्श्रवणकीर्तनादीन्कुर्वाणस्तत्फलंप्राप्नुयादितिभावः ३५ ननुकेतेभागव
ताधर्माःईश्वरार्पितसर्वकर्माण्यपीत्याह कायेनेति।आत्मनाचित्तेनअहंकारेणवाअनुसृतोयःस्वभावःस्तस्मादयमर्थःन
केवलंविधितःकृतमेवेतिनियमःस्वभावानुसारिलौकिकमपीति तथाचभगवद्गीतासु।यत्करोषियदश्नासियज्जुहोषि
ददासियत्॥यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमिति।यद्वाननुकायादीनामेवकर्मनात्मनइत्याशंक्याह अध्यासे
नानुसृतान्ब्राह्मणत्वादिस्वभावात्यद्यत्करोतीत्यर्थः तत्सकलंपरस्मैपरमेश्वरायनारायणायेतिसमर्पयेत्तथास
तिसकलमपिकर्मभागवतोधर्मोभवतीतिभावः ३६ श्रीगोपालायनमः श्रीकृष्णायनमः श्रीरामायनमः

ननु किमेवं परमेश्वरभजनेन अज्ञानकल्पितभयस्य ज्ञानैकनिवर्त्यत्वादित्याशंक्याह भयमिति यतो भयं तन्मायया भवेत् अ
तो बुधो बुद्धिमान् तमेवाभजेत् । ननु भयं देहाद्यभिनिवेशतो भवति स च देहाहंकारतः स च स्वस्वरूपास्मरणात् किमत्र त
स्य माया करोति अत आह ईशादपेतस्य तदीशविमुखस्य तन्मायया स्मृतिः भगवतः स्वरूपास्फूर्तिस्ततो विपर्ययो देहोस्मी
ति ततो द्वितीयाभिनिवेशाद्भयं भवति । एवं प्रसिद्धं लौकिकीष्वपि मायासु उक्तं च भगवता दैवी ह्येषा गुणमयी मम माया दु
रत्यया ॥ मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते । एकयाव्यभिचारिण्या भक्त्या भजेत् किं च गुरुदेवतात्मा गुरुरेव देवता ईश्व
रः आत्मा प्रेष्ठश्च यस्य तथादृष्टिः सन्नित्यर्थः ३७ ननु विषयविक्षिप्तचित्तस्य कुतोव्यभिचारिणी भक्तिः संभवति कुतस्तरामभ

भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोस्मृतिः ॥ तन्माययातो बुध आभजेत्तं भक्त्यैकयेशं गु
रुदेवतात्मा ३७ अविद्यमानोप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा ॥ तत्कर्मसंकल्पविक
ल्पकं मनो बुधो निरुंध्यादभयं ततः स्यात् ३८ शृण्वन् सुभद्राणि रथांगपाणेर्जन्मानि कर्माणि च यानि लो
के ॥ गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसंगः ३९

यं तत्र न तावद्विषयो नाम वास्तवोस्ति किंतु मनोविलासमात्रं अतो मनोनियमेन भजनादभयं स्यादित्याह अविद्यमानो
पीति द्वयः द्वैतप्रपंचः ध्यातुः पुंसः धिया मनसा स्वप्नश्च मनोरथश्च यथेत्यर्थः तत्तस्मात्कर्माणि संकल्पयति विकल्पयति
च यन्मनस्तन्निरुंध्यात् नियच्छेत् ततश्चैकया भक्त्या भजनादभयं स्यादित्यर्थः ३८ एतदप्यशक्यमित्याशंक्य सुगमं
मार्गमाह शृण्वन्निति तदर्थकानि तान्येव जन्मानि कर्माणि च अर्थो येषां तानि एतान्यपि साकल्येन ज्ञातुमशक्यानीत्या
शंक्याह यानि लोके प्रसिद्धानि गीतानि तानि शृण्वन् गायंश्च विचरेत् असंगो निस्पृहः ३९ श्रीगोपालाय नमः ॥ ॥

एवंभजतः संप्राप्तप्रेमलक्षणभक्तियोगस्य संसारधर्मातीतां गतिमाह एवमिति। एवंव्रतं व्रतं यस्य सः स्वप्रियस्य हरेर्नामकी
दू२ र्त्या जातोनुरागः प्रेम यस्य सः अतएव द्रुतचित्तः श्लथहृदयः कदाचिद्भक्तपराजितं भगवंतमाकलय्योच्चैर्हसति एतावंतं कालमुपेक्षि
तोस्मीति रोदिति अत्यौत्सुक्याद्रौतीति क्रोशति हे हरे मामनुगृहाणेति अतिहर्षेण गायति जितं जितमिति नृत्यति किं दांभिकवत्
परान्प्रति प्रकाशयितुं नेत्युन्मादवत् ग्रहगृहीतवत् लोकबाह्यः विवशः ४० किंच खमिति सत्वानि भूतानि आकाशादियत्किंचि
द्भूतमात्रं हरेः शरीरमिति मत्वा प्रणमेत्। संभावनायां लिङ्। ४१ ननु नियमारूढयोगानामपि बहुजन्मभिर्दुर्लभा गतिः कथं ना
न मकीर्तनमात्रेणैकस्मिन्नेव जन्मनि भवेदित्याशंक्य सदृष्टांतमाह भक्तिरिति प्रपद्यमानस्य हरिं भजतः पुंसः भक्तिः प्रेमलक्षणा परे

एवंव्रतस्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः॥ हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबा
ह्यः ४० खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्वानि दिशो द्रुमादीन्॥ सरित्समुद्रांश्च हरेः शरीरं यत्किंच
भूतं प्रणमेदनन्यः ४१ भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः॥ प्रपद्यमानस्य य
थाश्नतस्युस्तुष्टिः पुष्टिः क्षुदपायोनुघासं ४२ इत्यच्युतांघ्रिं भजतोनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः॥
भवंति वै भागवतस्य राजंस्ततः परां शांतिमुपैति साक्षात् ४३ राजोवाच अथ भागवतं ब्रूत यद्धर्मो यादृशो नृणां।
यथाचरति यद्ब्रूते यैर्लिंगैर्भगवत्प्रियः ४४ श्रीरामाय

परेशानुभवः प्रेमास्पदभगवद्रूपस्य स्फूर्तिस्तया निर्वृतस्य ततोन्यत्र गृहादिषु विरक्तिरित्येष त्रिकः एककालः भजनसमकाल ए
व स्यात् यथाश्नतो भुंजानस्य तुष्टिः सुखं पुष्टिरुदरभरणं क्षुन्निवृत्तिश्च प्रतिग्रासं स्युः उपलक्षणमेतत् प्रतिसिक्थमपि यथा स्युः
तद्वत् एवमेकैकस्मिन् भजने किंचित् किंचित् प्रेमादित्रिके जायमानेऽनुवृत्त्या भजतः परं प्रेमादि जायते बहुग्रासभोजिन इव परमहा
तुष्ट्यादि ४२ ततश्च भगवत्प्रसादेन कृतार्थो भवतीत्याह इत्यच्युतांघ्रिमिति ४३ भागवतस्य भवंतीत्युक्ते तस्य लक्षणं पृच्छति अ
थेति यद्धर्मः यस्मिन् धर्मे परिनिष्ठितः यादृशः यत्स्वभावः यथाचरति वर्तते ब्रूते वा यैश्च लिंगैर्भगवतः प्रियो भवति ४४ श्रीराम

यद्धर्म इत्यस्योत्तरमाह त्रयेणा सर्वभूतेष्विति। आत्मनः स्वस्य सर्वभूतेषु ब्रह्मभावेन समन्वयं यः पश्येत्तथा ब्रह्मरूपे आत्मनि अधिष्ठाने भूतानि च यः पश्येत्स द्रष्टा आततत्वाद्भमातृत्वाद्वात्मा हि परमो हरिरिति तंत्रोक्तेः आत्मनो हरेः सर्वभूतेषु मशकादिष्वपि नियंतृत्वेन वर्तमानस्य भगवद्भावं निरतिशयैश्वर्यमेव यः पश्येत् न तु तस्य तारतम्यं तथात्मनि हरावेव भूतानि च यः पश्येत्कथंभूते भगवति अप्रच्युतैश्वर्यादिस्वरूपेण न तु पुनर्जडमलिनभूताश्रयत्वेन जाड्यादिप्रसक्त्याप्यैश्वर्यादिप्रच्युतिं पश्येत् स सर्वत्र परिपूर्णं भगवत्तत्वं पश्यन् भागवतोत्तम इत्यर्थः ४५ प्रेम च मैत्री च कृपा च उपेक्षा च ता ईश्वरादिषु चतुर्षु यः करोति स म

हरिरुवाच सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः॥ भूतानि भगवत्यात्मन्येष भागवतोत्तमः ४५ ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च॥ प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ४६ अर्चायामेव हरये पूजां यः श्रद्धयेहते॥ न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ४७ गृहीत्वापींद्रियैरर्थान् यो न द्वेष्टि न हृष्यति॥ विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः ४८ देहेंद्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः॥ संसारधर्मैरविमुह्यमानः स्मृत्या हरेर्भागवतप्रधानः ४९ न कामकर्मबीजानां यस्य चेतसि संभवः॥ वासुदेवैकनिलयः स वै भागवतोत्तमः ५०

ध्यमो भागवतः एवंभूतस्य केरस्य दर्शनात् ४६ अर्चायां प्रतिमायां पूजामीहते करोति न तद्भक्तेषु अन्येषु च सुतरां न करोति प्राकृतः प्रकृतिप्रारंभः अधुनैव प्रारब्धभक्तिः शनैः शनैरुत्तमो भविष्यतीत्यर्थः ४७ पुनरपि षड्भिः श्लोकैरभ्यर्हितत्वादुत्तमभागवतस्यैव लक्षणमाह गृहीत्वापीति श्रीवासुदेवाविष्टचित्तो न गृह्णाति तावदिंद्रियैरर्थान्गृहीत्वापीत्यपिशब्दार्थः इदं विश्वं ४८ किंच देहादीनां संसारधर्मैः जन्माप्ययादिभिर्यो हरेः स्मृत्या विमुह्यमानः स भागवतप्रधानः तत्र देहस्य जन्माप्ययौ प्राणस्य क्षुत्पिपासे मनसो भयं बुद्धेस्तर्षस्तृष्णा इंद्रियाणां कृच्छ्रं श्रमस्तैः ४९ कामश्च कर्माणि च बीजानि च वासनास्तेषां वासुदेव एको निलय आश्रयो यस्य एतेन गृहीत्वापीत्यादिश्लोकत्रयेण द्वेषहर्षमोहकामादिरहितश्चरतीति यथा चरतीत्यस्योत्तरमुक्तं ५० येलिंग

मायातत्तरणब्रह्मकर्मप्रश्नचतुष्टये ।। तृतीये तत्तरं तत्र मार्षभैर्मुनिभिः पृथक् १ विष्णोर्मायामिदं पश्यन्नित्युक्तं अतो मायां पृच्छति
परस्येति हि भगवतः २ ननूक्तलक्षणो भागवतो भूत्वा कृतार्थः स्यात् किं बहुप्रश्नैः अत आह नानुतृप्य इति । संसारतापैर्नितरां
तप्तो हृतस्य भेषजं हरिकथामृतरूपं युष्मद्वचो जुषमाणो नानुतृप्यामि २ मायायाः स्वरूपतो निरूपणासंभवात् सृष्ट्यादिका
र्यद्वारेण निरूपयितुमाह एभिरिति । आद्यः पुरुषः यथाशक्त्या भूतानां आत्मा कारणभूतः एभिः स्वसृष्टैर्महाभूतैरुच्चावचा
नि भूतानि ससर्ज एषा माया भगवत इति चरमश्लोकपादस्य प्रतिश्लोकमनुषंगः किमर्थं ससर्ज स्वमात्रात्मप्रसिद्ध्ये । स्वमिमी

राजोवाच परस्य विष्णोरीशस्य मायिनामपि मोहिनीं ।। मायां वेदितुमिच्छामि भगवतो ब्रुवंतु नः १ नानुतृप्ये
जुषन्युष्मद्वचो हरिकथामृतं ।। संसारतापनिष्टप्तो मर्त्यस्तत्तापभेषजं २ अंतरिक्ष उवाच एभिर्भूतानि भू
तात्मा महाभूतैर्महाभुज ।। ससर्जोच्चावचान्याद्यः स्वमात्रात्मप्रसिद्धये ३ एवं सृष्टानि भूतानि प्रविष्टः पंच
धातुभिः ।। एकधा दशधात्मानं विभजन्जुषते गुणान् ४ गुणैर्गुणान्स भुंजान आत्मप्रद्योतितैः प्रभुः ।।
मन्यमान इदं सृष्टमात्मानमिह सज्जते ५ कर्माणि कर्मभिः कुर्वन्सनिमित्तानि देहभृत् ।। तत्तत्कर्मफलं गृ
ह्णन्भ्रमतीह सुखेतरं ६ इत्थं कर्मगतीर्गच्छन्बह्वभद्रवहाः पुमान् ।। आभूतसंप्लवात्सर्गप्रलयावश्नुतेऽवशः ७

ति प्रमिमीते यउपास्ते सः स्वमाता तस्यात्मनो जीवस्य प्रकृष्टाये सिद्धये यद्वा स्वांशभूतानां जीवानां मात्राप्रसिद्ध्ये विषयभोगाय आ
त्मप्रसिद्धये मोक्षाय चेत्यर्थः तदुक्तं वेदस्तुतौ बुद्धींद्रियमनःप्राणान् जनानामसृजत्प्रभुः ।। मात्रार्थं च भावार्थं च आत्मनेकल्पनाय
चेति ३ एवं जीवोपकरणार्थं पंचधातुभिर्महाभूतैः सृष्टानि भूतान्यंतर्यामिरूपेण प्रविष्टः एकधा मनसा दशधा बाह्येंद्रियरूपेण
आत्मानं विभजन्गुणान् तत्तद्विषयान् जुषते जोषयतीत्यर्थः यद्वा तमात्मानं प्रतिगुणान् विभजन्जुषते प्रीयत इत्यर्थः ४ स च जी
वः आत्मना अंतर्यामिणा प्रद्योतितैर्गुणैरिंद्रियैर्गुणान् विषयान् भुंजान इदं सृष्टं शरीरमात्मानं मन्यमान इह शरीरादौ सज्जते ५
कर्मभिः कर्मेंद्रियैः सनिमित्तानि सवासनानि कर्माणि कुर्वन् तत्तत्पूर्वकर्मफलं गृह्णन् अयं देहभृत् भ्रमतीह संसारे न तु मुच्यते कथं सु
ननु भुंजानः कथं सज्जते भुंजानो भोगसंबाधो मुच्यत इति चेत्तत्राह । कर्माणीति ।। ६

[illegible]

यालिंगैर्भगवत्प्रियत्वस्योत्तरमाह नयस्येति। जन्म कुलं कर्म तप आदि जातयः अनुलोमप्रतिलोमजाः मूर्धावसिक्तादयः अस्मि
न्देहे अहंकार[illegible]रहिते सत्कुलकर्मादिलिंगे हरेः प्रियो भवतीत्यर्थः ५१ वित्तेषु स्वीयं परकीयमिति आत्मनि स्वः पर इति
५२ किंच त्रिभुवनविभवहेतवे पि त्रैलोक्यराज्यार्थमपि लवार्धमपि निमिषार्धमपि भगवत्पदारविंदभजनाद्यो न चलति स वैष्णवा
ग्र्यः ननु लवार्धमात्रभजनोपरमे वै तावल्लाभो भवेत् तत्कुतो न चलेत् तत्राह अकुंठस्मृतिः भगवत्पदतोन्यत्सारं नास्तीत्येवंरूपा कुंठा
अनपगता स्मृतिर्यस्य सः भगवत्पदादन्यत्सारं नास्तीति कुतः अत आह अजिते हरावेव आत्मा येषां तथाभूतैः सुरादिभिरपि दुर्लभात्

न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः॥ सज्जतेस्मिन्नहंभावो देहे वै स हरेः प्रियः ५१ न यस्य स्वः पर इति वित्ते
ष्वात्मनि वा भिदा॥ सर्वभूतसमः शांतः स वै भागवतोत्तमः ५२ त्रिभुवनविभवहेतवेप्यकुंठस्मृतिरजितात्मसुरादि
भिर्विमृग्यात्॥ न चलति भगवत्पदारविंदाल्लवनिमिषार्धमपि स वैष्णवाग्र्यः ५३ भगवत उरुविक्रमांघ्रिशाखा यः
नखमणिचंद्रिकया निरस्ततापे॥ हृदि कथमुपसीदतां पुनः स प्रभवति चंद्र इवोदितेर्कतापः ५४ विसृजति हृद
यं न यस्य साक्षाद्धरिरवशाभिहितोप्यघौघनाशः॥ प्रणयरशनया धृतांघ्रिपद्मः स भवति भागवतप्रधान उक्तः॥
५५ इति श्रीभागवते महापुराणे एकादशस्कंधे नारदवसुदेवसंवादे द्वितीयोध्यायः॥ ॥छ॥ ॥ श्रीरामाय

किंतु केवलं विमृग्यात् तदपेक्षया सर्वस्य तुच्छत्वस्मरणं यो न चलतीत्यर्थः ५३ अपि च विषयाभिसंधिना चलनं कामेन तापे सति
भवेत् स तु भगवत्सेवानिर्वृतो न संभवतीत्याह भगवत इति उरुविक्रमो वतो अंघ्री तयोः शाखा अंगुलयस्तासु नखा एव तानि म
णयस्तेषां चंद्रिका शीतलादीप्तिस्तया निरस्तः कामादितापो यस्मिंस्तस्मिन्नुपसीदतां भजतां हृदि कथं पुनः स तापः प्रभवति चंद्र
इवोदिते सति अर्कस्य तापइव न यस्य स्वः पर इत्यादिना श्लोकत्रयेण याद्वैते प्रत्यस्योत्तरमुक्तं वेदितव्यं। यदुक्तं त्वस्य च हरिनामानी
तिज्ञातव्यं ५४ उक्तसमस्तलक्षणसारमाह विसृजतीति हरिरेव स्वयं साक्षात् यस्य हृदयं न विसृजति न मुंचति कथंभूतः अवशेना
प्यभिहितमात्रोपि अघौघं नाशयतीति सः तत्किं न विसृजति यतः प्रणयरशनया धृतं हृदये निबद्धमंघ्रिपद्मं यस्य सः भागवतप्रधा
न उक्तो भवति ५५ इति भा० वार्थदी० ए० ना० द्वितीयोध्यायः॥ ॥

एवंमायामयींसृष्टिमुक्त्वाप्रलयंदर्शयितुमारभतेधातुरितिनाममहाभूतानामुपप्लवेनाशहेतौआसन्नेअव्यक्तंकार्यद्रव्यंस्थूलंगुणंसूक्ष्मं
तदात्मकंअव्यक्तायअव्यक्तंप्रतिनेतुमाकर्षति ८ नाशहेतुंनाहशतवर्षेतितस्मिन्कालेउपचितश्चासौउष्णश्चासावर्कश्चयद्रुतेनका
लेनोपचितमूष्णत्वंयस्यसः ९ ऊर्ध्वशिखंऊर्ध्वज्वालः विष्वक्परितः १० संवर्तकःप्रलयकर्ताधाराभिः ननुबिन्दुभिः हस्तिहस्ताभिः
स्तावमाणाभिः ११ ततउपाधिलयाद्विराजःपुरुषोऽव्यक्तंकारणंप्रविशति।ननुब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे।परस्यांतेकृतात्मा
नःप्रविशंतिपरंपदमितिस्मृतेः यावदधिकारमवस्थितिरधिकारिणामितिन्यायाच्चवैराजशब्दाभिधेयस्यब्रह्मणःपरमभागवतत्वा

धातूपप्लवआसन्नेव्यक्तंद्रव्यगुणात्मकं॥अनादिनिधनःकालोह्यव्यक्तायापकर्षति ८ शतवर्षाह्यनावृष्टिर्भविष्य
त्युल्बणाभुवि॥तत्कालोपचितोष्णार्कोलोकांस्त्रीन्प्रतपिष्यति ९ पातालतलमारभ्यसंकर्षणमुखानलः॥
दहन्नूर्ध्वशिखोविष्वग्वर्धतेवायुनेरितः १० संवर्तकोमेघगणोवर्षतिस्मशतंसमाः॥धाराभिर्हस्तिहस्ताभिर्ली
यतेसलिलेविराट् ११ ततोविराजमुत्सृज्यवैराजःपुरुषोनृप॥अव्यक्तंविशतेसूक्ष्मंनिरिंधनइवानलः १२
वायुनाहृतगंधाभूःसलिलत्वायकल्पते॥सलिलंतद्धृतरसंज्योतिष्ट्वायोपकल्पते १३ हृतरूपंतुतमसावायौ
ज्योतिःप्रलीयते॥हृतस्पर्शोविकाशेनवायुर्नभसिलीयते १४

न्मोक्षएवसंगच्छतेनान्येषामिवकारणमात्रप्रवेशःसत्यंअश्वमेधादिनासत्यलोकंगतानामपिभक्तानामावृत्तिश्रवणादभक्तोले
ब्रह्मणोपिप्रकृतौलयःपुनरुत्पत्तिश्चेतिमोक्षश्चोलभ्यस्तुवनायैवमुक्तमित्यविरोधः यद्वात्रेनापिप्रमाणेनैव्यत्नतइत्यव्यक्तेब्रह्मणिप्रवे न
तत्प्रवेशेननमोक्षएवोक्तइतिद्रष्टव्यं १२ एवंविराजोलयमुक्त्वातत्कारणानांमहदादिपृथिव्यंतानांप्रातिलोम्येनलयमाहवायु
नेति।वायोर्हिगंधरसहारित्वंप्रसिद्धंसांवर्तकेनवायुनाहृतगंधाअतएवगंधस्यव्यावर्तकस्यगतत्वात्सलिलत्वायकल्पतेस
लिलेलीयतइत्यर्थः तच्चतरसंतेनैववायुनैवहृतोरसोयस्यतत् १३ तमसश्चरूपतिरस्कारित्वंप्रसिद्धंसांवर्तिकेनतमसा।अवकाशेन
आकाशेनस्वकार्येण १४ श्रीगोपालायनमः ॥

कालात्मना शरदस्य हि कालस्त एव नाशः प्रसिद्धः तद्रूपेणात्मनाईश्वरेण आत्मनि तामसाहंकारे । इंद्रियाणि बुद्धिश्च राजसाहं
कारे मनो वैकारिकैर्देवैः सह सात्विकाहंकारे एवं त्रिविधैः स्वगुणैः स्वकार्यैः सहितः अहं अहंकारः आत्मनि महति स च प्रकृता
विति द्रष्टव्यं १५ त्रिवर्णा त्रिगुणा माया श्रवणभीतेरज्ञाने तन्निवृत्त्युपायश्रवणे स्वच्छंदयति किं भूय इति १६ एवमनुकंपि
तस्तन्निवृत्त्युपायमेव पृच्छति यथैतामिति यद्यपि तन्मायया तो बुध आभजेत्तमिति भक्तिस्तत्तारकत्वेनोक्तैव तथापि किं भक्तिरे
व अन्योपि वा तत्रोपायोस्ति । तज्ज्ञासुः पुनः प्रश्नः अकृतात्मभिः अवशीकृतांतःकरणैः स्थूलधियः स्थूले शरीरे अहंधीर्येषां ते १७

कालात्मना हृतगुणं नभ आत्मनि लीयते ॥ इंद्रियाणि मनो बुद्धिः सह वैकारिकैर्नृप ॥ प्रविशंति ह्यहंकारं स्वगुणै
रहमात्मनि १५ एषा माया भगवतः सर्गस्थित्यंतकारिणी ॥ त्रिवर्णा वर्णितास्माभिः किं भूयः श्रोतुमिच्छसि १६
राजोवाच यथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः ॥ तरंत्यंजः स्थूलधियो महर्ष इदमुच्यतां १७ प्रबुद्ध उवाच
कर्माण्यारभमाणानां दुःखहत्यै सुखाय च ॥ पश्येत्पाकविपर्यासं मिथुनीचारिणां नृणां १८ नित्यार्तिदेन वि
त्तेन दुर्लभेनात्ममृत्युना ॥ गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः १९ एवं लोकं परं विद्यान्नश्वरं कर्मनिर्मितं ॥
सतुल्यातिशयध्वंसं यथा मंडलवर्तिनां २०

भक्तिव्यतिरेकेण नास्ति अन्य उपाय इत्यभिप्रेत्य भक्तिमेव ससाधनां निरूपयति । तत्र प्रथमं वैराग्यद्वारा गुरूपसत्तिमाह चतुर्भिः कर्मा
णीति दुःखहत्यै सुखप्रतीकाराय पाकविपर्यासं फलवैपरीत्यं मिथुनीचारिणां मिथुनीभूय प्रवर्तमानानां १८ कर्मभिः साधि
ता अपि वित्तादयो न सुखहेतव इति च पश्येदित्याह नित्यार्तिदेनेति । आत्मनः स्वस्य मृत्युरूपेण चलैः अनित्यैः अपायिभिः १९
एवं लोकं परमिति । कर्मनिर्मितत्वान्नश्वरं । तथा च श्रुतिः । तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीय
त इति । किं च वर्तमानसमयेपि दुःखयुक्तं पश्येदित्याह । सतुल्यातिशयध्वंसं सह तुल्येन अतिशयेन ध्वंसेन च वर्तमानं अतस्तु
ल्यैः स्पर्धा अतिशये असूया ध्वंसाच्च भयादिकं चापरिहार्यमित्यर्थः यथा खंडमंडलपतीनां मिथः स्पर्धादि तद्वत् २०

उत्तमं श्रेयो ज्ञातुमिच्छुः शाब्दे ब्रह्मणि वेदाख्ये न्यायतो निष्णातं तं तु तत्त्वज्ञं। अन्यथा संशयनिरासकत्वायोगात्। परे च ब्रह्मण्यपरो
क्षानुभवेन निष्णातं। अन्यथा संबोधसंचारायोगात्। परब्रह्मणि निष्णातत्वद्योतकमाह उपशमाश्रयमिति २१ गुरुरेवा
त्मा दैवतं च यस्य सः अनुवृत्त्या सेवया यैर्धर्मैः। वस्तुतः आत्मा आत्मप्रदः स्वोपासकानां। यथा बलिप्रभृतीनां २२ यथोचितमि
ति हीनेषु दयां समेषु मैत्रीं उत्तमेषु प्रश्रयं च शिक्षेदित्यर्थः २३ शौचं बाह्यं मृज्जलादिभिः आभ्यंतरं चादंभामानादि शिक्षेत
तपः स्वधर्माचरणं। तितिक्षां क्षमां। मौनं वृथा वाचामनुच्चारणं स्वाध्यायं अधिकारानुरूपं वेदपाठादिकं आर्जवं च छ तां

तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमं॥ शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयं २१ तत्र भागवतान्धर्मान्
शिक्षेद्गुर्वात्मदैवतः॥ अमायया नुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः २२ सर्वतो मनसोसंगमादौ संगं च साधुषु॥ द
यां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितं २३ शौचं तपस्तितिक्षां च मौनं स्वाध्यायमार्जवं॥ ब्रह्मचर्यमहिंसां च सम
त्वं द्वंद्वसंज्ञयोः २४ सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेततां॥ विविक्तचीरवसनं संतोषं येन केनचित् २५ श्र
द्धां भागवते शास्त्रे निंदामन्यत्र चाप्यपि॥ मनोवाक्कर्मदंडं च सत्यं शमदमावपि २६

ब्रह्मचर्यं यस्य यादृगुचितं ऋतुस्वदारनियमादि अहिंसां भूतेष्वद्रोहं द्वंद्वसंज्ञयोः शीतोष्णसुखदुःखादिरूपयोः समत्वं हर्षवि
षादराहित्यं २४ आत्मेश्वरान्वीक्षां सविद्रूपेणात्मेक्षां नियंतृरूपेणेश्वरान्वीक्षां च कैवल्यमेकांतशीलत्वं अनिकेततां गृहाद्य
भिमानराहित्यं विविक्तचीरवसनं विजनपतितानां वस्त्रखंडानां कुशानां वा वल्कलानां वा परिधानं २५ भागवते भगवत्प्रति
पादके। अन्यत्र शास्त्रादौ या अनिंदा तां मनसः प्राणायामैः वाचो मौनेन कर्मणो निरीहया दंडो। सत्यं यथार्थभाषणं। शमदमौ
अंतःकरणबाह्येंद्रियनिग्रहौ २६ श्रीगोपालाय नमः श्रीकृष्णाय नमः श्रीरामभद्राय नमः श्रीरामाय नमः॥

हरेर्जन्मकर्मगुणानां श्रवणादि तदर्थे हर्युद्देशेन सर्वं कर्म विशेषतश्च यज्ञादि यत् तदर्थं शिक्षेत् २७ इष्टं दत्तमित्यादयो भावे
निष्ठाः वृत्तं सदाचारः आत्मनः प्रियं गंधपुष्पादि दारादीनप्यालक्ष्य परस्मै परमेश्वराय निवेदनं तत्सेवकतया समर्पणं यत्त
तत् शिक्षेत् २८ कृष्ण एवात्मा नाथश्च येषां। कृष्ण आत्मनो जीवस्य नाथो येषामिति वा तेषु। उभयत्र स्थावरे जंगमे च
या परिचर्या तां विशेषतो नृषु। तत्रापि साधुषु स्वधर्मशीलेषु ततोपि महत्सु श्रीभागवतेषु २९ तैश्च सह संगम्य यत्पाव
नं भगवद्यशः। तस्य परस्परानुकथनं शिक्षेत्। यद्वा यशः प्रति तत्र संस्पर्धादि परित्यागेन मिथो या रतिः रमणं या च तुष्टिः सु

श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः॥ जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितं २७ इष्टं दत्तं तपो जप्तं वृत्तं
यच्चात्मनः प्रियं॥ दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनं २८ एवं कृष्णात्मनाथेषु मनुष्येषु च
सौहृदं॥ परिचर्यां चोभयत्र महत्सु नृषु साधुषु २९ परस्परानुकथनं पावनं भगवद्यशः॥ मिथो रति
र्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ३० स्मरंतः स्मारयंतश्च मिथोऽघौघहरं हरिं॥ भक्त्या संजातया भक्त्या
बिभ्रत्युत्पुलकां तनुं ३१ क्वचिद्रुदंत्यच्युतचिंतया क्वचिद्धसंति नंदंति वदंत्यलौकिकाः॥ नृत्यंति गायंत्यनु
शीलयंत्यजं भवंति तूष्णीं परमेत्य निर्वृताः ३२ इति भागवतान्धर्मान् शिक्षन्भक्त्या तदुत्थया॥ नाराय
णपरो मायामंजस्तरति दुस्तरां ३३ श्रीरामाय नमः॥

खं पापनिवृत्तिः समस्तदुःखनिवृत्तिः तां च शिक्षेत् ३०
एवं वर्तमानानां परमानंदप्राप्तिमाह स्मरंत इति द्वाभ्यां। भक्त्या साधनभक्त्या संजातया प्रेमलक्षणया भक्त्या ३१ अजं हरिं अनुशी
लयंति तल्लीलां अभिनयंति एवं परमेत्य प्राप्य निर्वृताः संतस्तूष्णीं भवंति ३२ उपसंहरति इतीति भागवतधर्मोत्पन्नया भक्त्या
३३ श्रीगोपालाय नमः श्रीकृष्णाय नमः श्रीरामचंद्राय नमः श्रीवासुदेवाय नमः श्रीरामाय नमः श्रीरामाय॥

१५ शब्दोपीति। शब्दोपि आत्ममूलं आत्मनि प्रमाणं सत् अर्थोक्तं अर्थादुक्तं यथा भवति तथाह न तु साक्षात् कुतः बोधकनिषेधतया स्वस्यैव बाधकस्य निषेधरूपत्वात्

नारायणपरो मायामंतरतीत्युक्ते पृच्छति नारायणाभिधानस्येति। निष्ठां स्वरूपं अयं भावः ब्रह्मैव तत्त्ववन्नारायण इति भगवत्वा
नू नितिपरमात्मेति चोच्यते। तदुक्तं। वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यत इति तथा ना
रायणो भगवतीति तदिदं विश्वमाहितं गृहीतं मायोरुगुणः सर्गादावगुणः स्वतः इत्यादिषु ३४ तत्र किमेभिः शब्दैः निर्विशेषं
तदेव वस्तूच्यते अस्ति वा कोपि विशेषोस्तीति अत्रोत्तरं स्थित्युद्भवेति। अयमर्थः अस्य विश्वस्य स्थित्युद्भवप्रलयानां हेतुः स्व
यं च अहेतुः हेतुरहितः स नारायण इति परमं मेव तत्त्वमवेहि स्वप्नजागरसुषुप्तिषु सत् अनुवर्तमानं सत्वक्ष्यति सतुरीयं त्रिषु सत

राजोवाच नारायणाभिधानस्य ब्रह्मणः परमात्मनः॥ निष्ठामर्हथ नो वक्तुं यूयं हि ब्रह्मवित्तमाः ३४ श्रीपि
प्पलायन उवाच स्थित्युद्भवप्रलयहेतुरहेतुरस्य यत्स्वप्नजागरसुषुप्तिषु सद्बहिश्च। देहेंद्रियासुहृदयानि
चरंति येन संजीवितानि तदवेहि परं नरेंद्र ३५ नैतन्मनो विशति वागुत चक्षुरात्मा प्राणेंद्रियाणि च यथानलमर्चि
षः स्वाः॥ शब्दोपि बोधकनिषेधतयात्ममूलमर्थोक्तमाह यदृते न निषेधसिद्धिः ३६

तमिति बहिश्च समाध्यादौ च तत्तद्ब्रह्मेति परमेव तत्त्वमवेहि देहेंद्रियप्राणमनांसि येन संजीवितानि संति चरंति प्रवर्तंते तत्परमात्मेति परमे
व तत्त्वमवेहि एवं लक्षणस्य देनारायणादिनामाभिरुच्यमानमपि परमेकमेव तत्त्वं जानीहि ३५ अवेहीत्यनेन विषयत्वं प्राप्तं निषेध
ति नैतदिति। एतत्परं तत्त्वं मनो न विशति न विषयीकरोति वागुत वागपि चक्षुश्च आत्मा बुद्धिश्च प्राणश्च क्रियाशक्त्या न प्राप्नोति अन्यानि
चेंद्रियाणि यथानलं स्वाः स्वांशभूता अर्चिषो विस्फुलिंगादयः न प्रकाशयंति न दहंति च तथा। तदुक्तं मुमनआदिवृत्तिभिर्व्यज्यमानस्या
त त्मप्रकाशस्य नतेन हि प्रकाशकस्य न तत्प्रकाशविषयत्वं प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुरि
ति तथा यतो वाचो निवर्तंते॰ सहेत्यादिश्रुतेः ननु तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुतेः शब्दगोचरत्वं प्रतीयते तत्राह यतो वाचो निवर्तंते अ
प्राप्य मनसा सह यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि यन्मनो न मनुते न चक्षुषा पश्यतीत्यक्षनेन मित्यादिश्रुतेः ननु तर्हि ने
वाह श्रुतिः किमिदमुच्यते अर्थोक्तमिति तत्राह यदृते इति अथात आदेशो नेति नेति अस्थूलमनण्वित्यतो वाचो निवर्तंते यद्वाचान

ननु तर्हि प्रमाणाविषयत्वान्नास्ति ब्रह्मेति प्रसज्यते अत आह सत्त्वमिति। सत्तत्स्थूलं कार्यं असत्तत्सूक्ष्मं कारणं तत्सर्वं ब्रह्मैव भाति कुतः
यद्यस्मात्तयोः सदसतोः कारणं कार्यं कारणाद्भिन्नं न भवति वाचारंभणमिति श्रुतेः। ननु कथमेकं बहुविधस्य कारणं तत्राह उरुशक्ति
अनेकशक्तिमत् उरु ४ परं ५ महती मायालक्षणा शक्तिर्यस्य तदित्येवा बहुधा भानमेवं दर्शयति आदौ यदेकं ब्रह्म तदेव सत्त्वं रजस्तम
इति त्रिवृत्प्रधानं प्रवदंति ततः क्रियाशक्त्या सूत्रं ज्ञानशक्त्या महानिति तदेव प्रवदंति ततः अहमिति जीवं जीवोपाधिमहंकारं तदेव प्रवद
ति तत्स्वज्ञानक्रियार्थफलरूपतया ज्ञानशब्देन देवताः क्रियाइंद्रियाणि अर्थाः विषयाः फलं तत्प्रकाशः सुखादि वा तद्रूपतया ब्रह्मैव भाति धि

सत्त्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवदंति जीवम्॥ ज्ञानक्रियार्थफलरूपतयोरुशक्ति ब्रह्मैव भा
ति सदसच्च तयोः परं यत् ३७ नात्मा जजान न मरिष्यति नैधतेसौ न क्षीयते सवनविद्व्यभिचारिणां हि॥ सर्वत्र श
श्वदनपाय्युपलब्धिमात्रं प्राणो यथेंद्रियबलेन विकल्पितं सत् ३८

नहि सर्वस्वरूपेण स्वतोभासमानस्य ब्रह्मणः स्वसिद्धौ प्रमाणांतरापेक्षेति भावः ३७ ननु सर्वात्मकं चेद्ब्रह्म तर्हि सर्वस्यका
र्यस्य जन्मादिविकारवत्त्वाद्ब्रह्मणोपि तत्प्रसंगः स्यात् अत आह नात्मेति। आत्मा ब्रह्म न जजान न जातः जन्माभावादेव तदनंतरास्तिता
लक्षणोपि विकारो नास्ति नैधते न वर्धते वृद्ध्यभावादेव विपरिणामोपि निरस्तः कुतः हि यस्माद्व्यभिचारिणां आगमापायिनां बाल
युवादिदेहानां सवनवित् तत्कालद्रष्टा न ह्यवस्थावतां द्रष्टा तदवस्थो भवतीत्यर्थः। ननु निरवस्थः कोसावात्मा अत आह उपलब्धि
मात्रमिति नन्वायातं तर्हि क्षणिकत्वं नेत्याह सर्वत्रेति। सर्वत्र देशे शश्वत्सर्वदा अनपायि अनुवर्तमानं ननु नीलज्ञानं जातं पीतज्ञानं
न नष्टमिति प्रतीतेर्ज्ञानस्यानपायित्वं अत आह इंद्रियबलेनेति सदेव ज्ञानं इंद्रियबलेन विविधं कल्पितं नीलाद्याकारावृत्त्या ए राम
व जायते नश्यति न ज्ञानमिति भावः व्यभिचारित्वे व्यभिचारे दृष्टांतः प्राणो यथेति ३८ श्रीरामचंद्राय नमः श्रीराम॥ २२

दृष्टांतं विवृण्वन्निंद्रियादिलयेन निर्विकारात्मोपलब्धिं दर्शयति अंडेष्विति। पेशिषु जरायुजेषु तरुषु अविनिश्चितेषु स्वेदजेषु उप
धावति अनुवर्तते। एवं दृष्टांतेन निर्विकारत्वं प्रदर्श्य दार्ष्टांतिकेऽपि दर्शयति। कथं तर्हि देवात्मा सविकार इति प्रतीयते। यद्यदा जाग्रदिंद्रियगणः
यदा च स्वप्ने तत्संस्कारवानहंकारः यदा तु प्रसुप्ते तदा तस्मिन् प्रसुप्ते इंद्रियगणे सन्ने लीने अहमि च अहंकारे च सन्ने कूटस्थः निर्विकार एवा
त्मा कुतः आशयमृते लिंगशरीरमुपाधिं विना विकारहेतोरुपाधेरभावादित्यर्थः ननु अहंकारपर्यंतस्य सर्वस्य लये शून्यमेवावशिष्येत
कथं तदा कूटस्थ आत्मा अत आह तदनुस्मृतिर्नः तस्य विशेषज्ञानशून्यस्य सुखात्मनः सुषुप्तिसाक्षिणः स्मृतिर्नः अस्माकं भवति।
एतावंतं कालं सुखमहमस्वाप्सं न किंचिदवेदिषमिति अतो ननुभूतस्यास्मरणादस्त्येव सुषुप्तावात्मानुभवः विषयसंबंधाभावात्तु नस्

अंडेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र॥ सन्ने यदिंद्रियगणेहमि च प्रसुप्ते कूटस्थ आश
यमृते तदनुस्मृतिर्नः ३९ यर्ह्यब्जनाभचरणैषणयोरुभक्त्या चेतोमलानि विधमेद्गुणकर्मजानि। तस्मिन्विशुद्ध उपल
भ्यत आत्मतत्त्वं साक्षाद्यथामलदृशोः सवितृप्रकाशः ४० राजोवाच कर्मयोगं वदत नः पुरुषो येन संस्कृतः॥ विधूये
हाशु कर्माणि नैष्कर्म्यं विंदते परं ४० श्रीरामभद्राय नमः

फुरतीति भावः तथा च श्रुतिः यद्वै तन्न पश्यति पश्यन्वै तद्द्रष्टव्यं न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति ३९ ननु यदि सुषुप्तौ कू
टस्थ आत्मानुभवो भवेत् कथं पुनरपि संसारः स्यात् अविद्यातत्संस्काराणां विद्यमानत्वादिति चेत् कुतस्तर्हि निवर्तकोऽनुभवो भवेत् अ तं
त आह यर्हीति त्रिविधैषणादि विहाय केवलमब्जनाभस्यैव चरणैषणया या उरुभक्तिस्तया पुमान् चेतसो मलानि विधमेत् नाशयेत् चेतएव
वा कर्तृत्वगतानि मलानि तदा भक्त्या क्षालये तदा तस्मिन्विशुद्धे चेतसि सति साक्षादव्यवधानेनात्मतत्त्वमुपलभ्यते अमलयोर्दृशोः
सत्सोर्यथा पूर्वमेव सिद्धः सवितृप्रकाश इति ४० भक्तेः कर्मयोगाधीनत्वात्पृच्छति कर्मयोगमिति नैष्कर्म्यं कर्मनिवृत्तिसाध्यं
ज्ञानं ४१ श्रीगोपालाय नमः श्रीवासुदेवाय नमः श्रीरामचंद्राय नमः श्रीकृष्णाय नमः श्रीरामो जयति ॥ ॥

प्रश्नांतरमाह एवमिति। प्रश्नं प्रष्टव्यमर्थं पितुरिक्ष्वाकोः ब्रह्मणः पुत्राः सनकादयः सर्वज्ञा अपि नाब्रुवन् ४२ गहनत्वद्योतनाय प्रथमं द्विती
यप्रश्नस्योत्तरमाह कर्मेति। कर्म विहितं अकर्म तद्विपरीतं निषिद्धं विकर्म विगतं कर्म विहिताकरणं एतत्त्रयं वेदवादः वेदैकगम्यं न लौकिकं
वेदस्येश्वरात्मत्वात् ईश्वरादुद्गतत्वात् अपौरुषेयत्वादित्यर्थः पुंवाक्ये हि वक्तुरभिप्रायतोऽर्थज्ञानं तत्स्यात् अपौरुषेये तु केवलं वाक्यपौर्वापर्यप
वतात्पर्यावधारणं तद्दुष्करमिति तत्र कर्मादौ विद्वांसोऽपि मुह्यन्ति किमुतान्ये अतस्त्वत्तनया बालत्वान्नैवाब्रुवन्निति ४३ दुर्विज्ञेयं वेदतात्प
र्यमाह परोक्षवाद इति। यच्चान्यथा स्थितोऽर्थः स गोपयितुमन्यथा कृत्वोच्यते। स परोक्षवादः तथा च श्रुतिः तं वा एतं चतुर्होतारं संतं चतुर्होतेत्याच
क्षते परोक्षेण परोक्षप्रिया इव हि देवा इति। परोक्षवादत्वमेवाह कर्ममोक्षायेति न तु स्वर्गाद्यर्थं कर्माणि विधत्ते न कर्ममोक्षार्थं तत्राह बाला

एवं प्रश्नमृषीन्पूर्वमपृच्छत्पितुरंतिके॥ नाब्रुवन् ब्रह्मणः पुत्रास्तत्र कारणमुच्यतां ४२ आविर्होत्र उवाच कर्माकर्म
विकर्मेति वेदवादो न लौकिकः॥ वेदस्य चेश्वरात्मत्वात्तत्र मुह्यंति सूरयः ४३ परोक्षवादो वेदोऽयं बालानामनुशास
नं॥ कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा ४४ नाचरेद्यस्तु वेदोक्तं स्वयमज्ञोऽजितेंद्रियः॥ विकर्मणा ह्यधर्मेण मृ
त्योर्मृत्युमुपैति सः ४५

नामनुशासनं यथा भवति तथा अत्र दृष्टांतः अगदमौषधं यथा पिता बालमगदं पाययन् खंडलड्डुकादिभिः प्रलोभयन्पाययति ददा
ति च तानि नैतावता गदपानस्य तल्लाभः प्रयोजनं अपि त्वारोग्यं। तथा वेदोऽप्यवांतरफलैः प्रलोभयन् कर्ममोक्षायैव कर्माणि वि
धत्ते ४४ ननु कर्ममोक्षश्चेत्पुरुषार्थस्तर्हि प्रथममेव कर्म त्याज्यं तं अतआह नाचरेदिति अजितेंद्रियत्वादज्ञः स्वयं आलस्यादिना य
दि नाचरेत्तर्हि विकर्मणा कर्मानाचरणलक्षणेनाधर्मेण मृत्योरनंतरं मृत्युमेव प्राप्नोति तथा च श्रुतिः मृत्वा पुनर्मृत्युमापद्यते अर्द्यमा
नः स्वकर्मभिरिति ४५ श्रीगोपालाय नमः श्रीरामचंद्राय नमः श्रीकृष्णाय नमः श्रीरामो जयति श्रीवासुदेवाय॥

तस्माद्वेदोक्तमेव कुर्वाणो ननु निषिद्धं न तु फलस्य श्रुत्युक्तत्वात्कर्मणि क्रियमाणे तस्मिन्नासक्तिस्तत्फलं वस्यान्न तु नैष्कर्म्यरूपा सिद्धिरत
आह निःसंगः अनभिनिवेशाद्वाचाद्वेश्वरेऽर्पितं न तु फलोद्देशेन। ननु फलस्य श्रुतत्वात्कर्मणि कृते फलं भवेदेव न रोचनार्थेति। कर्मणि रुच्युत्पा
दनार्थं अगदपाने खंडलड्डुकादिवत् ततश्च कर्माभिरुच्या वेदार्थं सम्यग्विचारयति। तदा च। यो वा अक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स योवाएतत्
कृपण इत्यनात्मज्ञस्य कृपणतां तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चेति यज्ञादीनां ज्ञानशेष
तां चावधार्य निष्कामेषु कर्मसु प्रवर्तते ततश्च स्वर्गकामो यजेतेत्यादिभिः कामितस्यैव स्वर्गादेः फलत्वेनावगमाद् कामितो सौ न भवतीति नैष्क
र्म्यसिद्धिर्भवतीति भावः ४६ वैदिकं कर्मयोगमुक्त्वा तांत्रिकमाह य आश्विति। परात्मनः परस्यैव सत आत्मनो जीवस्य हृदयग्रंथिमहंकारवं

वेदोक्तमेव कुर्वाणो निःसंगोऽर्पितमीश्वरे। नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः ४६ य आशु हृदयग्रंथिं निर्जिहीर्षुः प
रात्मनः॥ विधिनोपचरेद्देवं तंत्रोक्तेन च केशवं ४७ लब्ध्वानुग्रह आचार्यात्तेन संदर्शितागमः॥ महापुरुषमभ्यर्चेन्मूर्त्याभिम
तयात्मनः ४८ शुचिः संमुखमासीनः प्राणसंयमनादिभिः॥ पिंडं विशोध्य संन्यासकृतरक्षोर्चयेद्धरिं ४९ अर्चादौ हृद
ये चापि यथालब्धोपचारकैः॥ द्रव्यक्षित्यात्मलिंगानि निष्पाद्य प्रोक्ष्य चासनं ५० पाद्यादीनुपकल्प्याथ संनिधाप्य समा
हितः॥ हृदादिभिः कृतन्यासो मूलमंत्रेण चार्चयेत् ५१

थ निर्हर्तुमिच्छुः सः तंत्रोक्तेन च विधिना प्रकारेण भजेत् तंत्रमागमः चकाराद्वैदिकेन सह समुच्चयमाह ४७ तमेव विधिमाह लब्ध्वानुग्रह इत्या
दिना तेनाचार्येण संदर्शित आगमः अर्चनप्रकारो यस्य सः ४८ मूर्तेः संमुखमासीनः आदिशब्देन भूतशुद्ध्यादि पिंडं देहं विशोध्य संन्यासैः स
द्वन्न्यासैः कृता रक्षा येन सः ४९ अर्चादौ च द्रव्याणि पुष्पादीनि जंत्वादिशोधनेन क्षितिं संमार्जनादिना आत्मानमव्यग्रतया लिंगं मूर्तिं अनुलेप
क्षालनादिना निष्पाद्य योग्यानि कृत्वा ५० पाद्यादिपात्राण्युपकल्प्य संनिधाप्य हृदि संपूजित श्रीमूर्तेर्ध्यात्वा हृदादिभिर्हृदयशिरःशिखा
कवचनेत्रास्त्रमंत्रैः मूलमंत्रेण चदेवे कृतन्यासो मूलमंत्रेणार्चयेत् ५१ श्रीरामभद्राय नमः श्रीकृष्णाय नमः श्रीरामो जयति

अंगानि हृदयादीनि उपांगानि सुदर्शनादीनि तत्सहितां सपार्षदां सपरिवारां कैरुपचारैरर्चयेत् तदाह पाद्येति आद्यशब्देन मधुपर्कमाचमनं च
५२ अक्षतास्तिलकालंकारे न तु पूजायां। नाक्षतैरर्चयेद्विष्णुं न केतक्या महेश्वरमिति निषेधात् ।उपहारैर्नैवेद्यैः ५३ शेषां निर्माल्यं स्वधा
म्नि स्वस्थाने देवं हृदि मूर्तिं करंडके उद्वास्य स्थापयित्वा पूजाविधिं समापयेदिति शेषः ५४ तांत्रिकं कर्मयोगमुपसंहरति एवमिति ५५
॥ ॥इति एकादशे तृतीयः॥ ॥ ॥ चतुर्थे त्ववतारेहा प्रश्नस्योत्तरमुक्तवान्॥ जयंतिनंदनो नाम्ना द्रुमिलो नवसत्तमः १ मूर्त्याभिमतया
त्मनः इति अनेनात्मनः प्रियमवतारं पूजयेदित्युक्तेऽवतारज्ञानमपेक्षितं तथा स्तवैः स्तुत्वा नमेद्धरिमित्युक्ते गुणकर्मज्ञानं चापेक्षितं अतः

सांगोपांगां सपार्षदां तां तां मूर्तिं स्वमंत्रतः॥ पाद्यार्घ्याचमनीयाद्यैः स्नानवासोविभूषणैः ५२ गंधमाल्याक्षतस्रग्भिर्धू
पदीपोपहारकैः॥ सांगं संपूज्य विधिवत्स्तवैः स्तुत्वा नमेद्धरिं ५३ आत्मानं तन्मयं ध्यायन्मूर्तिं संपूजयेद्धरेः॥ शेषामाधा
य शिरसा स्वधाम्न्युद्वास्य सत्कृतं ५४ एवमग्न्यर्कतोयादावतिथौ हृदये च यः॥ यजतीश्वरमात्मानमचिरान्मुच्यते हि सः
५५ ॥ ॥इति श्रीभागवते महापुराणे एकादशस्कंधे तृतीयोध्यायः॥ ॥ ॥ राजोवाच यानि यानीह कर्माणि यैर्यैः
स्वच्छंदजन्मभिः॥ चक्रे करोति कर्ता वा हरिस्तानि ब्रुवंतु नः १ द्रुमिल उवाच यो वा अनंतस्य गुणाननंताननुक्रमिष्यन्स तु
बालबुद्धिः॥ रजांसि भूमेर्गणयेत्कथंचित्कालेन नैवाखिलशक्तिधाम्नः २ भूतैर्यदा पंचभिरात्मसृष्टैः पुरं विराजं विर
चय्य तस्मिन्॥ स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः ३

ष्यति मानि यानीति कर्ता करिष्यति १ त्वया पृष्टानि कालत्रयसंबंधिसकलावतारगुणकर्माणि कथयितुमशक्यानि संक्षेपतस्तु कानि
चित्कथयिष्यामीत्याह यो वा इत्यादिना अनंतस्य गुणाननुक्रमिष्यन् गणयितुमिच्छति यः स तु बालानामिव बुद्धिर्यस्य सः मंदमतिः कालेन महता कोपि महा
मतिः रजांसि गणयेदपि अखिलशक्तिधाम्नः सर्वशक्त्याश्रयस्य भगवतो गुणांस्तु नैव गणयेत्। तथा च श्रुतिः॥ विष्णोर्नु कं वीर्याणि प्रवोचं
यः पार्थिवानि विममे रजांसीत्यादि २ तत्रादौ पुरुषावतारमाह भूतैरिति यदा स्वसृष्टैर्भूतैर्विराजं ब्रह्मांडं पुरं निर्माय तस्मिन् लीलया प्रवि
ष्टः न्स्तु[illegible] कृत्वेन प्रभूतपुण्यं जीवस्य तत्र भोक्तृत्वात् ३ श्रीरामभद्राय नमः श्रीगोपालाय नमः श्रीवासुदेवाय नमः श्रीराम
स्य

अस्य गुणकर्माण्याह द्वाभ्यां येन यत्काय इति यस्याधिष्ठेयः काय एषः कायइति सप्तमी वा। तनुभृतां समष्टिव्यष्टिजीवानां ज्ञानकर्मेंद्रियाणि य
स्य स्वतः स्वरूपभूतात् सत्वात् तनुभृतां ज्ञानं यस्य स्वतः सिद्धं ज्ञानमिति वा। यस्य श्वसनतः प्राणात् बलं देहशक्तिः ओजः इंद्रियशक्तिः ईहा क्रिया
यस्य सत्वादिभिर्विग्रहस्थितिलयोद्भवे आदिकर्ता आदिकर्तृत्वमनेन न तु स्वयं कर्तृत्वमपि समुच्चितं ४ तद्दर्शयितुं गुणावतारद्वारा चराचर सृष्ट्या
दिकर्तृत्वमाह आदाविति। यस्येत्यनुषंगः यस्य रजसा अस्य जगतः सर्गः कार्य इति तथ निर्श्रलाभूत् स्थितौ तु विष्णुः यस्य सत्वेन निरोधः क्रतुप
तिः तत्फलदाता द्विजातीनां च धर्माणां च सेतुः पालक इत्यर्थः यस्य तमसा अस्याप्ययाय रुद्रो ऽभूत् इति एते ब्रह्मादिभिः निमित्तभूतैः प्रजासु
उद्भवादयो यतो भवंति स आद्यः पुरुष इत्यन्वयः ५ धर्मस्य भार्यायां दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नर इति मूर्तिद्वयेन अजनिष्ट जातः

यत्काय एष भुवनत्रयसन्निवेशो यस्येंद्रियैस्तनुभृतामुभयेंद्रियाणि ॥ ज्ञानं स्वतः श्वसनतो बलमोज ईहा सत्वादिभिः स्थिति
लयोद्भव आदिकर्ता ४ आदावभूच्छतधृती रजसास्य सर्गे विष्णुः स्थितौ क्रतुपतिर्द्विजधर्मसेतुः। रुद्रो ऽप्ययाय तमसा पुरुषः
स आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु ५ धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर ऋषिप्रवरः प्रशांतः ॥ नैष्क
र्म्यलक्षणमुवाच चचार कर्म यो ऽद्यापि चास्त ऋषिवर्यनिषेविताङ्घ्रिः ६ इंद्रो विशंक्य मम धाम जिघृक्षतीति कामं न्ययुंक्त
सगणं स बदर्युपाख्यं ॥ गत्वाप्सरोगणवसंतसुमंदवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ७ विज्ञाय शक्रकृतमक्रम
मादिदेवः प्राह प्रहस्य गतविस्मय एजमानान् ॥ मा भैष्ट भो मदन मारुत देववध्वो गृह्णीत नो बलिमशून्यमिमं कुरुध्वं ८

तच्चरितमाह नैष्कर्म्यमात्मस्वरूपं लक्ष्यते येन तत्कर्म कर्म निर्हारस्वरूपं वा उवाच नारदादिभ्यः स्वयं च चार च। यो ऽद्यापि कर्मा चरन्नास्ते ऋषिवर्यैर्निषेवि
ताङ्घ्रिर्यस्य सः ६ भगवदवतारेषु अनेकं परमोपशमं दर्शयितुमितिहासमाह इंद्र इति द्वाभ्यां। धाम स्थानं तपसा ग्रहीतुमिच्छतीति विशं
क्य तपो नाशाय कामं सपरिवारं प्रेषयामास सः कामः बदरीभिरुपाख्यायते यस्तं तस्याश्रमं अप्सरोगणादिभिः सह गत्वा स्त्रीणां प्रेक्ष
णान्येव इषवो बाणास्तैः न तस्य महिम महिमानं जानातीति अतन्महिज्ञः ७ अक्रमं अपराधं अहो अहं धीर इति विस्मयो गर्वस्तद्रहितः ए
जमानान् शापभिया कंपमानान् भो विभो समर्थ हे देववध्वः मा भैष्ट बलिमातिथ्यं तान्प्रार्थयते इमं मम स्थानं कमाश्रमं आतिथ्याभावे शून्य प्रा
यः स्यादित्यर्थः ८ श्रीराम

भा.प.
१४

हे नरदेव अभयदे श्रीनारायणे इत्थं ब्रुवति सति देवाः कामादयः सव्रीडा निनम्राणि शिरांसि येषां ते लज्जाभावेनैवावनतशिरस्का इत्यर्थः स
घृणं यथा भवति कृपां जनयंतः ऊचुः कृपायुक्तं तमिति वा मायातः परे अतो विकृते स्वारामाश्च ते धीराश्च तेषां निकरैरानतं पादपद्मं य
स्य तस्मिन् त्वयि एतदस्मो भानुकंपादि न विचित्रं ९ अस्माकं चापराधाचरणं स्वभावत्वान्न विचित्रमित्याहुः त्वामिति। त्वां सेवतां सेवमाना
नां सुरैरिंद्रादिभिः कृता अंतराया विघ्ना भवंति कस्मादित्यत आहुः स्वौकः इति स्वस्थानं स्वर्गमतिक्रम्य परमं तव स्थानं व्रजतां नान्यस्य त्वा
मसेवमानस्य कुतः बर्हिषि यज्ञे स्वभागान् पुरोडाशादीन् बलीन् करान् कृषिकरवद्राज्ञे इंद्रादिभ्यो ददतः प्रयच्छतस्तर्हि किमद्भुतं कोपि विघ्नो
न स्पृशति नेत्याहुः धत्त इति। पदमिति निश्चये। यतस्त्वं सुराधीश्वरो विता रक्षकः अतोसौ विघ्नानां मूर्ध्नि पदमंघ्रिं धत्ते कुतः पुनस्त्वयि विघ्ना

सर्व.

इत्थं ब्रुवत्यभयदे नरदेव देवाः सव्रीडनम्रशिरसः सघृणं तमूचुः॥ नैतद्विभो त्वयि परेऽविकृते विचित्रं स्वारामधीरनिकरा
नतपादपद्मे ९ त्वां सेवतां सुरकृता बहवोंतरायाः स्वौको विलंघ्य परमं व्रजतां पदं ते॥ नान्यस्य बर्हिषि बलीन्दद
तः स्वभागान् धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि १० क्षुत्तृट्त्रिकालगुणमारुतजैह्व्यशैश्न्यानस्मानपारजलधी
नतितीर्य केचित्॥ क्रोधस्य यांति विफलस्य वशं पदे गोर्मज्जंति दुश्चरतपश्च वृथोत्सृजंति ११ इति प्रगृणतां तेषां
स्त्रियोत्यद्भुतदर्शनाः॥ दर्शयामास शुश्रूषां स्वर्चिताः कुर्वती विभुः १२ ते देवानुचरा दृष्ट्वा स्त्रियः श्रीरिव रूपिणीः॥
गंधेन मुमुहुस्तासां रूपौदार्यहतश्रियः १३

केति भावः १० त्वद्भक्तानां तु केवलं न पश्चरतादृशी गतिः अस्माकं वा वशा यांति क्रोधस्य वा तत्रास्मदृशाः कामोपभोगमपि ताव
दनुभवंति क्रोधस्य वशाः पुनरतिमहा इत्याहुः क्षुत्तृडिति क्षुत्तृट् त्रिकालगुणाश्च शीतोष्णवर्षाणि मारुतश्च प्राणो वाह्यो वा जैह्व्यं
जिह्वाभोगाः शैश्न्याः गुह्योपभोगाश्च एतानस्मान् अपारजलधिरूपानतितीर्य विलंघ्य गोष्पदे मज्जंति कुतः यतः क्रोधस्य विफलस्य व
शं यांति गच्छंति किं च जले मज्जंतो यथा विवशाः संतो मस्तकारोपितं भारमुत्सृजंति तथा वृथैव न मोक्षाय न च भोगाय यज्ञापादिना दुश्च
रं तप उत्सृजंति ११ स्त्रियः योगनिर्मिताः स्त्रीः शुश्रूषां कुर्वतीः सुष्ठु अलंकृताः तेषां स्वलावण्यादिदर्पोपशमनाय दर्शयामास १२
रूपिणीर्मूर्तिमतीः श्रीरिव ताः स्त्रीर्दृष्ट्वा तासां रूपसौंदर्येण महत्वेन हताः श्रीः कांतिर्येषां ते १३ श्रीरामचंद्राय नमः॥

राम
१४

वृधं रणीधं नन्तुक्कवर्यवराकाः क्केवेमाइति चेन्नत्राह सवर्णां समानरूपां नैकाप्यस्मदनिरूपेतिचेन्माभवतु तथापि स्वर्गस्य भूषणरूपां
१४ सुरवंदिनः देवभृत्याः १५ इंद्राय इंद्रप्रति नारायणबलमुक्तं शक्रस्तत्रासत्रासप्राप्तः विस्मितश्च तत्र विस्मित आसेतिवा १६
अत्यन्तमप्यवतारांस्तच्चरिता निचाह हंसस्वरूपीति। दत्तः दत्तात्रेयः कुमारः सनकादिः पिता ऋषभश्च विष्णुरेव कलयावतीर्णः सन्नात्म
योगमवदत्। तेन विष्णुना हयास्ये हयग्रीवावतारे मधुभिदा सता तेन ततः श्रुतयः आहृताः १७ इलापृथ्वी ओषधयश्च गुप्ताः

तानाह देवदेवेशः प्रणतान्प्रहसन्निव॥ आसामेकतमां वृध्रं सवर्णां स्वर्गभूषणं १४ ओमित्यादेशमादाय नत्वा तं सुर
वंदिनः॥ उर्वशीमप्सरः श्रेष्ठां पुरस्कृत्य दिवं ययुः १५ इंद्रायानम्य सदसि शृण्वतां त्रिदिवौकसां॥ ऊचुर्नारायणब
लं शक्रस्तत्रास विस्मितः १६ हंसस्वरूप्यवददच्युत आत्मयोगं दत्तः कुमार ऋषभो भगवान्पिता नः॥ विष्णुः शिवा
य जगतां कलयावतीर्णस्तेनाहृता मधुभिदा श्रुतयो हयास्ये १७ गुप्तोप्यये मनुरिलौषधयश्च मात्स्ये क्रौडे हतो दितिज
उद्धरतांभसः क्ष्मां॥ कौर्मे धृतोद्रिरमृतोन्मथने स्वपृष्ठे ग्राहात्प्रपन्नमिभराजममुंचदार्तं १८ संस्तुन्वतो ब्धि
पतितान् श्रमणानृषींश्च शक्रं च वृत्रवधतस्तमसि प्रविष्टं॥ देवस्त्रियोऽसुरगृहे पिहिता अनाथा जघ्नेऽसुरेंद्रमभयाय
सतां नृसिंहे: १९ देवासुरे युधि च दैत्यपतीन्सुरार्थे हत्वांतरेषु भुवनान्यदधात्कलाभिः॥ भूत्वाथ वामन इमामहरद्बलेः
क्ष्मां याच्ञाछलेन समदाददितेः सुतेभ्यः २० निःक्षत्रियामकृत गां च त्रिसप्तकृत्वो रामस्तु हैहयकुलाप्ययभार्गवाग्निः॥ सो
ब्धिं बबंध दशवक्त्रमहन्सलंकं सीतापतिर्जयति लोकमलघ्नकीर्तिः २१

क्रौडे वराहावतारे यद्वा हाऊ तेंद्रममुंचत् मोचयामास एवमादौ यत्रावतारे नाम नास्ति तत्र विष्णुः शिवाय जगतां कलयावतीर्ण इत्यनुवर्तनीयं १८
संस्तुन्वतः स्तुतिं कुर्वाणान् वालखिल्यान् कश्यपार्थे समिदाहरणे गोः पदे निमग्नान्निंद्रेणोपहसितान्बुध्वा त्यापदो मोचयत् तमसि ब्रह्महत्या
ऋषीन् यां प्रविष्टं मोचयामास असुरगृहे पिहिता निरुद्धा याः देवस्त्रियस्ताश्चामुंचदनेकावतारेः १९ अंतरेषु सर्वमन्वंतरेषु कलादिभिर्मूर्तिभि
र्भुवनानि अदधात् अपालयत् इमां क्ष्मां समदात् अददात् २० हैहयानां कुलस्याप्ययाय भार्गवरूपोग्निः सरामो दाशरथिः सन्सलंकं कायां लंकं
स्थितं स च जयति वर्तमानकालीनो वतार इत्यर्थः २१ श्रीरामचंद्रायनमः श्रीकृष्णायनमः श्रीरामो जयति सर्वोत्कर्षेण॥

भाविनं रामकृष्णावतारमाह भूमेरिति । बुद्धावतारमाह वादैरिति । अतदर्हान् यज्ञानर्हान् दैत्यान् विमोहयिष्यति कल्क्यवतारमाह शू
द्रानिति न्यहनिष्यन् निहनिष्यति २२ २३ ॥ ॥इत्येकादशे चतुर्थः॥ ॥पंचमे भक्तिहीनानां का निष्ठा को युगे युगे ॥ पूजा विधिरिति प्र
श्नद्वयस्योत्तरमुच्यते १ त्वां सेवतां सुरकृता बहवोंतरायाः इत्यनेन श्रीहरिभक्ता विघ्नमूर्ध्नि पदं दत्वा परां गतिं यांति अभक्तानां तु किं प्राभ
वंतीत्युक्ते तर्हि तेषां का गतिर्भवतीति पृच्छति । भगवंतमिति हि आत्मवित्तमाः अविजितात्मनां अत एवाशांतकामानां का निष्ठा किं प्राप्य
मित्यर्थः १ स्वजनकस्य गुरोर्भगवतो नारायणात् कुरुद्रोहेण दुर्गतिं यांतीति वक्तुं भगवतः सकाशाद्वर्णाश्रमाणामुत्पत्तिमाह मुखेति गुणैः

भूमेर्भरावतरणाय यदुष्वजन्मा जातः करिष्यति सुरैरपि दुष्कराणि ॥ वादैर्विमोहयति यज्ञकृतोऽतदर्हान् शूद्रान् कलौ क्षि
तिभुजो न्यहनिष्यदंते २२ एवंविधानि कर्माणि जन्मानि च जगत्पतेः ॥ भूरीणि भूरियशसो वर्णितानि महाभुज २३
॥ ॥इति श्रीभाग० ए० वसुदेवनारदसंवादे जायंतेयोपाख्याने चतुर्थोध्यायः॥ ॥ ॥राजोवाच भगवंतं ह
रिं प्रायो न भजंत्यात्मवित्तमाः ॥ तेषामशांतकामानां का निष्ठाविजितात्मनां १ चमस उवाच मुखबाहूरुपादेभ्यः पुरु
षस्याश्रमैः सह ॥ चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक् २ य एषां पुरुषं साक्षादात्मप्रभवमीश्वरं ॥ न भजंत्यव
जानंति स्थानाद्भ्रष्टाः पतंत्यधः ३ दूरे हरिकथाः केचिद्दूरे वाच्युतकीर्तनाः ॥ स्त्रियः शूद्रादयश्चैव तेऽनुकंप्या भवादृ
शां ४ विप्रो राजन्यवैश्यौ वा हरेः प्राप्ताः पदांतिकं ॥ श्रौतेन जन्मनाथापि मुह्यंत्याम्नायवादिनः ५

सत्वेन विप्रः सत्वरजोभ्यां क्षत्रियः रजस्तमोभ्यां वैश्यः तमसा शूद्र इति २ एषां मध्ये ये तु त्वां न भजंति । येच ज्ञात्वाप्यवजानंति आत्मनः
प्रभवो जन्म यस्मात् तं तद्भजने कृतघ्नतामप्याह ईश्वरमिति स्थानाद्वर्णाश्रमाद्भ्रष्टाः ३ तत्र ये ज्ञास्ते भवद्विधानामनुग्राह्या इत्याह दूर
इति दूरे हरिकथाश्रवणं येषां ते अत एव दूरे च अच्युतकीर्तनं येषां ते दूरे अच्युतकीर्तना श्चेति वा ४ ज्ञानलवदुर्विदग्धास्तु चिकित्स्यत्वा
दुपेक्ष्या इत्याशयेनाह विप्र इति । श्रौतेन कर्मफलेषु सज्जते कुतः आम्नाये बुधे वा ये अर्थवादाः ते मोहकतया विद्यंते येषां ते तदुक्तं गीतासु या
१ उपनयनाख्येन उपलक्षणमेतत् अध्ययनादिना पि हरेः पदांतिकं तद्भजनोत्तमाधिकारं प्राप्ता अपि मुह्यंति १

भक्तिमार्गादर्श्यायते षां मोहं प्रपंचयन्निंदति कर्मणीत्यादिना अकोविदाः यथा बंधकं न भवति तथा कर्तुमशक्ताः स्वाभिज्ञा नृद्धंति
यतस्तथाः अनम्राः स्तब्धत्वे हेतुः यतो मूर्खाः अपि पंडिता वयमिति मानवंतः अतः अपामसोममममृता अभूम अक्षय्यं ह वै चा
तुर्मास्ययाजिनः सुकृतं भवतीत्यत्र नो ष्णोन्वशीतं स्यान्न ग्लानिर्नोघ्यमास्तयद्वृत्यादिकया यया माध्व्या गिरोत्सुकाः संतो मू
ढास्तया वाडुकान् अप्सरोभिः सह हरिष्यामइत्यादिप्रियान् त्राशान्वदंति ६ किं त्वेतेषां कर्माभिनिवेशात् कामक्रोधदंभार्श्यो
वर्धत इत्याह त्रयेण रजसेति घोरः अभिचारादिसंकल्पो येषां ते अहिवन्मन्युर्येषां ते ७ कामुकत्वं प्रपंचयति वदंतीति उपा

कर्मण्यकोविदास्तथा मूर्खाः पंडितमानिनः ॥ वदंति चाटुकान्मूढा यया माध्व्या गिरोत्सुकाः ६ रजसा घोरसं
कल्पाः कामुका अहिमन्यवः ॥ दांभिका मानिनः पापा विहसंत्यच्युतप्रियान् ७ वदंति तेन्योन्यमुपासित
स्त्रियो गृहेषु मैथुन्यपरेषु चाशिषः ॥ यजंत्यसृष्टान्नविधानदक्षिणं वृत्त्यै परं घ्नंति पशूनतद्विदः ८ श्रिया विभू
त्याभिजनेन विद्यया त्यागेन रूपेण बलेन कर्मणा ॥ जातस्मयेनांधधियः सहेश्वरान् सतोवमन्यंति हरिप्रियान्
खलाः ९ सर्वेषु शश्वत्तनुभृत्स्ववस्थितं यथा खमात्मानमभीष्टमीश्वरं ॥ वेदोपगीतं च न शृण्वतेबुधा मनोरथानां प्रवदंति वा
र्तया १०

सिताः स्त्रियो यैः ननु वृद्धाः ते मैथुन्यं मिथुनसुखमेव परं मत्वा तिथ्यादिषु गृहेषु तेषु आशिषो वदंति इदमद्य मयालब्धमिदं प्राप्स्ये म
नोरथं इदमस्तीदमपि मे भविष्यति पुनर्धनमित्याकाराः दांभिकत्वं प्रपंचयति यजंतीति असृष्टान्नविधानदक्षिणं न सृष्टः न संपादि
तः अन्नविधानं दक्षिणा यथा तथा यजंति तदा च वृत्त्यै जीविकार्थं परं केवलं पशून् घ्नंति अतद्विदः हिंसादोषानभिज्ञाः ८ मानित्वं प्र
पंचयति श्रियेति श्रिया धनादिसंपदा विभूत्या ऐश्वर्येण श्रियादिना जातो यः स्मयो गर्वस्तेन अंधा धीर्येषां ते ईश्वरसहितान् सतः अव
मन्यते ९ किंच एवं वर्तमानास्ते वेदतत्त्वार्थं स्फुटमपि न जानंतीत्याह सर्वेष्विति । केन रूपेणावस्थितं तं तदाह आत्मानमीश्वरं आत्मतया
ईश्वरतया चावस्थितं एवमप्यसंगतामाह यथा खं पुरुषार्थतामाह अभीष्टं स्फुटत्वमाह वेदोपगीतं चेति तत्कुतः यतो मनोरथा

नाप्यवाप्यामिषमद्यसेवाविषयाणां वार्तया प्रवदंति निवृत्तिपरं
वेदं प्रवृत्तिपरं वर्णयंति १० श्रीरामचंद्राय नमः ॥ ॥

ननुव्यवायादीनामपि ऋतौभार्यामुपेयात् हुतशेषंभक्षयेदित्यादिनाविहितत्वात् किमेवंनिंद्यतेअतआह लोकइति। व्यवायःस्त्रीसंगः
नित्याःरागतएवनित्यप्राप्ताःजंतोःप्राणिमात्रस्य अतस्तत्रतासुचोदनायाविधिर्नास्ति। ननुऋतावुपेयादित्यादिविधिर्दर्शितःसत्यंनत्व
यमपूर्वविधिःरागतःप्राप्तत्वात् किंतुनियमविधिरूपेणरागिणामभ्यनुज्ञामात्रंक्रियते तदाह व्यवस्थितिरिति तेषुव्यवायादिषुकैर्वि
वाहयज्ञसुराग्रहैः विवाहविषयएवव्यवायःकार्यः यज्ञएवामिषसेवा सौत्रामण्यांसुराग्रहान्गृह्णातीतिश्रुतेस्तत्रैवमद्यसेवेतिनियमः
क्रियते। ननुचनियमपक्षेप्यावश्यकत्वान्ननिदायुक्ता अतआह आसुनिवृत्तिरिष्टेति। अयंभावः नायंनियमविधिरपि नित्यप्राप्तत्वात्अ
तोनिवृत्तिःपरिसंख्यैव आसुव्यवायामिषमद्यसेवासुविधिरिष्टा कथंतर्हिव्यवस्थितिरित्युक्तं उच्यते नतावत्परिसंख्याविनोधिश्रुत्यानि
वृत्तिरुच्यते। तथासतिस्वार्थत्यागःपरार्थकल्पनाप्राप्तबाधश्चेतिदोषत्रयंस्यात् अतःक्वचित्प्राप्त्यतोप्यर्थस्यप्रापणमनर्थकमित्यपू

लोकेव्यवायामिषमद्यसेवानित्यास्तुजंतोर्नहितत्रचोदना॥ व्यवस्थितिस्तेषुविवाहयज्ञसुराग्रहैरासुनिवृत्तिरिष्टा ११
धनंचधर्मैकफलंयतोवैज्ञानंसविज्ञानमनुप्रशांति॥ गृहेषुयुंजंतिकलेवरस्यमृत्युंनपश्यंतिदुरंतवीर्यं १२ श्रीरामाय

र्वविधिवद्द्वारान्यनिवृत्तिःफलतोभवति। तद्यथा। इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते इत्यत्ररशनालिंगतोगर्दभाश्वाभिधानी
रशनादूपेप्राप्त्यतोमंत्रस्यापूर्वविधिद्वारापरिसंख्योच्यते यथोक्तंतत्रवार्तिके अप्राप्तविधिरेवायमतोमंत्रश्चनिश्चितःपरिसंख्याफलेनोक्ता
नविशेषःपुनःश्रुतेरिति क्वचित्तुरागतोनित्यप्राप्तस्याप्राप्तांशपूरणलक्षणस्यनियमफलस्याप्यभावान्नियमविधिद्वाराफलतःपरिसंख्याभ
वति यथापंचपंचनखाभक्ष्याइति तथारागतोनित्यप्राप्तस्यव्यवायादेर्विवाहादिनियमेनाभ्यनुज्ञाद्वारापरिसंख्यैवेति। ननुयद्यभ्यनुज्ञामात्रमे
नक्रियतेतर्हि ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति। घोरायांभ्रूणहत्यायांपच्यतेनात्रसंशयइत्यादिदोषश्रवणंनस्यात् नैषदोषः मनसि
कामेसत्यपितस्यामरुच्याद्वेषादिनावातामनुपगच्छतोदोषश्रवणोपपत्तेरितिसर्वमनवद्यं ११ तदेवंव्यवायादिमनोरथाकुलितत्वाद्दुर्भगाइमा
त्मानंनशृण्वंतीत्युक्तं इदानींधनस्यापिधर्मद्वारापरमात्मप्रापकस्यदृष्टोपभोगार्थंविनियोगान्नात्मज्ञानगंधोपीत्याह धनंचेति। धर्मएवैकं
फलंयस्यतत्कुतः यतोधर्मात्सविज्ञानंअपरोक्षज्ञानसहितंदृष्टपरोक्षज्ञानंभवति कथंभूतंअनुप्रशांति अनुअनंतरमेवप्रकृष्टाशां
तिर्निर्वाणसुखंयस्मात्तदेवंभूतंधनंगृहेषुयुंजंति १२

या

किंच व्यवस्थायामपि व्यवायाद्यमनुज्ञानयथेष्टम् अपि तु नियमेनैवेत्याह यदिति। यद्यस्मात् सुराया घ्राणभक्षः अवघ्राणं स एव विहितः न पानं तं
था पशोरप्यालभनमेव विहितं न तु हिंसा अयमर्थः द्रव्यतो देशतो न यत्स्यगृहहननं तद्वालंभनं। वायव्यं श्वेतमालभेतेत्यादिश्रुतेः न तु हिंसा
यावदविहिता। हिंसा न सा हिंसेति कीर्त्यते इति वचनात्। भक्षणोद्देशेन तु क्रियमाणे लौकिकहनन वध्वि हिंसैव। अत्र आलभनमेव विहितं न तु हिं
सा अतो न यथेष्टभक्षणाभ्यनुज्ञेत्यर्थः व्यवायोपि प्रजया निमित्तभूतया न तु रत्यै अतो मनोरथवादिन इमं विशुद्धं स्वधर्मं न विदुरिति १३
एवं भगवत्पराङ्मुखानां बहुदोषतां प्रपंच्य तन्निष्ठां प्रपंचयति पंचभिः येत्वेति अनेवंविदः न एवं धर्मं विदंतीति पतंत्यत्र स्थानिःशंकाः अनेन मनो
रथो भविष्यतीति विश्वस्ता वा तदानीं तन्नयोषणेन वा ते पशुभिर्विश्वस्ताः ते च पशवः प्रेत्य अमुत्र तान् खादंति तदुक्तं मांसभक्षयिता मुत्र य

यद्घ्राणभक्षो विहितः सुरायाः तथा पशोरालभनं न हिंसा॥ एवं व्यवायः प्रजया न रत्या इमं विशुद्धं न विदुः स्वधर्मं १३ ये त्वनेवं
विदोऽसंतः स्तब्धाः सदभिमानिनः॥ पशून्द्रुह्यंति विस्रब्धाः प्रेत्य खादंति ते च तान् १४ द्विषंतः परकायेषु स्वात्मानं हरिमीश्व
रं॥ मृतके सानुबंधेस्मिन् बद्धस्नेहाः पतंत्यधः १५ ये कैवल्यमसंप्राप्ता ये चातीताश्च मूढतां॥ त्रैवर्गिका ह्यक्षणिका
आत्मानं घातयंति ते १६ एत आत्महनोऽशांता अज्ञाने ज्ञानमानिनः॥ सीदंत्यकृतकृत्या वै कालध्वस्तमनोरथाः १७
हित्वात्यायासरचिता गृहापत्यसुहृच्छ्रियः॥ तमो विशंत्यनिच्छंतो वासुदेवपराङ्मुखाः १८ श्रीरामभद्राय नमः॥

स्य मांसमिहाद्म्यहं। एतन्मांसस्य मांसत्वं प्रवदंति मनीषिण इति वचनात् [१४] अभिचारादिना द्विषतः मृतके देहे सानुबंधे पुत्रादिसहि
ते १५ अज्ञास्तत्त्वैरनुकंपितास्तरंतीति तत्त्वज्ञास्तु स्वतः येतु नात्यंतमज्ञाना न तत्त्वज्ञास्ते अंतरालवर्तिनः पतंतीत्याह यद्इति कैवल्यं तत्त्व
ज्ञानमसंप्राप्ताः अत्र हेतुः त्रिवर्गप्रधानाः अक्षणिकाः उपशांतिक्षणरहिताः देहादिस्थैर्यबुद्धयो वा स्वयमेवात्मानं घातयंति १६
तदाह एत इति आत्महनः आत्मापह्नवकर्तारः अज्ञाने कर्मणि तथा च श्रुतिः असुर्या नाम ते लोका अंधेन तमसावृताः॥ तांस्ते प्रेत्या
भिगच्छंति ये के चात्महनो जना इति १७ या गृहापत्यसुहृच्छ्रियस्ताः हित्वा १८ श्रीरामभद्राय नमः श्रीकृष्णाय नमः॥

तदेवं भगवद्भक्तिरेव कर्तव्येति स्थिते तत्रावशेषं पृच्छति कस्मिन्नु काल इति। किंवर्णः कीदृग्वर्णवान् कीदृशः कीदृगाकारः केन वा ना
म्नाकेन वा विधिना १९ एतेषु कृतादिकालेषु नानाप्रकारा वर्णाभिधाकारा यस्य सः नानैव विधिना विविधेनैव मार्गेण २० तदेव
वर्णादि वस्तु प्रपञ्चयमाह कृत इत्यादिना कृष्णाजिनादीन्बिभ्रदिति ब्रह्मचारिविशेषो दर्शितः २१ तपसा ध्यानेन २२ त्रिगुणा दीक्षाङ्गभू
तामेखला यस्य सः यज्ञमूर्तिः हिरण्यकेशः पिङ्गकेशः २४ त्रय्या विद्यया वेदत्रयोक्तकर्मभिः २५ पृश्निगर्भस्तत्स्याः

राजोवाच कस्मिन्काले स भगवान् किंवर्णः कीदृशो नृभिः। नाम्ना वा केन विधिना पूज्यते तदिहोच्यताम् १९ श्री
करभाजन उवाच कृतं त्रेता द्वापरश्च कलिरित्येषु केशवः। नानावर्णाभिधाकारो नानैव विधिनेज्यते २० कृते शुक्ल
श्चतुर्बाहुर्जटिलो वल्कलाम्बरः। कृष्णाजिनोपवीताक्षान् बिभ्रद्दण्डकमण्डलू २१ मनुष्यास्तु तदा शान्ता निर्वै
राः सुहृदः समाः। यजन्ति तपसा देवं शमेन च दमेन च २२ हंसः सुपर्णो वैकुण्ठो धर्मो योगेश्वरोऽमलः। ई
श्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते २३ त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्त्रिमेखलः। हिरण्यकेशस्त्रय्यात्मा स्रु
क्स्रुवाद्युपलक्षणः २४ तं तदा मनुजा देवं सर्वदेवमयं हरिम्। यजन्ति विद्यया त्रय्या धर्मिष्ठा ब्रह्मवादिनः २५
विष्णुर्यज्ञः पृश्निगर्भः सर्वदेव उरुक्रमः। वृषाकपिर्जयन्तश्च उरुगाय इतीर्यते २६ द्वापरे भगवाञ्छ्यामः
पीतवासा निजायुधः। श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः २७

पुत्रः वृषाकपिः स्मृतः सन् वर्षति कामान् आकम्पयति क्लेशानिति तथा जयत्येव सर्वदेति जयन्तः २६ श्यामः अतसी
पुष्पसंकाशः निजानि चक्रादीनि आयुधानि यस्य सः श्रीवत्सो नाम वक्षसो दक्षिणे भागे रोम्णां प्रदक्षिणावर्तः आदिर्ये स
षां करचरणादिगतपद्मादीनां तैरङ्कैः अङ्कितैः चिह्नैर्लक्षणैर्बाह्यैः कौस्तुभादिभिः २७ श्रीरामभद्राय नमः ॥ ॥

८

पलक्षणं

महाराजोपलक्षणं छत्रचामरादियुक्तं वेदतंत्राभ्यां वैदिकेनागमिकेन च मार्गेण यजंति पूजयंति परं ईश्वरं ज्ञातुमिच्छवः २८ नामा
न्याह नमस्त इति २९ ३० नानातंत्रविधानेनेति । कलौ तंत्रमार्गस्य प्राधान्यं दर्शयति ३१ कृष्णवर्णं त्विषा कांत्या अकृष्णं
इंद्रनीलमणिवदुज्वलं यद्वा त्विषा कृष्णं कृष्णावतारं अनेन कलौ कृष्णावतारस्य प्राधान्यं दर्शयति अंगानि हृदयादीनि उपांगानि कौस्तुभादीनि
अस्त्राणि सुदर्शनादीनि पार्षदाः सुनंदादयः तत्सहितं यज्ञैः अर्चनैः संकीर्तनं नामोच्चारणं स्तुतिश्च तत्प्रधानैः सुमेधसो विवेकिनः ३२

तं तदा पुरुषं मर्त्या महाराजोपलक्षणं ॥ यजंति वेदतंत्राभ्यां परं जिज्ञासवो नृप २८ नमस्ते वासुदेवाय नमः संकर्षणाय च ॥
प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः २९ नारायणाय ऋषये पुरुषाय महात्मने ॥ विश्वेश्वराय विश्वाय सर्वभूतात्मने
नमः ३० इति द्वापर उर्वीश स्तुवंति जगदीश्वरं ॥ नानातंत्रविधानेन कलावपि यथा शृणु ३१ कृष्णवर्णं त्विषाकृष्णं सां
गोपांगास्त्रपार्षदं ॥ यज्ञैः संकीर्तनप्रायैर्यजंति हि सुमेधसः ३२ ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिंचि
नुतं शरण्यं ॥ भृत्यार्तिहं प्रणतपाल भवाब्धिपोतं वंदे महापुरुष ते चरणारविंदं ३३

स्तुतिमाह ध्येयमिति हे प्रणतपाल हे महापुरुष ते चरणारविंदं वंदे कथंभूतं ध्येयं ध्यातुं योग्यं सदेति सर्वत्र संबध्यते । ध्येयत्वे हेतवः
इंद्रियकुटुंबादिभिर्यः परिभवस्तिरस्कारः [illegible] तं हंतीति तथा ततः किं च अभीष्टदोहं मनोरथपूरकं किं च तीर्थास्पदं गंगाद्याश्रयत्वेन पर
मपावनं शिवविरिंचिभ्यां नुतं स्तुतं महत्तमैः ननु तौ कृतार्थौ वक्ति किमर्थं ताभ्यां नुतं तत्राह शरणं आश्रययोग्यं सुखबात [illegible]
तर्हि ब्रह्मादिस्तुत्यं प्राकृतस्य कथं गोचरः स्यात् तत्र भृत्यार्तिहं यस्य कस्यापि भृत्यमात्रस्यार्तिहं न केवलमागंतुकार्तिमार्तिं हं
ति किंतु भवाब्धिपोतं संसारार्णवतारकं च ३३ श्रीरामचंद्राय नमः श्रीगोपालाय नमः श्रीकृष्णाय नमः श्रीरामाय

इदानीं रद्य??ाप्तकामत्वान्नैरपेक्ष्यं भक्तार्थं वसायेक्षत्वं दर्शयन् श्रीरामचंद्रं स्तौति त्यक्त्वेति। अन्यैः सुदुस्त्यजाम् सुरेप्सितां राज्यलक्ष्मीं ?स्तां त्य
क्त्वा यदि ति??म्नू त्यर्थ्यः अरण्यमगात् किं राज्यवै??स्यदर्शनेन न धर्मिष्ठः कुतः आर्यस्य गुरोः दशरथस्य वचसा। किं च एवं राज्यं त्यक्त्वापि
भक्तिवात्सल्येन दयितया सी??ईप्सितं मायामृगं स्वीकारयोन्वधावत् तस्य भगवतश्चरणारविंदं वंदे यद्वा हे धर्मिष्ठ इति संबोधनं तथा
प्यविवक्षितत्वात् आर्यपदेन संधिर्न भवति। तथा यदगादिति ते चरणारविंदं मे वोच्यते यच्च मायामृगमन्वधावत् तत्ते चरणारविंद
दुमन्वयः अन्यत्समानं ३४ युगानुरूपाभ्यां नामरूपाभ्यां ३५ एतेषु चतुर्षु युगेषु कलिरेव श्रेष्ठ इत्याह कलिमिति गुणज्ञाः क

त्यक्त्वा सुदुस्त्यज सुरेप्सित राज्यलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगादरण्यं ॥ मायामृगं दयितयेप्सितमन्वधावद्वंदे महा
पुरुष ते चरणारविंदं ३४ एवं युगानुरूपाभ्यां भगवान् युगवर्तिभिः ॥ मनुजैरिज्यते राजन् श्रेयसामीश्वरो हरिः ३५
कलिं सभाजयंत्यार्या गुणज्ञाः सारभागिनः ॥ यत्र संकीर्तनेनैव सर्वः स्वार्थोभिलभ्यते ३६ न ह्यतः परमो लाभो दे
हिनां भ्राम्यतामिह ॥ यतो विंदेत परमां शांतिं नश्यति संसृतिः ३७ कृतादिषु प्रजा राजन् कलाविच्छंति संभवं ॥ क
लौ खलु भविष्यंति नारायणपरायणाः ३८ क्वचित्क्वचिन्महाराज द्राविडेषु च भूरिशः ॥ ताम्रपर्णी नदी यत्र कृतमाला
पयस्विनी ३९ कावेरी च महापुण्या प्रतीची च महानदी ॥ ये पिबंति जलं तासां मनुजा मनुजेश्वर ४० प्रायो भक्ता भग

लेर्गुणं जानंति ये ते न तु दोषाणां बहुत्वात् कथं सभाजयंति तत्राह सारभागिनः गुणांशमात्रग्राहिणः कोसौ गुणस्तमाह यत्रेति। तदुक्तं
ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेर्चयन् यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवमिति ३६ तस्मात्कलेः अतः अस्मात्संकीर्तना
त्परमो लाभो नास्ति यतः संकीर्तनात् ३७ किं च कृतादिष्विति ३८ ३९ अमलाशया सन्तः प्रायः प्रायशो भगवति भक्ताः
भवंति ४० श्रीरामभद्राय नमः श्रीवासुदेवाय नमः श्रीगोपालाय नमः श्रीकृष्णाय नमः श्रीरामो जयति ॥॥

भक्तस्य विधिनिषेधनिवृत्तेः कृतकृत्यतामाह देवर्षीति आप्ताः पोष्याः कुटुंबिनः इतरे देवादयः पंचयज्ञदेवताः एतेषां यथा भक्तः ऋणी अ
तएव तेषां किंकरः [illegible] नित्यं पंचयज्ञादिकर्त्तनतथायं स्मृतिः हीनजातिं परिक्षीणमप्यार्थं कर्मकारयेदिति अयं तु न तथा कोसौ यः स
र्वभावेन श्रीमुकुंदं शरणंगतः कर्तं कृत्यं परिहृत्य यद्वा कर्तं भेदं परिहृत्य यदुनीछेदनं इत्यस्मात् वासुदेवः सर्वमिति बुध्वेत्यर्थः ४१ वि
हितकर्मनिवृत्तिमुक्त्वा निषेधानिमित्तप्रायश्चित्तनिवृत्तिमाह स्वपादमूलमिति। त्यक्तः अन्यस्मिन्देहादौ देवतांतरे वा भावो येन अतए

[illegible]॥ देवर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी च राजन् ॥ सर्वात्मना यः शरणं
शरण्यं गतो मुकुंदं परिहृत्य कर्तं ४१ स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः ॥ विकर्म यच्चोत्पति
तं कथंचिद्धुनोति सर्वं हृदि संनिविष्टः ४२ श्रीनारद उवाच धर्मान्भागवतानित्थं श्रुत्वाथ मिथिलेश्वरः ॥ जायंतेया
न्मुनीन्प्रीतः सोपाध्यायो ह्यपूजयत् ४३ ततोंतर्दधिरे सिद्धाः सर्वलोकस्य पश्यतः ॥ राजा धर्मानुपातिष्ठन्नवापप
रमां गतिं ४४ त्वमप्येतान्महाभाग धर्मान्भागवतान्श्रुतान् ॥ आस्थितः श्रद्धया युक्तो निःसंगो यास्यसे परं ४५ युव
योः खलु दंपत्योर्यशसा पूरितं जगत् ॥ पुत्रतामगमद्यद्वां भगवान्हरिरीश्वरः ४५ दर्शनालिंगनालापैः शयनास
नभोजनैः ॥ आत्मा वां पावितः कृष्णे पुत्रस्नेहं प्रकुर्वतोः ४७

च तस्य विकर्मणि प्रवृत्तिर्न संभवति यच्च कथंचित्प्रमादादिना उत्पतितं भवेत्तदपि हरिर्धुनोतीति। ननु यमस्तं न मन्येत तत्राह परेशः ननु श्रुति
स्मृती ममैवाज्ञे इति भगवद्वचनात् स्वाज्ञाभंगं कथं सहेत तत्राह प्रियस्य ननु तथापि पापक्षयार्थं भजते तत्राह हृदि संनिविष्टः नहि वस्तुशक्ति
र्धितामपेक्षित इत्यर्थः ४२ जायंतेयान् जयंत्याः पुत्रान् ४३ उपातिष्ठन् अनुतिष्ठन् ४४ निःसंगो भूत्वा ४५ शास्त्रप्रक्रियेयमु
क्ता युवां तु संगत एव कृतार्था इत्याह युवयोरिति द्वाभ्यां युवयोः ४६ न वसर्वकर्मार्पणादिभागवतधर्मैरन्येषामिव युवयोः सत्त्वशुद्धिरा
पादनीया पुत्रोपलालनेनैव भागवतधर्मसर्वस्वं निष्पन्नमित्याह दर्शनेति कृष्णे पुत्र इति स्नेहं प्रकुर्वतो वां तस्य दर्शनादिभिरात्मा पा
वितः शोधितः ४७ श्रीराम॥

एतदेव कैमुत्यन्यायेनस्फुटयति वैरेणेति ॥ यंशयनासनाद्यैर्वैरेणापिध्यायंतस्तस्यगतिविलासाद्यैः आकृतधियस्तत्तदाका
राधार्येषांते तत्साम्यमापुः किंपुनर्वक्तव्यमनुरक्तधियांतत्साम्यंभवतीति ४८ ननुपुत्रस्नेहस्यैवमोक्षहेतुत्वंहिसर्वेमुच्ये
रन्नतआह मापत्यबुद्धिमिति ॥ अपत्यमितिबुद्धिंमाकृथा अत्रागमकश्चांरसः ४९ ननुकथमीश्वरे ॥ मानुषस्यात्कथंवातस्यविश्वस्र
ष्ट्यादिकर्तुः पूतनाशोषणादिकर्माश्चर्यमिवानिरूप्यतेतत्राह भूभाररूपाअसुराएवराजन्यास्तेषांहतवेतान्हंतुंनिर्वृत्यैमोक्षाय ५०.५१ ये

वैरेणयंनृपतयः शिशुपालपौंड्रशाल्वादयोगतिविलासविलोकनाद्यैः ॥ ध्यायंतआकृतधियःशयनासनादौतत्साम्यमा
पुरनुरक्तधियांपुनःकिं ४८ मापत्यबुद्धिमकृथाःकृष्णेसर्वात्मनीश्वरे ॥ मायामनुष्यभावेनगूढैश्वर्येपरेव्यये ४९
भूभारासुरराजन्यहंतवेगु
प्तयेसतां ॥ अवतीर्णस्यनिर्वृत्यैयशोलोकेवितन्यते ५० श्रीशुकउवाच इतिहासमिमंपुण्यंधारयेद्यःसमाहितः ॥ स
विधूयेहशमलंब्रह्म[illegible]भूयायकल्पते ५२ इतिश्रीभागवतेमहापुराणेए॰नारदवसुदेवसंवादेजायंतेयोपाख्या
नेपंचमोध्यायः ॥ ॥५॥ ॥ श्रीबादरायणिरुवाच अथब्रह्मात्मजैर्देवैः प्रजेशैरावृतोभ्यगात् ॥ भवश्चभूतभव्येशोययौ
भूतगणैर्वृतः १ इंद्रोमरुद्भिर्भगवानादित्यावसवोश्विनो ॥ ऋभवोंगिरसोरुद्राविश्वेसाध्याश्चदेवताः २ गंधर्वाप्सरसो
नागाःसिद्धचारणगुह्यकाः ॥ ऋषयःपितरश्चैवसविद्याधरकिंनराः ३

ऐतच्छ्रुत्वामहाभागोवसुदेवोतिविस्मितः ॥ देवकीचमहाभागाजहतुर्मोहमात्मनः ५१

॥ षष्ठेब्रह्मादिभिस्तुत्वागंतुंविज्ञापितोहरिः ॥
इहअस्मिन्नेवदेहेशमलंमोहंविधूयब्रह्मत्वायकल्पते ५२ ॥ ॥इतिएकादशेपंचमः॥
उद्धवःप्रार्थयामासस्वधामनयमामिति १ अतःपरमतिविस्तरेणात्मविद्यांनिरूपयिष्यंस्तत्प्रस्तावमाहअथेति आत्मजैःसनका
दिभिःअभ्यगात्द्वारकामितिचतुर्थेनान्वयः१२ ३ श्रीरामभद्रायनमः श्रीवासुदेवायनमः श्रीकृष्णायनमः श्रीरामोजयति ॥

ननु तेषामुपेंद्रादिरूपं भगवंतं नित्यं पश्यतां केयमिति दिदृक्षा अत आह वपुषेति येन वपुषा नरलोकमनोरमः सन् सर्वलोकेषु यशो वितेने तद्दिसु
द्वपुः दिदृक्षवः ४ ५ अचक्षत अपश्यन् ६ स्वर्गोद्यानस्थैर्माल्यैश्चित्राणि शब्दालंकारप्रायाणि पदानि अर्थाश्च यासु ताभिर्गीर्भिः
७ बुद्धींद्रियादिभिर्दर्शनादिना प्राणेन च बलहेतुना दंडवत्पतनेन नता वयं नमस्कुर्वंतः स्मेति विस्मये यथाहुः दोर्भ्यां पद्भ्यां जानुभ्यां उरसा
शिरसा दृशा॥ मनसा वचसा चेति प्रणामोऽष्टांग ईरित इति स्मशब्दोक्तविस्मयाय विशेषणं कर्ममयादुरुपाशान्मुमुक्षुभिर्भावयुक्तैरपि यत्केवलम्

द्वारकामुपसंजग्मुः सर्वे कृष्णदिदृक्षवः॥ वपुषा येन भगवान् नरलोकमनोरमः ४ यशो वितेने लोकेषु सर्वलोकमलापहं॥ त
स्यां विभ्राजमानायां समृद्धायां महर्धिभिः ५ व्यचक्षतावितृप्ताक्षाः कृष्णमद्भुतदर्शनं ६ स्वर्गोद्यानोपगैर्माल्यैश्छादयंतो
यदूत्तमं॥ गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरं ७ देवा ऊचुः नताः स्मते नाथ पदारविंदं बुद्धींद्रियप्राणमनोवचोभिः॥ यच्चिंत्य
तेंतर्हृदि भावयुक्तैर्मुमुक्षुभिः कर्ममयोरुपाशात् ८ त्वं मायया त्रिगुणयात्मनि दुर्विभाव्यं व्यक्तं सृजस्यवसि लुंपसि तद्गुणस्थः॥
नैतैर्भवानजित कर्मभिरज्यते वै यः स्वे सुखे व्यवहिते भिरतोनवद्यः ९ शुद्धिर्नृणां न तु तथेड्य दुराशयानां विद्याश्रुताध्ययन
दान तपः क्रियाभिः॥ सत्वात्मनामृषभ ते यशसि प्रवृद्धसच्छ्रद्धया श्रवणसंभृतया यथा स्यात् १०

तर्हृदि चिंत्यते न तु दृश्यते तद्रूपं नताः अहो भाग्यमित्यर्थः ८ ननु ममापि दृष्टादृष्टकर्मकरणात्कुतो मत्पादारविंदचिंतनं कर्मपाशान्मुमुक्षुभिः
क्रियते तत्राहुः त्वमिति हे अजित आत्माभिरानीतं न भिदमत्यं कर्म त्वं व्यक्तं महदादिप्रपंचं सृजसि पालयसि संहरसि च तत्त्वाप्तान्येव नर्च दु
र्विभाव्यं मनसाप्यन्यैरचिंत्यं तद्गुणस्थः तस्या मायाया गुणेषु नियंतृत्वेन स्थितः अथ च एतैः कर्मभिः भवान्नाज्यते न लिप्यते कुतः यो भवान्
नवद्यः रागादिरहितः यतः स्वे आत्मरूपे सुखे अव्यवहिते अनावृते अभिरतः अतस्त्वं कर्म कुर्वन्नपि आत्मारामः परमेश्वर इति मुमुक्षुभिश्चिंत्य पाक्कमातः
स इति भावः ९ नन्वात्मारामस्य किं कर्मकरणेन अत आहुः शुद्धिरिति हे ईड्य हे ऋषभ दुराशयानां रागिणां विद्याउपासना विद्यादिभिः
तथा शुद्धिर्न भवति सत्वात्मनां सतां ते यशसि श्रवणेन संभृतया परिपुष्टया अभिवृद्धया सच्छ्रद्धया यथा स्यात् परमपावनस्य यशसो वितानाय
तव कर्माचरणमिति भाव १० श्रीराम

भा॰ए॰

२॰मोक्षाय तदेवं तद्यशः श्रवणैव शुद्धिहेतुः अस्माभिस्तु तवांघ्रिर्ध्येयः अतः तवांघ्रिर्नोऽस्माकमशुभाशयानां विषयवासनानां धूमकेतुः स्याद्दाहकः स्यात् कथंभू
तः यः क्षेमाय मुनिभिर्मुमुक्षुभिः प्रेमार्द्रहृदा उह्यमानश्चिन्त्यमानः यश्च सात्वतैर्भक्तैः समविभूतये समानैश्वर्याय वासुदेवादिव्यूहेऽर्चितः स्तुवके
श्चिदात्मवद्भिर्धीरैः स्वरतिक्रमाय स्वर्गमतिक्रम्य वैकुंठप्राप्तये सवनशः त्रिकालमर्चितः ११ किंच प्रयतपाणिभिः संयतहस्तैः हविर्गृहीत्वा अध्वरा
ग्नौ आहवनीयादौ याज्ञिकैर्यश्चिन्त्यते ननु यस्यै देवतायै हविर्गृहीतं तस्यास्तां ध्यायेद्वषट्करिष्यन्निति वचनात् तद्देवता चिन्त्यते अत आह त्रय्या निरुक्ते
न विधिना इन्द्रादिरूपेणैव यज्ञपुरुषश्चिन्त्यत इत्यर्थः उत किंच अध्यात्मयोगे आत्माधिकारे योगे योगिभिरपि आत्मनस्तव मायामणिमादिरूपां जि
ज्ञासुभिस्तत्कामैर्यश्चिन्त्यते परमभागवतैस्तु मुमुक्षुभिर्यः परीष्टः सर्वतः पूजितः स तवांघ्रिर्नोऽस्माकमशुभाशयधूमकेतुः स्यादिति पूर्वेणान्वयः १२
एतेषां च मुनिसात्वतादीनां मुनिसात्वतानां याज्ञिकयोगिपरमभागवतानां च पञ्चानां सेवकानां मध्ये परमभागवतेषु लक्ष्म्या अपि तत्परत्वं निरधि

स्यान्नस्तवांघ्रिरशुभाशयधूमकेतुः क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः ॥ यः सात्वतैः समविभूतय आत्मवद्भिर्व्यूहेऽर्चितः सवनशः स्व
रतिक्रमाय ११ यश्चिन्त्यते प्रयतपाणिभिरध्वराग्नौ त्रय्या निरुक्तविधिनेश हविर्गृहीत्वा ॥ अध्यात्मयोग उत योगिभिरात्ममायां
जिज्ञासुभिः परमभागवतैः परीष्टः १२ पर्युष्टया तव विभो वनमालयेयं संस्पर्धिनी भगवती प्रतिपत्निवच्छ्रीः ॥ यः सुप्रणीतममु
यार्हणमाददन्नो भूयात्सदांघ्रिरशुभाशयधूमकेतुः १३ श्रीरामाय नमः ॥

कीत्त स्तुवंति पर्युष्टयेति [illegible] अर्हं यत्रेयं लाभि तत्रैव वक्षसि पर्युषितापीयं वसतीति प्रतिपत्नीव श्रीः संस्पर्धमाना भवति तथापि सपत्नीव
तां स्पर्धमानां श्रियमनादृत्य [illegible] न्यग्भूतयापि अमुया वनमालया भक्तैरर्पितं यमिति प्रीत्या सुप्रणीतं सुष्ठु संपादितं यथा भवति त श
था अर्हणं पूजामाददत् स्वीकुर्वन् [illegible] मिलार्हणविशेषणं वा तस्य तवांघ्रिर्नोऽशुभाशयधूमकेतुर्भूयात् यद्वा यो अंघ्रिरमुया सुप्रणीतमर्ह
श णमाददत् स नोऽशुभाशयधूमकेतुर्भूयादित्यन्वयः अथ नैवं संबंधः एतेभ्यो ध्यानार्चनादिनिष्ठेभ्योऽपि त्वयि शश्वत्प्रेमस्य सद्भक्ता वत एव कृतार्थाः भा
गवतो यशः प्रियत्वादित्याहुः पर्युष्टयावशं कांतावित्यस्मात्त्वरितः सर्वांगेषु दृष्ट्या कांतया श्लिष्टया वनमालया वक्षसि एकदेशे वर्तमाना श्रीः सं राम
स्पर्धमाना भवति तथाप्याम्नायमधुव्रतैः बहुधा वर्णितया कीर्तिमय्या देवनम्रत्या वनमालयैव यो भवान् सुप्रणीतमर्हणमाददद् इत्यादि द्र २०
ष्टव्यत् १३ श्रीरामाय

पद्य त

तच्चरणस्पर्शभक्तैः पातः प्रक्षिप्यते वे तिस्तुवंतः प्रार्थयंते केतुरिति। बलिंबंधने त्रिभिर्विक्रमैः युतस्तत्र द्वितीयविक्रमे सत्यलोकंगतस्त
स्य पादस्के तु अंगुष्ठो विजयध्वज इव तत्सं पादयति त्रिपथगा त्रिधा पतंती त्रिषु लोकेषु या पतंती गंगा पताका यस्य सः तथा सुरदेव
चम्वोः तयोः नयोः उभयोर्भयाभयकरः साधुषु देवेषु स्वर्गाय खलेषु असुरेषु इतराय अधोगमनाय एवंकेतुरूपस्ते पादः भजतां नः अघं
पुनातु शोधयतु अघादिति पाठे भजतां नः इति कर्मणि षष्ठी अघात् नोस्मान् पुनात्विति। तथा च श्रुतिः चरणं पवित्रं विततं पुराणं येन पूत
स्तरति दुष्कृतानि। तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्मद्भ्राजमानं महस्वत्। अमृतस्य धा
राबहुधा दोहमानं। चरणं नो लोके सुधितां दधात्विति १४ ननु युद्धे देवासुरादयः परस्परं जयंति जीयंते च अहं तत्रैव त्वतः आहुः नसीति मिथुः

केतुस्त्रिविक्रमयुतः स्त्रिपतत्पताको यस्ते भयाभयकरो सुरदेवचम्वोः। स्वर्गाय साधुषु खलेष्वितराय भूमन्पादः पुना-
तु भगवन्भजतामघं नः १४ नस्योतुगाव इव यस्य वशे भवंति ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः। कालस्य ते प्रकृतिपूरु-
षयोः परस्य शंनस्तनोतु चरणः पुरुषोत्तमस्य १५ अस्यासि हेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपि का-
लमाहुः। सोयं त्रिणाभिरखिलापचये प्रवृत्तः कालो गभीररय उत्तमपूरुषस्त्वम् १६

मिथः अर्द्यमानाः बुभुक्षादिभिः पीड्यमाना ब्रह्मादयोपि यस्य तव वशे भवंति न तु जये पराजये वा स्वतंत्राः कइव नसि नासिकायां ओताः प्रोता नासि
कायां विध्य बद्धाः गावो बलीवर्दा इव कुतः कालस्य कलयितुः प्रवर्तकस्य तदेव कुतः प्रकृतिपुरुषयोरपि परस्य तस्य ते पुरुषोत्तमस्य पादो नः शं
तनोतु १५ प्रकृतिपुरुषाभ्यां परत्वमुपपादयंतः कालत्वेन पुरुषोत्तमत्वमाहुः अस्येति। अस्य जगतः उदयादीनां हेतुरसि कुतः अव्यक्तं प्रकृतिः
जीवः पुरुषः महान्महत्तत्वं तेषां कालं नियंतारं त्वामाहुः। अक्षरात्परतः परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित्सा काष्ठा
सा परा गतिरित्याद्याः श्रुतयः किंच अयं संवत्सरात्मको यः कालः त्रिनाभिः त्रीणि चातुर्मास्यानि नाभयो यस्य सोपि त्वमेव अतस्त्वमुत्तमपुरु
ष इति। तथा च गीतासु यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः। अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति १६ श्रीरामभद्राय नमः ॥

श्रि

त्वमेव प्रकृत्यादिद्वारा जगदुत्पत्त्यादिहेतुरित्युक्तं तत्केन प्रकारेणेत्यत आहुः त्वत्त इति। त्वत्तः पुरुषो वीर्यं शक्तिं समधिगम्य प्राप्य यया मायया सह म
हान्तं धत्ते किमिव अस्य विश्वस्य गर्भमिव सोयं महान्तयैव मायया अनुगतः सन्नात्मा। सकाशात् अंडकोशं ससर्ज त्वयानुगत इति पाठे पित्त
या मायया त्वयाधिष्ठितः सन्नित्यर्थः 17 नन्वेवं भूतमीश्वरत्वं मम कुतोवगतं तत्राहुः तदिति। तस्मात् तस्थुषः स्थावरस्य जंगमस्य च भवानधी
शः। यद्यस्मान्मायया उत्था उज्जृंभिता या गुणविक्रिया इंद्रियवृत्तिः तयोपनीतान् अर्थान् विषयान् जुषन् जुषमाणोपि हे हृषीकपते न लिप्तस्तं ये
त्वन्ये जीवा योगिनो वा स्वतः परिहृतादपि अविद्यमानत्वात् त्यक्ताद्वा विषयजोषणाद् बिभ्यति वासनामात्रेण बध्यंत इत्यर्थः 18 आलिह

त्वत्तः पुमान् समधिगम्य ययास्य वीर्यं धत्ते महान्तमिव गर्भममोघवीर्यः। सोयं तयानुगत आत्मन आंडकोशं हैमं ससर्ज बहिरा
वरणैरुपेतं 17 तत्तस्थुषश्च जगतश्च भवानधीशो यन्माययोत्थगुणविक्रिययोपनीतान्। अर्थान्जुषन्नपि हृषीकपते न
लिप्तो येन्ये स्वतः परिहृतादपि बिभ्यति स्म 18 स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः।
पत्न्यस्तु षोडशसहस्रमनंगबाणैर्यस्येंद्रियं विमथितुं करणैर्न विभ्व्यः 19 विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याः पादा
वनेजसरितः शमलानि हंतुं। आनुश्रवं श्रुतिभिरंघ्रिजमंगसंगैस्तीर्थद्वयं शुचिषदस्त उपस्पृशंति 20 बादरायणिरुवाच
इत्यभिष्टूय विबुधैः सेशः शतधृतिर्हरिं। अभ्यभाषत गोविंदं प्रणम्यांबरमाश्रितः 21

त्वमाहुः स्मायेति स्मायावलोकः मंदस्मितविलसितावलोकः तस्य लवः कटाक्षः तेन दर्शितो यो भावोभिप्रायस्तेन मनोहारि यद्भ्रूमंडलं तेन
प्रहिता ये सौरता मंत्रास्तैः शौंडैः प्रगल्भैः अनंगबाणैः कामस्य बाणैः संमोहनैः करणैः कामकलाभिः षोडशसहस्रं पत्न्यः यस्येंद्रियं मनः वि
मथितुं क्षोभयितुं न विभ्व्यः न समर्थाः स भवान्न लिप्त इति पूर्वेणान्वयः 19 तस्मात्तव अमृतरूपाया कथा तदेव उदकं वहंती इति तथा की
र्तिनद्यस्तथा पादावनेजसरितो गंगाद्यास्त्रिलोक्याः शमलानि हंतुं विभ्व्यः केन प्रकारेण आनुश्रवं गुरोरुच्चारणमनुश्रूयत इत्यनुश्रवो वेद
स्तत्संभवं कीर्तिरूपं तीर्थं श्रुतिभिः श्रवणेंद्रियैः अंघ्रिजं चांगसंगैः एवं शुचिषदः स्वाश्रमधर्मस्थितास्ते तव तीर्थद्वयमुपस्पृशंति सेवंत इति 20

जगतो

राम
२१

रुविक्षिप्ता विस्तारिता २२ २३ उद्दामानि उद्वृत्तानि विक्रमाय युतानि कर्माणि २४ उद्दामानि उद्वृत्तानि विक्रमाय युतानि कर्माणि २५ २८

ब्रह्मोवाच भूमेर्भारावताराय पुरा विज्ञापितः प्रभो ॥ त्वमस्माभिरशेषात्मंस्तत्तथैवोपपादितं २२ धर्मश्च स्थापितः सत्सु सत्यसं
धेषु वै त्वया ॥ कीर्तिश्च दिक्षु विक्षिप्ता सर्वलोकमलापहा २३ अवतीर्य यदोर्वंशे बिभ्रद्रूपमनुत्तमं ॥ कर्माण्युद्दामवृत्तानि हिता
य जगतोकृथाः २४ यानि ते चरितानीश मनुष्याः साधवः कलौ ॥ शृण्वंतः कीर्तयंतश्च तरिष्यंत्यंजसा तमः २५ यदुवंशेवतीर्णस्य
भवतः पुरुषोत्तम ॥ शरच्छतं व्यतीयाय पंचविंशाधिकं प्रभो २६ नाधुनाते खिलाधार देवकार्यावशेषितं ॥ कुलं च विप्रशापेन नष्ट
प्रायमभूदिदं २७ ततः स्वधाम परमं विशस्व यदि मन्यसे ॥ सलोकाल्लोकपालान्नः पाहि वैकुंठकिंकरान् २८ श्रीभगवानुवा
अवधारितमेतन्मे यथात्थ विबुधेश्वर ॥ कृतं वः कार्यमखिलं भूमेर्भारोवतारितः २९ तदिदं यादवकुलं वीर्यशौर्यश्रियोद्धतं ॥
लोकं जिघृक्षुद्रुद्धं मे वेलयेव महार्णवः ३० यद्यसंहृत्य दृप्तानां यदूनां विपुलं कुलं ॥ गंतास्म्यनेन लोकोयमुद्वेलेन विनंक्ष्यति
३१ इदानीं नाश आरब्धः कुलस्य द्विजशापतः ॥ यास्यामि भवनं ब्रह्मन्नेतदंते तवानघ ३२ श्रीशुक उवाच इत्युक्तो लोकना
थेन स्वयंभूः प्रणिपत्य तं ॥ सह देवगणैर्देवः स्वधाम समपद्यत ३३ अथ तस्यां महोत्पातान् द्वारवत्यां समुत्थितान् ॥ विलोक्य भ
गवानाह यदुवृद्धान्समागतान् ३४ श्रीभगवानुवाच एते वै सुमहोत्पाता व्युत्तिष्ठंतीह सर्वतः ॥ शापश्च नः कुलस्यासीद्ब्राह्मणे
भ्यो दुरत्ययः ३५ न वस्तव्यमिहास्माभिर्जिजीविषुभिरार्यकाः ॥ प्रभासं सुमहत्पुण्यं यास्यामोद्यैव मा चिरं ३६ यत्र स्नात्वा द
क्षशापात् गृहीतो यक्ष्मणोडुराट् ॥ विमुक्तः किल्बिषात्सद्यो भेजे भूयः कलोदयं ३७ वयं च तस्मिन्नाप्लुत्य तर्पयित्वा पितॄन्
सुरान् ॥ भोजयित्वोशिजो विप्रान्नानागुणवतांधसा ३८

वीर्यशौर्याभ्यां युक्ता श्रिया २९ उद्वेलेन लंघितमर्यादेन ३१ वैकुंठं यास्यन्नुत ब्रह्मभवनं यास्यामि ३२ प्रभासं यास्याम इति वदतोयमभिप्रायः
पतेद्वेवांशाः स्वाधिकारानिवार्हतिन्नु सद्योमोक्षं द्वारवत्यां मृता मुच्येरन् तस्मादभ्युदयफलं प्रभासं नेष्यामीति ३६ दक्षशापात् यक्ष्मणा गृही
तश्चंद्रोपि तत्र स्नानमात्रं कृत्वा किल्बिषात्तस्माद्रोगदुःखात्सद्यो विमुक्तः सन् कलावृद्धिं भेजे ३७ उशिजः कमनीयान् अंधसा अन्नेन ३८

तेष्विति। यथा सुक्षेत्रे बीजमुप्तं बहुफलं भवति तथा दानं सत्पात्र इति द्योतयति ३९ ४० ४१ लोकं मर्त्यलोकं ४३ न प्रत्यहन् न प्रतिह
तवान् ४४ शय्यादिषु त्वं भक्तैर्नित्यं सेवितस्ततो वयं कथं त्यजेम ४५ त्यक्तुमशक्यत्वे प्रार्थयितुं मायाभयादित्याह त्वयेति। चर्चि
ताः अलंकृताः ४६ हि निश्चितं जयेम ४७ सन्यासिनो हि श्रमसाध्यादिकैः कथं निस्तरिष्यन्ति वयं त्वनायासेनैव तरिष्याम इत्याह वातरशना इति

तेषु दानानि पात्रेषु श्रद्धयोप्त्वा महाधनाः। वृजिनानि तरिष्यामो दानैर्नौभिरिवार्णवं ३९ श्रीशुक उवाच एवं भगवतादिष्टा
यादवाः कुरुनंदन। गंतुं कृतधियस्तीर्थं स्यंदनान् समयूयुजन् ४० तान्निरीक्ष्योद्धवो राजन् श्रुत्वा भगवतोदितं। दृष्ट्वारिष्टा
नि घोराणि नित्यं कृष्णमनुव्रतः। ४१ विविक्त उपसंगम्य जगतामीश्वरेश्वरं। प्रणम्य शिरसा पादौ प्रांजलिस्तमभाषत
४२ श्रीउद्धव उवाच देवदेवेश योगेश पुण्यश्रवणकीर्तन। संहृत्यैतत्कुलं नूनं लोकं संत्यक्ष्यते भवान् ४३ विप्रशा
पं समर्थोपि प्रत्यहन्न यदीश्वरः। नाहं तवांघ्रिकमलं क्षणार्धमपि केशव। त्यक्तुं समुत्सहे नाथ स्वधाम नय मामपि। ४४
तव विक्रीडितं कृष्ण नृणां परममंगलं। कर्णपीयूषमास्वाद्य त्यजत्यन्यस्पृहां जनः। शय्यासनाटनस्थानस्नान
क्रीडाशनादिषु। कथं त्वां प्रियमात्मानं वयं भक्तास्त्यजेम हि। त्वयोपभुक्तस्रग्गंधवासोलंकारचर्चिताः।
उच्छिष्टभोजिनो दासास्तव मायां जयेम हि। वातरशना य ऋषयः श्रमणा ऊर्ध्वमंथिनः। ब्रह्माख्यं धाम ते यांति शांताः
संन्यासिनोमलाः। वयं त्विह महायोगिन् भ्रमंतः कर्मवर्त्मसु। त्वद्वार्तया तरिष्यामस्तावकैर्दुस्तरं तमः। स्मरंतः कीर्त
यंतस्ते कृतानि गदितानि च। गत्युत्स्मितेक्षणक्ष्वेलि यन्नृलोकविडंबनं ५० शुक उवाच एवं विज्ञापितो राजन्
भगवान् देवकीसुतः। एकांतिनं प्रियं भृत्यमुद्धवं समभाषत ५१ इति श्रीभा० ए० भगवदुद्धवसंवादे षष्ठोध्यायः ॥ ६॥ ॥

ऊर्ध्वमंथिनः ऊर्ध्वरेतसः ४८ तावकैर्भक्तैः सह त्वद्वार्तया ४९ क्ष्वेलिः परिहासः हृद्धैकृतं ५० एकांतिनमित्यादिस्वाभिप्रायावबने
हेतुः ५२ इति श्रीभावार्थदीपिकायामेकादशे षष्ठः ॥ ॥ ॥६॥ ॥६॥ ॥ श्रीरामभद्राय नमः श्रीकृष्णाय नमः ॥ ॥ ॥

सप्तमेतू द्धवस्यात्मज्ञाननिष्ठोपहरिः स्वयं। अवधूतेतिहासोक्त्या गुरूनष्टाववर्णयत् १ यदात्थ संहरस्वैतत्कुलमिति स्वर्वासं वैकुंठवासं प्रति १[2] त्वं सर्व
त्यागेनात्मनिष्ठो भवेति वक्तुमाह कुलमिति त्रयेण ३ नष्टेवायं नष्टमंगलो भविष्यति ४ नवस्तव्यमेव त्वया ५ ननु गुणदोषाभ्यां विषमे कि लो
कुतः समदृष्टिः स्यामत आह यदिदमिति। मनआदिभिर्गृह्यमाणं मनोमयत्वान्मायेति विद्धि नत्वपि न स्थिरं किंतु नश्वरं च विद्धि ७ मनोमयत्वे हेतुः
पुंस इति। अयुक्तस्याविक्षिप्तमनसः नानार्थोभेदविषयो भ्रमः स भ्रम एव गुणदोषभाक् ननु वेदेनैव विधिनिषेधाभ्यां भेदस्य सत्यतोक्तान्न

श्रीभगवानुवाच यदात्थ मां महाभाग तच्चिकीर्षितमेव मे॥ ब्रह्मा भवो लोकपालाः स्वर्वासं मेभिकांक्षिणः १ मया निष्पादितं
ह्यत्र देवकार्यमशेषतः॥ यदर्थमवतीर्णोहमंशेन ब्रह्मणार्थितः २ कुलं वै शापनिर्दग्धं नंक्ष्यत्यन्योन्यविग्रहात्॥ समुद्रः सप्तमे
ह्येतां पुरीं च प्लावयिष्यति ३ यर्ह्येवायं मया त्यक्तो लोकोयं नष्टमंगलः॥ भविष्यत्यचिरात्साधो कलिनापि निराकृतः ४ नवस्त
व्यं त्वयैवेह मया त्यक्ते महीतले॥ जनोधर्मरुचिर्भद्र भविष्यति कलौ युगे ५ त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबंधुषु॥ मय्यावेश्य
मनः सम्यक् समदृग्विचरस्व गां ६ यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः॥ नश्वरं गृह्यमाणं च विद्धि मायामनोमयं ७ पुंसोऽ
युक्तस्य नानार्थो भ्रमः स गुणदोषभाक्॥ कर्माकर्मविकर्मेति गुणदोषधियो भिदा ८ तस्माद्युक्तेंद्रियग्रामो युक्तचित्त इदं ज
गत्॥ आत्मनीक्षस्व विततमात्मानं मय्यधीश्वरे ९ ज्ञानविज्ञानसंयुक्त आत्मभूतः शरीरिणां॥ आत्मानुभवतुष्टात्मा नांतरा
यैर्विहन्यसे १० दोषबुध्योभयातीतो निषेधान्न निवर्तते॥ गुणबुध्या च विहितं न करोति यथार्भकः ११ श्रीरामभद्राय नमः

एव मविज्ञेभिर्न गुणदोषबुद्धेः पुंसः कर्म विहितं अकर्म तल्लोपः विकर्म निषिद्धमिति भेदः अविद्यावद्विषयं वेद इत्यर्थः ८ कथमात्मनि परिच्छिन्ने विततं
जगदीक्षणीयं तत्राह आत्मानमिति मयि ब्रह्मणि तद्रूपेणेक्षस्व ९ नन्वेवं युक्तचित्तत्वेन कर्माकरणे देवादयो विघ्नं करिष्यंति तत्राह ज्ञानेति। ज्ञानं वेद
तात्पर्यनिश्चयः विज्ञानं तदर्थानुभवस्ताभ्यां सम्यग्युक्तस्ततश्चात्मानुभवेनैव तुष्टचित्तः सन् अतः शरीरिणां देवादीनां आत्मभूतः अंतरायैर्न प्रति
हन्यसे अयं भावः यावदनुभवं यथाश्रमं कर्माणि कुर्यादेव तदनंतरं सर्वेषामात्मभूतत्वान्न कोपि विघ्नमाचरति तथा च श्रुतिः तस्य ह न देवाश्च नाभूत्या
ईशत आत्मा ह्येषां स भवतीति १० न चैवमन्नज्ञानस्यापि यथेष्टाचरणप्रसंग इत्याह दोषबुध्येति। गुणदोषबुध्यातीतोपि प्राक्तनसंस्कारान्नि
षेधान्निवर्तत एव किंतु न दोषबुध्या विहितं च प्रायशः करोति गुणबुध्या यथार्भकः संकल्पविकल्परहितः किंचित्करोति कुतश्चिन्निवर्त
त ने

भा॰ ए॰
२२

एवंभूतस्य न पुनः संसार इत्याह सर्वभूतेति । न विपद्येत न पुनः संसरेत् १२ १३ त्वं तु सर्वं परित्यज्येत्यादिष्टः परेशमात्मनो योग्यं मन्वानः पृच्छति । योगे
शेति । योगेश योगफलदायिन् योगविन्यास न्यासो नाम भूमिकाः यो निक्षेपः क्रियते पृच्छायोगो विन्यस्यते क्रियते यस्मिन् योगात्मन् योगे आत्मा
प्रकटो भवति यस्य योगस्वरूपेति वा योगस्य संभवो यस्मात् चतुर्भिरेतैः संबोधनैः स्वमहिम्ना केवलं त्वयोपदिष्टं न तु मदधिकारः पर्यालो
चितः । जितेन्द्रियहि श्रेयस्करेति । न चारोग्याद्यर्थं सर्वदेहादि त्यागः किंतु संन्यासलक्षणः अप्रत्यापत्तिरूपः १४ १५ यं प्रति त्यागः

सर्वभूतसुहृच्छान्तो ज्ञानविज्ञाननिश्चयः ॥ पश्यन्मदात्मकं विश्वं न विपद्येत वै पुनः १२ श्रीशुक उवाच इत्यादिष्टो भगवता महाभाग
वतो नृप ॥ उद्धवः प्रणिपत्याह तत्वजिज्ञासुरच्युतं १३ श्रीउद्धव उवाच योगेशयोगविन्यास योगात्मन् योगसंभव ॥ निःश्रेय
साय मे प्रोक्तस्त्यागः सन्न्यासलक्षणः १४ त्यागोयं दुष्करो भूमन् कामानां विषयात्मभिः ॥ सुतरां त्वयि सर्वात्मन्नभक्तैरिति मे
मतिः १५ सोहं ममाहमिति मूढमतिर्विगाढस्त्वन्मायया विरचितात्मनि सानुबंधे ॥ तत्वंजसा निगदितं भवता यथाहं संसा
धयामि भगवन्ननुशाधि भृत्यं १६ सत्यस्य ते स्वदृश आत्मन आत्मनोन्यं वक्तारमीश विबुधेष्वपि नानुचक्षे ॥ सर्वे विमोहि
तधियस्तव माययेमे ब्रह्मादयस्तनुभृतो बहिरर्थभावाः १७ तस्माद्भवंतमनवद्यमनंतपारं सर्वज्ञमीश्वरमकुंठविकुंठधिष्ण्यं ॥
निर्विण्णधीरहमु ह वृजिनाभितप्तो नारायणं नरसखं शरणं प्रपद्ये १८

उपदिष्टः सोहं मूढमतिः कुतः संभवेदित्याह सोहमिति विगाढः सानुबंधे पुत्रादिसहिते त्वन्मायया विरचिते आत्मनि देहे विगाढो निमग्नः अतस्तत्तु भवता निगदि
तं यथाहमंजसा संसाधयामि तथा भृत्यं मामनुशाधि दीनेः शिक्षय १६ मया संक्षेपतः कथितं विस्तरतस्तु गान्यं पृच्छेति चेदत आह सत्यस्येति स्वदृशः
स्वप्रकाशस्य सत्यस्यात्मनः आत्मनो मां प्रति वक्तारं ते त्वत्तः अन्यं नानुचक्षे न पश्यामि स्वदृश इत्यनेन सिद्धता नाहं त्वत्तोन्यमिति वा कुत इत्यत आह स
र्वे इति । बहिरर्थभावाः विषयेष्वर्थबुद्धयः १७ केचिद्दुःशीला भवंतीति केचित् विलंबिताः फलकाले दिवंगता इति केचिद्दुःखाकेचिद्रक्षणे समर्थाः केचित्तु स्वस्य
न भक्ताः तस्मात्त्वामित्यर्थमनवद्यमित्यादीनि षंन विशेषणानि न अंतः कालतः पारं देशतश्च यस्यतं कालादिभिरकुंठो विकुंठलोको धिष्ण्यं स्थानं य
स्य तं हे भगवन्नहं स्फुटं निर्विण्णोहं तु वृजिनैर्दुःखैः अभितप्तः हकारगौरवाय एकारो युक्त इव कथनीयः नन्वनवद्यत्वादीनि कुतो ममतदाह ना
रायणमिति अनुकंपितस्माहं नरो जीवस्तस्य सखायं भवंतं शरणं प्रपद्ये १८ श्रीरामचंद्रायनमः श्रीकृष्णायनमः श्रीरामाजयति ॥

राम
२२

तदेवमसंभावनाविपरीतभावनाभ्यामुपदिष्टं तत्त्वमनवगाहमानं प्रति तन्निरसनाय गुरूपदेशं विनापि स्वान्वयव्यतिरेकाभ्यामेव तत्त्वप्रतिपत्तिर्भवतीति दर्शयितुमाह प्रायेणेति लोकतत्त्वस्य विचक्षणाः परीक्षकाः अशुभाशयाद्विषयवासनातः १९ तदुपपादयति आत्मनः पश्वादिशरीरेष्वात्मैव हिता हितज्ञाने गुरुः २० तत्र प्रत्यक्षं दर्शयति पुरुषत्वे चेति तथा च श्रुतिः पुरुषत्वे चाविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सत्येवं संपन्नोऽथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानमिति २१ अतः पुरुषत्वं स्तौति एकेति २२ अनुमा…अ नमा
त्रेति अत्र पौरुष्यां पुरि युक्ता अप्रमत्ताः अग्राह्यं ग्राह्येभ्यो हंकारादिभ्यो व्यतिरिक्तं मां अद्धा साक्षान्मृगयंति मार्गणे प्रकारद्वयमाह गृह्यमाणैर्बुध्यादिभिर्गु

श्रीभगवानुवाच प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः॥ समुद्धरंति ह्यात्मानं आत्मनैवाशुभाशयात् १९ आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः॥ यत्प्रत्यक्षानुमानाभ्यां श्रेयोऽसावनुविंदते २० पुरुषत्वे च मां धीराः सांख्ययोगविशारदाः॥ आविस्तरां प्रपश्यंति सर्वशक्त्युपबृंहितम् २१ एकद्वित्रिचतुष्पादो बहुपादस्तथापदः॥ बह्व्यः संति पुरः सृष्टास्तासां मे पौरुषी प्रिया २२ अत्र मां मार्गयंत्यद्धा युक्ता हेतुभिरीश्वरं॥ गृह्यमाणैर्गुणैर्लिंगैरग्राह्यमनुमानतः २३ अत्राप्युदाहरंतीममितिहासं पुरातनं॥ अवधूतस्य संवादं यदोरमिततेजसः २४ अवधूतं द्विजं कंचिच्चरंतमकुतोभयं॥ कविं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्मवित् २५ यदुरुवाच कुतो बुद्धिरियं ब्रह्मन्नकर्तुः सुविशारदा॥ यामासाद्य भवांल्लोकं विद्वांश्चरति बालवत् २६ प्रायो धर्मार्थकामेषु विवित्सायां च मानवाः॥ हेतुनैव समीहंते आयुषो यशसः श्रियः २७

णैर्हेतुभिर्ज्ञानां प्रकाशाः स्वप्रकाशमेकं विना न घटंत इति अनुपपत्तिमुखेन लक्षकैः तथा तैरेव लिंगैर्व्याप्तिमुखेनानुमानतः ईश्वरं प्रवर्तकं मृगयंते बुध्यादिकरणानि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदिति तदुक्तं भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः दृश्यैर्बुध्यादिभिर्द्रष्टा लक्षणैरनुमापकैरिति। न चैवं तत्त्वानुमानिकत्वमात्मेति मंतव्यं देहादिव्यतिरिक्तत्वपदार्थशुद्धिमात्रस्यैवानुमानेन विवक्षितत्वात् २३ भूयोऽन्वयव्यतिरेकाभ्यामसंभा ता
वनादिनिरस्तां वितिहासमाह अत्रापीति २४ २५ सुविशारदा अतिनिपुणा २६ सर्वलोकवैलक्षण्यमेवाह प्राय इति धर्मादिषु विवित्सायां आत्मविचारे च मानवाः समीहंते प्रवर्तंते तत्रापि आयुरादेर्हेतुना कामनयैव २७ श्रीरामचंद्राय नमः श्रीकृष्णाय नमः श्रीरामो जयति ॥ ॥

भा.ए.
२४

व न वाङ्
त्वंतुनकस्यचित्कर्मणांकर्तापि सिनोकिंचिदीहसे ध्वसिनन्वशात्यावाअज्ञानेनवाअनैपुण्येनवाविरूपत्वेनवाअमितयावाऔदासीन्यंघटते
कस्येत्याहकल्पइत्यादिना २८ महानर्थःसृत्वकृतइतिपृच्छतिजनेष्विति २९ स्पर्शविहीनस्यविषयभोगरहितस्यात्रहेतुंकेवलात्मनःकलत्रा
दिशून्यस्य ३० ३१ बुध्येवोपाश्रिताःस्वीकृताःनतुपदेशेनअटामिपर्यटामि ३२३३ शोभनंरूपंकीटस्यकरोतीतिसुपेशकृत् ३४ मेमयाऽऽश्रि
ताःस्वस्वदत्त्येतेषांवृत्तिभिरात्मनःशिक्षाशिक्षणीयानर्थान्हेयोपादेयादीन्अन्वशिक्षंअनुशिक्षितवानस्मि ३५ नाहुषोययातिः ३६ क्षितेःक्ष
मांशिक्षितवानित्याहभूतैरिति।आक्रम्यमाणःसंपीड्यमानःस्तद्विद्वान्भूतानांदैववशवर्तित्वंविद्वान्व्रतंनियमं ३७ पर्वतरूपावृक्षरूपावयाद्य

त्वंतुकल्पःकविर्दक्षःसुभगोमृतभाषणः॥नकर्तानिहसेकिंचिज्जडोन्मत्तपिशाचवत् २८ जनेषुदह्यमानेषुकामलोभदवाग्निना॥
नतप्यसेऽग्निनामुक्तोगंगांभःस्थइवद्विपः २९ त्वंहिनःपृच्छतांब्रह्मन्नात्मन्यानंदकारणं॥ब्रूहिस्पर्शविहीनस्यभवतःकेवलात्मनः
३० श्रीभगवानुवाच यदुनैवंमहाभागोब्रह्मण्येनसुमेधसा॥पृष्टःसभाजितःप्राह प्रश्रयावनतंद्विजः ३१ श्रीब्राह्मणउवाच
संतिमेगुरवोराजन्बहवोबुध्युपाश्रिताः॥यतोबुद्धिमुपादायमुक्तोटामीहतांछृणु ३२ पृथिवीवायुराकाशमापोग्निश्चंद्रमारविः॥
कपोतोऽजगरःसिंधुःपतंगोमधुकृद्गजः ३३ मधुहाहरिणोमीनःपिंगलाकुररोऽर्भकः॥कुमारीशरकृत्सर्पऊर्णनाभिःसुपेशकृ
त् ३४ एतेमेगुरवोराजंश्चतुर्विंशतिराश्रिताः॥शिक्षावृत्तिभिरेतेषामन्वशिक्षमिहात्मनः ३५ यतोयदनुशिक्षामियथावाना
हुषात्मज॥तत्तथापुरुषव्याघ्रनिबोधकथयामिते ३६ भूतैराक्रम्यमाणोपिधीरोदैववशानुगैः॥तद्विद्वान्नचलेन्मार्गादन्व
शिक्षंक्षितेर्व्रतं ३७ शश्वत्परार्थसर्वेहःपरार्थैकांतसंभवः॥साधुःशिक्षेतभूभृत्तोनगशिष्यःपरात्मतां ३८

पृ
थिवीतस्याःशिक्षितमाहशश्वदिति।सर्वदापरार्थाःपरोपकारार्थाःसर्वाईहायस्यसःपरार्थएवएकांतेनःसंभवोयस्यसः भूभृत्तःपर्वतात्तस्य
हिवृक्षस्तृणनिर्झरप्रसवक्रियाःपरार्थाएवयथातद्वत्तथानगशिष्यःवृक्षशिष्यःसन्परात्मतांपराधीनात्मतांवृक्षोयथापरैश्छिद्यो राम
त्याटयवानयनमप्यनुमन्यतेतद्वत् ३८ श्रीरामभद्रायनमः श्रीकृष्णायनमः श्रीगोपालायनमः श्रीरामोजयति ॥ ॥ २४

वायुरपि द्विविधः प्राणो बाह्यश्च तत्र प्राणस्य गुरुत्वमाह प्राणवृत्त्येति । प्राणो ह्याहारादिमात्रेण प्रवर्तते रूपरसादीनिंद्रियविषयांस्तु नापेक्षते
तथा मुनिरपि भवेदित्यर्थः । प्राणवृत्तेरकरणे मनोवैकल्येन ज्ञाननाशः स्यात् अतो देहनिर्वाहः कर्तव्यः गुणलिप्सायां तु वाक् मनश्चाविक्षिप्येत अ
तो नाधिकं लिप्सेदित्याह ज्ञानमिति नाविकीर्येत न विक्षिप्येत ३९ विषयाननुसेवमानोपि तेषु नासक्तिं वाध्याद्वायोः शिक्षेदित्याह विषयेष्विति ।
नानाधर्मेषु शीतोष्णादिधर्मेषु नाहि वायुर्वने दहने वा सज्जते तद्वत् ४० यथा वायुर्गंधादिधर्मयोगेन प्रतीयमानोपि वस्तुतो न तत् योगी एवं देहा
दिधर्मयोगेन अहंप्रत्यये प्रतीयमानोप्यात्मा न तद्धर्मवानिति तत्संभावितमिति वायोरेव शिक्षितमित्याह पार्थिवेष्विति ४१ आकाशाच्छिक्षितं स

प्राणवृत्त्यैव संतुष्येन्मुनिर्नैवेंद्रियप्रियैः ॥ ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः ३९ विषयेष्वाविशन्योगी नानाधर्मेषु स
र्वतः ॥ गुणदोषव्यपेतात्मा न विषज्जेत वायुवत् ४० पार्थिवेष्विह देहेषु प्रविष्टस्तद्गुणाश्रयः ॥ गुणैर्न युज्यते योगी गंधैर्वायुरिवा
त्मदृक् ४१ अंतर्हितश्च स्थिरजंगमेषु ब्रह्मात्मभावेन समन्वयेन ॥ व्याप्त्याव्यवच्छेदमसंगमात्मनो मुनिर्नभस्त्वं विततस्य
भावयेत् ४२ तेजोबन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः ॥ न स्पृश्यते नभस्तद्वत्कालसृष्टैर्गुणैः पुमान् ४३ स्वच्छः प्रकृतितः
स्निग्धो माधुर्यस्तीर्थभूर्नृणां ॥ मुनिः पुनात्यपां मित्रमीक्षोपस्पर्शकीर्तनैः ४४ तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजनः ॥
सर्वभक्षोपि युक्तात्मा नादत्ते मलमग्निवत् ४५

भावद्वयमाह अंतर्हितश्चेति द्वयेन अंतर्हितश्च देहांतर्गतोपि मुनिरात्मनो देहाद्यसंगं अत एवाव्यवच्छेदं च भावयेत् कुतः स्थिरजंगमेषु
त समन्वयेन या व्याप्तिस्तया किं मणिषु सूत्रस्येव व्याप्तिः न विततस्य सर्वगतस्य तत्कुतः ब्रह्मात्मभावेन ब्रह्मस्वरूपभावनया तत्त्वमसीति श्रुतेः नन्वे
तत्सर्वं कथं संभवति तत्राह नभस्त्वं तत्तुल्यत्वं स भावयेत् यथा नभसः सर्वगतस्य न घटादिभिः संगः परिच्छेदो वा एवमात्मनोपि संभवतीति ४२
किं च कृतस्तु स्यात्मनो नागमापि देहादिसंबंध इत्याह तेजोबन्नमयैः तेजश्च आपश्च अन्नं पृथिवी च तन्मयैः कालसृष्टैर्गुणैर्देहादिभिः पुमान्न
संस्पृश्यत इति नभोवत्संभवतीति ४३ स्वच्छत्वादिभिर्गुणैः उदकं जगत्पुनातीति तद्गुणानस्याः शिक्षितानित्याह स्वच्छः निर्मलः प्रकृतितः स्वभा
वतः स्निग्धः जनेष्वनुरागवान् माधुर्यः मधुरालापी तीर्थभूः तीर्थस्थानं अपां मित्रं उदकतुल्यः अ[illegible]आदिति पाठे सर्वायं पापात्पुनाति
स्वच्छत्वादिगुणैरर्थादुदकसादृश्यं ज्ञातव्यं ४४ अग्नेः शिक्षितमाह तेजस्वीति तेजस्वी ज्ञाना

तिशयात् विशेषतस्तपसा दीप्तः दुर्धर्षः अक्षोभ्यः सदासौ उदरभाजनश्च अपरिग्रहः युक्तात्मा मुनिः ४५ श्रीरामचंद्राय नमः

न

...ग्निरेव शिक्षांतरमाह क्वचिदिति। क्वचिच्छन्नः परोक्षः ... स्पष्टः ... तथा भुंक्ते ... दातॄणामिति। प्रागुत्तराशुभं भूतं भविष्यच्च पापं ४६
आत्मनो देहाद्याधिक्यमेवोपलभ्य ... स्वमाययेति ... दृष्टांतेन संभावितमित्याह स्वमाययेति। स्वमायया स्वीयाविद्यया सृष्टं सदस
ल्लक्षणं देवतिर्यगादिरूपं विशेदिति पूर्वं ४७ आत्मनो ... विकाराभावार्थं दृष्टांतेन संभावितमित्याह विसर्गाद्या इति। विसर्गो जन्म
श्मशानं नाशः तावेवांतौ येषां ... आप्यायनं ... मंडलमादित्यमंडलयोरेकनक्षत्रावस्थाने ... न दृश्यते ...
... मंडले प्रसादे ... वस्थितेन ... अमावास्या। अथ षोडशिका ... नक्षत्रांतरं गच्छति आदित्यस्तु ... होरात्रैः ... प्र
तिपदमारभ्य विषमस्थितस्य आदित्यमंडलस्य ... भागः ... मंडले प्रति ... दृश्यते सो कलेत्युच्यते। एवं पंचदशो ...

क्वचिच्छन्नः क्वचित्स्पष्ट उपास्यः श्रेय इच्छतां ॥ भुंक्ते सर्वत्र दातॄणां दहन्प्रागुत्तराशुभं ॥ ४६ स्वमायया सृष्टमिदं सदस
ल्लक्षणं विभुः ॥ प्रविष्ट ईयते तत्तत्स्वरूपोग्निरिवैधसि ४७ विसर्गाद्याः श्मशानांता भावा देहस्य नात्मनः। कलाना
मिव चंद्रस्य कालेनाव्यक्तवर्त्मना ४८ कालेन ह्योघवेगेन भूतानां प्रभवाप्ययौ ॥ नित्यावपि न दृश्येते आत्मनोग्नेर्य
थार्चिषां ४९ गुणैर्गुणानुपादत्ते यथाकालं विमुंचति ॥ न तेषु युज्यते योगी गोभिर्गा इव गोपतिः ५० बुध्यते स्वे न
भेदेन व्यक्तिस्थ इव तद्गतः ॥ लक्ष्यते स्थूलमतिभिरात्मा चावस्थितोर्कवत् ५१

त्रयोदशभिर्नक्षत्रैरंतरमिति ... चंद्रस्य ... मध्ये संमुखो ... तिष्ठतः तदा संपूर्णप्रतिबिंब ...
...तरश्मि ... ततः पुनः प्रतिपदमारभ्य ...
कलाह्रासस्तत्र यथा कालानां ... कलानामिवेति ४८ सिंहावलोकनेन दृष्टांतेन दे
हानां ... आत्मनः संबंधिनां भूतानां देहानामित्यर्थः ... ४९
आदित्याच्छिक्षितमाह गुणैरिति ... यथाकालं अयथाकालं अर्थिभ्यस्तेभ्यः ... बुध्यते
... गोपतिः सूर्यो यथा ५० स्वतो भेदः ...
... दृष्टांतेन संभावितमित्याह। बुध्यत इति स्वे ... आत्माभेदेन बुध्यते अभिव्यक्तौ ... उपाधिः ... रूपा

स्वरूपे न या

कपोताद्धि क्षितमाहनातिस्नेहइति।स्नेहः प्रीतिः प्रसंगः उपलालनाद्यासक्तिः ५२ दृष्टांतं प्रपंचयति कपोतः कश्चनेति ५३ तयोर्मिथः प्रस्नेह
च सं गोदर्शयति कपोताविति त्रयेण स्नेहेन गुणितं निबद्धं हृदयं ययोस्तौ ५४ विस्रब्धौ निःशंकौ ५५ साकपोती तर्पयंती सहासवीक्षिताला
पादिभिः प्रीणयंती अत एव तेनानुकंपिता सती यंयं वांछति तंतं कामं समनयत् संपादयामास राजन्निति। त्वं यद्येति स्तुवितं ५६ ७ तेषुजल

नातिस्नेहः प्रसंगो वा कर्तव्यः क्वापि केनचित्॥ कुर्वन्विंदेत संतापं कपोत इव दीनधीः ५२ कपोतः कश्चनारण्ये कृतनीडो व
नस्पतौ॥ कपोत्या भार्यया सार्धमुवास कतिचित्समाः ५३ कपोतौ स्नेहगुणित हृदयौ गृहधर्मिणौ॥ दृष्टिं दृष्ट्यांगमंगेन बुद्धिं
बुद्ध्या बबंधतुः ५४ शय्यासनाटनस्थानवार्ताक्रीडाशनादिकम्॥ मिथुनीभूय विस्रब्धौ चेरतुर्वनराजिषु ५५ यंयं वांछ
ति सा राजन् तर्पयंत्यनुकंपिता॥ तंतं समनयत्कामं कृच्छ्रेणाप्यजितेंद्रियः ५६ कपोती प्रथमं गर्भं गृह्णती काल आगते॥ अंडा
नि सुषुवे नीडे स्वपत्युः सन्निधौ सती ५७ तेषु काले व्यजायंत रचितावयवा हरेः॥ शक्तिभिर्दुर्विभाव्याभिः कोमलांगतनूरु
हाः ५८ प्रजाः पुपुषतुः प्रीतौ दंपती पुत्रवत्सलौ॥ शृण्वंतौ कूजितं तासां निर्वृतौ कलभाषितैः ५९ तासां पतत्रैः सुस्प
र्शैः कूजितैर्मुग्धचेष्टितैः॥ प्रत्युद्गमैरदीनानां पितरौ मुदमापतुः ६० स्नेहानुबद्धहृदयावन्योन्यं विष्णुमायया॥ विमोहितौ
दीनधियौ शिशून्पुपुषतुः प्रजाः ६१ एकदा जग्मतुस्तासामन्नार्थं तौ कुटुंबिनौ॥ परितः कानने तस्मिन्नर्थिनौ चेरतुश्चिरं ६२
दृष्ट्वा तान् लुब्धकः कश्चिद्यदृच्छातो वनेचरः॥ जगृहे जालमातत्य चरतः स्वालयांतिके ६३ कपोतश्च कपोती च प्रजापोषे सदो
त्सुकौ॥ गतौ पोषणमादाय स्वनीडमुपजग्मतुः ६४ कपोती स्वात्मजान्वीक्ष्य बालकान्जालसंवृतान्॥ तानभ्यधावत्क्रो
शंती क्रोशतो भृशदुःखिता ६५ सासकृत्स्नेहगुणिता दीनचित्ताजमायया॥ स्वयं चाबध्यत शिचा बद्धान्पश्यंत्यपस्मृतिः ६६

भरितेषु अंडेषु हरेः स्वभावकर्मादिशक्तिभिः रचितावयवाः पक्षिणः कोमलान्यंगानि तनूरुहाश्च येषां ते ५८ ५९ पतत्रैः पक्षैः दीनानां हृष्ट
नां ६० शिशून्बालान् प्रजाः पुत्रान् ६१ २ स्वालयांतिके चरतः क्रीडतः तान् कपोतपुत्रान् जालं प्रसार्य ६३ उत्सुकत्वादेव चरन् पोषणा
र्थं गतौ संतौ पोषणं भक्ष्यं ६४ ६५ शिचा जालेन ६६ श्रीरामो जयति श्रीराम॥

भ.स्क.
२६

कपोतआत्मानुरूपां भार्यां विललाप शुशोच ६७ विलापमेवाह त्रयेण अहो इति । अतृप्तस्य दृष्टसुखे अकृतार्थस्य अदृष्टमसंपाद
यतः ६८ ६९ ७० तानमूनपश्यन्नपि शिशुजालेषु ७१ ७२ शोचति के योजयति एवमिति ७३ एवं गृहासक्तिरित्यामपि अ
नर्थहेतुर्मनुष्यस्य त्वतिनिंदितेत्याह यः प्राप्येति ७४ ॥ ॥ त्येकादशे सप्तमः ॥ ॥७॥ ॥अष्टमेऽजगरादिभ्यो नवभ्यः शिक्षितं गुणः

कपोतश्चात्मजान्बद्धानात्मनोऽप्यधिकान्प्रियान् ॥ भार्यां चात्मसमां दीनो विललापातिदुःखितः ६७ अहो मे पश्यता
पायमल्पपुण्यस्य दुर्मतेः ॥ अतृप्तस्याकृतार्थस्य गृहस्त्रैवर्गिको हतः ६८ अनुरूपानुकूला च यस्य मे पतिदेवता ॥ शून्ये गृहे
मां संत्यज्य पुत्रैः स्वर्याति साधुभिः ६९ सोऽहं शून्ये गृहे दीनो मृतदारो मृतप्रजः ॥ जिजीविषे किमर्थं वा विधुरो दुःखजीवितः
७० तांस्तथैवावृतान्शिग्भिर्मृत्युग्रस्तान्विचेष्टतः ॥ स्वयं च कृपणः शिक्षु पश्यन्नप्यबुधोऽपतत् ७१ तं लब्ध्वा लुब्धकः क्रूरः
कपोतं गृहमेधिनं ॥ कपोतकान्कपोतीं च सिद्धार्थः प्रययौ गृहं ७२ एवं कुटुंब्यशांतात्मा द्वंद्वारामः पतत्रिवत् ॥ पुष्णन्कुटुंबं
कृपणः सानुबंधोऽवसीदति ७३ यः प्राप्य मानुषं लोकं मुक्तिद्वारमपावृतं ॥ गृहेषु खगवत्सक्तस्तमारूढच्युतं विदुः ७४ ॥ ॥
॥ ॥इति श्रीभागवते महापु० ए० भागवद्धवसंवादे सप्तमोऽध्यायः ॥ ॥ ॥७॥ ॥ श्रीब्राह्मण उवाच ॥ ॥सुखमैंद्रियकं राजन्
स्वर्गे नरक एव च ॥ देहिनां यद्यथा दुःखं तस्मान्नेच्छेत तद्बुधः १ ग्रासं सुमृष्टं विरसं महांतं स्तोकमेव वा ॥ यदृच्छयैवापतितं ग्रसे
भा दाजगरोऽक्रियः २ शयीताहानि भूरीणि निराहारोऽनुपक्रमः ॥ यदि नोपनमेद्ग्रासो महाहिरिव दिष्टभुक् ३

अवधूतगिराप्राह विवेकायोद्धवं प्रति १ प्रारब्धकर्मभोगस्यावश्यंभावित्वात् तदर्थो धर्मे नायुर्व्ययो वृथा कर्तव्य इति अजगराच्छिक्षितमि
त्याह सुखमित्यादिना । यदैंद्रियकं सुखं तत् स्वर्गे नरके च भवत्येव यथा दुःखं तस्मात् बुधस्तन्नेच्छेत् १ शरीरनिर्वाहमात्रं तु यथा लब्धेन कर्त
व्यमित्याह ग्रासमिति । आजगरः अजगरवृत्तिः अक्रियः अनुद्यमीनः २ यदा नायं लभते तदा किं कर्तव्यं तत्राह शयीतेति अनुपक्रमः निरुद्यमः
दिष्टभुक् दैवमेव प्रापकमिति धैर्यवान् ३ श्रीगोपालायनमः श्रीकृष्णायनमः श्रीवासुदेवायनमः श्रीरामोजयति ॥ ॥ राम २६

भा॰ए॰
२१

द्विविधो मधुकृत् मधुकरं ततिष्याराशि(?)धिग ग्रह्णतीति मधुकृत् भ्रमरः मधुकरोतीत्याह त्वेन स्वरूपेणैवेति मधुमक्षिका च तत्र प्रथमा
भिक्षितमुक्तं द्वितीयाद्भिक्षितमाह सायमिति सायमिदं भोक्ष्ये श्व इदं भोक्ष्यामीति भक्षितमन्नादि न संगृह्णीत किंतु पाणिपात्र
स्तन्मात्रया ह्रीयद्धा उदरमेवामत्रं पात्रं यस्य सः एकभिक्षाया मुष्टिमात्रग्राही भवेत् संग्रही तु मक्षिकेव न भवति न जीवतीत्यर्थः ११ एतद्वि
वृणोति पुनः सायंतनमिति १२ स्पर्शासक्तिर्नाशहेतुरिति गजाद्भिक्षितमित्याह पदापीति पादेनापि दारवीं दारुमयीमपि गजो हि करिणीं
स्पर्शयन् निखाततृणादिपिहितगर्ते निपात्य बध्यते १३ किंच नाधिगच्छेदिति। नोपगच्छेत्। त्यागभोगविहीनो धनसंचयः परगामी भवतीत्यत्र
१४

सायंतनं श्वस्तनं वा न संगृह्णीत भिक्षितं ॥ पाणिपात्रोदरामत्रो मक्षिकेव न संग्रही ११ सायंतनं श्वस्तनं वा न संगृह्णीत भिक्षुकः ॥
मक्षिका इव संगृह्णन् सह तेन विनश्यति १२ पदापि युवतीं भिक्षुर्न स्पृशेद्दारवीमपि ॥ स्पृशन् करीव बध्येत करिण्या अंगसंगतः
१३ नाधिगच्छेत्स्त्रियं प्राज्ञः कर्हिचिन्मृत्युमात्मनः ॥ बलाधिकैः स हन्येत गजैरन्यैर्गजो यथा १४ न देयं नोपभोग्यं च लुब्धैर्यद्दुःख
संचितं ॥ भुंक्ते तदपि तच्चान्यो मधुहेवार्थविन्मधु १५ सुदुःखोपार्जितैर्वित्तैराशासानां गृहाशिषः ॥ मधुहेवाग्रतो भुंक्ते यतिर्वै गृह
मेधिनां १६ ग्राम्यगीतं न शृणुयाद्यतिर्वनचरः क्वचित् ॥ शिक्षेत हरिणाद्बद्धान्मृगयोर्गीतमोहितात् १७ नृत्यवादित्रगीतानि जु
षन् ग्राम्याणि योषितां ॥ आसां क्रीडनको वश्य ऋष्यशृंगो मृगीसुतः १८ जिह्वयातिप्रमाथिन्या जनो रसविमोहितः ॥ मृत्युमृच्छ
त्यसद्बुद्धिर्मीनस्तु बडिशैर्यथा १९ श्रीरामाय

मधुहा गुरुरित्याह न देयमिति। तदन्यो बलात् भुंक्ते तदप्यन्यस्तवान्यः मधु तन्मक्षिकाभिः संचितं मधु यथा भुंक्ते तद्वत् ननु सुगृहस्थ
नं कथमन्यो भोक्ष्यति हरिष्यतीत्येतितत्राह अर्थवित् लिंगैरर्थं तत्रोपायं च वेत्तीत्यर्थवित्। यथा मधुहा तरुकोटरादिगतं मधु वेत्ति
हरति च तद्वद्यमं विनापि भोगः संभवतीत्यत्रापि स एव गुरुरित्याह सुदुःखैरिति आशासानां मिति वक्तव्ये वर्णलोपः आर्षः यतिर्वै
ब्रह्मचारी च यत्यन्त्यस्वामिनावुभौ ॥ तयोरन्नमदत्त्वा तु भुक्त्वा चांद्रायणं चरेदिति गृहिणामावश्यकत्वेन दानविधानात् १६
हरिणाद्भिक्षितमाह ग्राम्येति। भगवद्गीतं शृणुयादेव मृगयोर्लुब्धकस्य १७ हरिणीशावस्य हरिणीसुत ऋष्यशृंगोपि गुरुरिति
व्यवहृत्याह नृत्येति वश्यो बभूवेति शेषः १८ रसासक्तिर्नाशहेतुरिति मीनाद्भिक्षितमित्याह जिह्वयेति। अतिप्रमाथिन्या अतिक्षो

१५
ख
ना॰ ५
राम
२१

ननु समर्थोपि शयीतेव किं ओजइत्याह ओजइति । ओजः इंद्रियबलं सहो मनोबलं बलं शारीरमेव तैर्युक्तमपि देहमकर्मकमेव बिभृयात् शयान
इव भवेत वीतनिद्रः स्वार्थे दत्तदृष्टिश्च भवेत् न पुनरीहितेंद्रियवानपि तैरिंद्रियैर्नारदिव्यापारमपि निवारयेत् समुद्राछिक्षितमाह मुनिरिति ब
हिः प्रसन्नः स्वच्छो अंतर्गंभीरश्च दुर्विगाह्यः एवंभूतइति परिकल्पितुमशक्यः अलक्ष्याभिप्रायत्वात् दुरत्ययः ४ यः अनतिक्रमणीयस्तेजस्वित्वा
त् अनंतपारः कालतो देशतश्चापरिछेद्यः स्वरूपाविर्भावात् अक्षोभ्यः अविकार्यः रागाद्यभावात् स्तिमितोदः निश्चलोदकोर्णवो यथा तद्वदेवेत्यु
णोभवेदित्यर्थः ५ किंच वर्षासु सरिद्भिः समृद्धोपि सागरो यथा नोत्सर्पेत ग्रीष्मे तद्धीनोपि न शुष्येत् तथा समृद्धकामस्तद्धीनो वा न[illegible]नेत्रोः न

ओजःसहोबलयुतं बिभ्रद्देहमकर्मकं ॥ शयानो वीतनिद्रश्च नेहेतेंद्रियवानपि ४ मुनिः प्रसन्नगंभीरो दुर्विगाह्यो दुरत्ययः ॥ अनंतपा
तेरो ह्यक्षोभ्यः स्तिमितोद इवार्णवः ५ समृद्धकामो हीनो वा नारायणपरो मुनिः ॥ नोत्सर्पेत न शुष्येत सरिद्भिरिव सागरः ६
दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेंद्रियः ॥ प्रलोभितः पतत्यंधे तमस्यग्नौ पतंगवत् ७ योषिद्धिरण्याभरणांबरादि द्रव्येषु माया
रचितेषु मूढः ॥ प्रलोभितात्मा ह्युपभोगबुद्ध्या पतंगवन्नश्यति नष्टदृष्टिः ८ स्तोकं स्तोकं ग्रसेद्ग्रासं देहो वर्तेत यावता ॥ गृहा
नहिंसन्नातिष्ठेद्वृत्तिं माधुकरीं मुनिः ९ अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः ॥ सर्वतः सारमादद्यात्पुष्पेभ्य इव
षट्पदः १०

वेदित्यर्थः अत्र हेतुः नारायणपरः ननु विषयपरइति ६ रूपगंधस्पर्शशब्दरसैः पंचभिर्विषयैर्मोहिताः पतंगमधुकरगजहरिणमीनाः हताः
अतस्तेष्वनासक्तोपि वैते गुरवः स्तदुक्तं पतंगमातंगकुरंगभृंगमीना हताः पंचभिरेव पंच । एकः प्रमादी स कथं न हन्यते यः सेवते पंचभिरेव पंचेति ।
तत्र रूपविलासमोहितो नश्यतीति पतंगाछिक्षितमाह दृष्ट्वेति तस्या भावैः प्रलोभितः ७ स्त्रियमुपलक्षणीकृत्यैतत्प्रपंचयति योषिदि
ति ८ मधुकराच्छिक्षितमाह स्तोकमिति गृहान् गृहस्थान् अहिंसन् अपीडयन् अयं भावः यथा मधुकरो विशिष्टगंधलोभेनैकस्मि
न्नेव पद्मे वसन् अस्तमये मुकुलिते तस्मिन् बध्यते एवं मुनिरपि गुणलोभेनैकमेव गृहमाश्रितस्तन्मोहेन बध्यतइति ९ किंच अणु
भ्यश्चेति १० श्रीरामचंद्राय नमः श्रीवासुदेवाय नमः श्रीगोपालाय नमः श्रीरामोजयति श्रीकृष्णाय नमः श्रीरामाय ॥

दुर्जयत्वमुपपादयति इंद्रियाणीति द्वाभ्यां अयं भावः यथाहारस्तम्भ्यते तर्ह्यन्येंद्रियजयः केवलं भवति रसनेंद्रियं तु वर्धते यदि तु भु
ज्यते तर्हि पुनश्च रसासक्त्या सर्वेंद्रियक्षोभः स्यात् अतो रसासक्तिं परित्यज्यैव यथावद्भुंजीतेति प्राणवृत्त्यैव संतुष्येदित्यत्रोक्तम
पि रसनस्याति दुर्जयत्वज्ञापनायोच्यत इति विशेषः २० २१ पिंगलाया नैराश्येनोपशिक्षितं वक्तुं तदाख्यानमाह पिंगलेत्यादि
ना मे मया शिक्षितं २२ स्वैरिणी कामचारिणी संकेते रतिस्थाने २३ तान्वित्तवतः सेनान् अत एव शुल्कदान् मूल्यदान् कांतान्
सुरतार्हान् २४ अपि स्वभावनायां अन्योपि मामुपैष्यतीत्येवं दुराशया पेतुत्तरेणान्वयः २५ द्वार्यवलंबमाना पुनः प्रविशति पु

इंद्रियाणि जयंत्याशु निराहारा मनीषिणः॥ वर्जयित्वा तु रसनं तन्निरन्नस्य वर्धते २० तावज्जितेंद्रियो न स्याद्विजितान्येंद्रियः
पुमान्॥ न जयेद्रसनं यावज्जितं सर्वं जिते रसे २१ पिंगला नाम वेश्यासीद्विदेहनगरे पुरा॥ तस्या मे शिक्षितं किंचिन्निबोध
नृपनंदन २२ सा स्वैरिण्येकदा कांतं संकेत उपनेष्यती॥ अभूत्काले बहिर्द्वारि बिभ्रती रूपमुत्तमं २३ मार्ग आगच्छतो
वीक्ष्य पुरुषान्पुरुषर्षभ॥ तान्शुल्कदान्वित्तवतः कांतान्मेनेर्थकामुका २४ आगतेष्वपयातेषु सा संकेतोपजीविनी॥
अप्यन्यो वित्तवान्कोपि मामुपैष्यति भूरिदः २५ एवं दुराशया ध्वस्तनिद्रा द्वार्यवलंबिनी॥ निर्गच्छंती प्रविशती निशीथं सम
पद्यत २६ तस्या वित्ताशया शुष्यद्वक्त्राया दीनचेतसः॥ निर्वेदः परमो जज्ञे चिंताहेतुः सुखावहः २७ तस्या निर्विण्णचित्ताया
गीतं शृणु यथा मम॥ निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः २८ न ह्यंगाजातनिर्वेदो देहबंधं जिहासति ॥ पिंगलो
वाच अहो मे मोहविततिं पश्यताविजितात्मनः॥ या कांतादसतः कामं कामये येन बालिशा २९

नानिर्गच्छति एवं कुर्वती निशीथमर्धरात्रं प्राप २६ निर्वेदः अलंबुद्धिः चिंताहेतुः चिंतानिवृत्तिहेतुर्यस्य सः २७ यथा यथावत् मम मत्तः शृणु तत्
किं निर्विण्णाया गीतश्रवणेन तत्राह हि यस्मात् पुरुषस्याशापाशानां निर्वेदोऽसिर्यथा छेत्ता तत्र हेतुः न हाति अंग हे राजन् २८ अविजिता
त्मत्वे हेतुः याहं बालिशा विवेकशून्या तस्याः कुतो येन कारणेन असतस्तुच्छान्नरात् कामं कामये २९ श्रीरामभद्राय नमः श्रीराम

भिति
ध

बालिशत्वं प्रपंचयति संतमिति चतुर्भिः समीपे संतं अंतर्यामित्वात् इममपरोक्षमीश्वरं ३० अतिविगर्ह्या विनिंद्या या वार्ता जीविका तया कु
तः सांकेत्येन या रतिः तया बहुश्रीह्णिणा स्वविशेषण वा परितापं प्रपंचयति स्त्रैणमिति स्त्रीलंपटात् अथतृष्णार्थतृषः लुब्धात् अतएवानु
शोच्यात् नरात् या अहं वित्तं रतिं चेछती तया वृथा आत्मा परितापितः दुःखीकृत केनचित्तमिछती तेन नरेण क्रीतेन स्वयं विक्रीतेनात्म
नादेहेन ३१ अहोधिग्मायाहमतिबंधमक्तितंभजामी साहयदिति वंशो नाम स्थूणासुनिहितः स्तिर्यग्वेणुः वंश्यास्तस्मिन् लुभयतो नि

संतं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय।।अकामदं दुःखभयाधिशोकमोहप्रदं तुछमहं भजेऽज्ञा ३० अ
हो मयात्मा परितापितो वृथा सांकेत्यवृत्यातिविगर्ह्यवार्तया।।स्त्रैणान्नराद्यार्थतृषोनुशोच्यात् क्रीतेन वित्तं रतिमा
त्मनेछती ३१ यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचारोमनखैः पिनद्धं।।क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं मदुपैति कान्या
३२ विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः।।यान्यमिछंत्यसत्यस्मादात्मदात्काममच्युतात् ३३ सुहृत्प्रेष्ठतमो नाथ आ
त्मा चायं शरीरिणां।।तं विक्रीयात्मनैवाहं रमेनेन यथा रमा ३४ कियत्प्रियं ते व्यभजन्कामा ये कामदा नराः।।आद्यंतवंतो
भार्याया देवा वा कालविद्रुताः ३५ नूनं मे भगवान्प्रीतो विष्णुः केनापि कर्मणा।।निर्वेदोयं दुराशाया यन्मे जातः सुखा
वहः ३६ मैवं स्युर्मंदभाग्यायाः क्लेशा निर्वेदहेतवः।।येनानुबंधं निर्हृत्य पुरुषः शममृछति ३७

हिता वेणवः अस्थिभिरेव निर्मिता वंशादयो यस्मिन् तत्र पृष्ठे शीर्षमस्थि यस्तवंशः पार्श्वास्थीनि वंश्यानि स्थूणा हस्तपादास्थीनि तथा
त्वचा रोमभिर्नखैश्च पिनद्धं छादितं तथापि क्षरंति नवद्वाराणि यस्मिन् तत् एवं विश्वतागाररूपं नरशरीरं मेततं मत्तोन्या का वा कांतबु
ध्या उपैति सेवते ३२ सत्संगतो सत्याममप्यहो मम मोह इति आह विदेहानामिति द्वाभ्यां हमसती अच्युतादन्यं कामं भोगमिछती सा ३३
एवं निर्विण्णा सती अतः परमेवं करिष्यामीत्याह सुहृदिति आत्मायमीश्वरः आत्मनैव आत्मानमेव निवेद्य तं विक्रीय विशेषेण क्रीत्वा अनेनै
व सह रमे रमा लक्ष्मीर्यथा ३४ अन्यस्यासेव्यत्वं दर्शयति कियदिति आद्यंतवंतो ये कामाः विषयाः कामदा नरा वा देवा वा कालकवलि
ताः भार्यायाः कियत्प्रियं कृतवंतः न किंचित् अतो नेहामुत्र च तद्व्यतिरिक्तः कोपि सेव्योस्तीत्यर्थः ३५ मैवमिति।मंदभाग्यावेदहस्या
× एवं निश्चित्य स्वभाग्यमभिनंदति नूनमिति दुराशा आशा यस्याः तस्या मे ३६ ननु धनाप्राप्त्या क्लिष्टासि कथं विष्णुप्रीतस्तत्राह ×१

नत्वेवं निर्वेदहेतवः क्लेशा नस्युः केनचित्सुकृतेन अनुबंधं स्नेहादि
निर्हृत्य परित्यज्य ३७

अतस्तेन श्रीविष्णुनानुपकृतं कृतमुपकारं निर्वेदलक्षणं ग्राम्येषु नरेषु विषयेषु वा संगताः ३८ कथं व्रजसि तदाह संतुष्टेति ३९ ननु व्रजला
दीन्हित्वा अमुनैवेति कोयं नियमः तत्राह संसारेति। मुषितं ईक्षणं अपहृतविवेकं ४० तर्हि किमात्मत्राणोपाधिना भजिष्यसि। ननु त्रसर्वतो नि
र्विद्य भगवद्भजने प्रवृत्तस्यात्मन एव समर्थत्वादित्याह आत्मैवेति यदा एवं जगत्पश्येत्ततश्चाप्रमत्तः सन् निखिलात् इहामुत्र च भोगान्निर्विद्येत
तदाहि आत्मैवात्मनो गोप्ता इत्यन्वयः अतः केवलं प्रेम्णैव भजामीति भावः ४१ कांतस्य तर्षोभिलाषः ततो जातां ४२ फलितमाह आ

तेनोपकृतमादाय शिरसा ग्राम्यसंगताः ॥ त्यक्त्वा दुराशाः शरणं व्रजामि तमधीश्वरं ३८ संतुष्टा श्रद्दधत्येतद्यथालाभेन जी
वती ॥ विहराम्यमुनैवाहमात्मना रमणेन वै ३९ संसारकूपे पतितं विषयैर्मुषितेक्षणं ॥ ग्रस्तं कालाहिनात्मानं कोन्यस्त्रा
तुमधीश्वरः ४० आत्मैव ह्यात्मनो गोप्ता निर्विद्येत यदाखिलात् ॥ अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना जगत् ४१ श्रीब्राह्मण
उवाच एवं व्यवसितमतिर्दुराशां कांततर्षजां ॥ छित्त्वोपशममास्थाय शय्यामुपविवेश सा ४२ आशा हि परमं दुःखं नैराश्यं
परमं सुखं ॥ यथा संछिद्य कांताशां सुखं सुष्वाप पिंगला ४३ इत्येकादशे अष्टमोध्यायः ॥ ॥ ॥ श्रीब्राह्मण उवाच
परिग्रहो हि दुःखाय यद्यत्प्रियतमं नृणां ॥ अनंतं सुखमाप्नोति तद्विद्वान्यस्त्वकिंचनः १ सामिषं कुररं जघ्नुर्बलिनो ये निरामि
षाः ॥ तदामिषं परित्यज्य स सुखं समविंदत २ न मे मानापमानौ स्तो न चिंता गेहपुत्रिणां ॥ आत्मक्रीड आत्मरतिर्विचरामी
ह बालवत् ३ द्वावेव चिंतया मुक्तौ परमानंद आप्लुतौ ॥ यो विमुग्धो जडो बालो यो गुणेभ्यः परं गतः ४

शाहीति ४३ ॥ ॥ इत्येकादशे अष्टमः ॥ ॥ ॥ नवमे कुररादिभ्यो देहतश्चोपशिक्षितं ॥ श्रुत्वा यदुः कृतार्थोभूदिति कृष्णेन वर्णितं १
कुररादिशिक्षितमाह परिग्रह इति। यद्यत्प्रियतमं तस्य तस्य परिग्रहस्तद्दुःखाय परिग्रहो दुःखमिति विद्वान् सन् यस्त्वकिंचनस्तत्परिग्रहः न तु
दुः १ तदाह सामिषमिति २ अर्भकशिक्षामाह नेति गेहपुत्रिणां तद्वतां या भवति सा चिंता मे नास्ति आत्मन्येव क्रीडा यस्य आत्मनि रतिः
प्रीतिर्यस्य सः ३ ननु ज्ञसर्वज्ञयोः किं साम्यं येनेत्थं त्वं परमसुखमित्याह द्वाविति। विमुग्धः अज्ञः जडः अनुद्यमः एवंभूतो यो बालः यश्च प्रकृतेः प
रमीश्वरं प्राप्तस्तौ द्वौ ४ श्रीरामाय ॥ ॥

मे२

कुमार्याः शिक्षितं कुमार्याख्यायिकामाह क्वचिदित्यादिना वृणानान् वरणायागतान् बंधुषु पित्रादिषु ५ शंखाः शंखवलयाः महद्यथा भवति तथा स्वनं चक्रुः ६ सा महती बुद्धिमती तत्स्वयं शाल्यवहननं जुगुप्सितं वरैरिङ्गिताद्योतकं एकैकशः क्रमेणैकैकं बभंज करादपसारितवती ७ निरभिदत्पृथक्कृतवती ८ ननु कुमार्यास्तव कथं संगतिस्तत्राह लोकानिति ९ वास इति प्रथमार्धं तेन कलहहेतुर्वार्तागोष्ठी हेतुर्भवेदित्यर्थः १० चित्तैकाग्र्यतो वृत्तिस्फूर्तिलक्षणसमाधिहेतुरिति शरकारादुपशिक्षितमाह मन इति तत्रोपायमाह जितेति आसनजये श्वासज

क्वचित्कुमारी त्वात्मानं वृणानान्गृहमागतान्॥ स्वयं तानर्हयामास क्वापि यातेषु बंधुषु ५ तेषामभ्यवहारार्थं शालीन्रहसि पार्थिव॥ अवघ्नंत्याः प्रकोष्ठस्थाश्चक्रुः शंखाः स्वनं महत् ६ सा तज्जुगुप्सितं मत्वा महती व्रीडिता ततः॥ बभंजैकैकशः शंखान् द्वौ द्वौ पाण्योरशेषयत् ७ उभयोरप्यभूद्घोषो ह्यवघ्नंत्याः स्म शंखयोः॥ तत्राप्येकं निरभिददेकस्मान्नाभवद्ध्वनिः ८ अन्वशिक्षमिमं तस्या उपदेशमरिंदम॥ लोकाननुचरन्नेतान् लोकतत्वविवित्सया ९ वासे बहूनां कलहो भवेद्वार्ता द्वयोरपि॥ एक एव चरेत्तस्मात्कुमार्या इव कंकणः १० मन एकत्र संयुंज्याज्जितश्वासो जितासनः॥ वैराग्याभ्यासयोगेन ध्रियमाणमतंद्रितः ११ यस्मिन्मनो लब्धपदं यदेतच्छनैः शनैर्मुंचति कर्मरेणून्॥ सत्वेन वृद्धेन रजस्तमश्च विधूय निर्वाणमुपैत्यनिंधनं १२

यस्तस्य च जये श्वासाधीनं मनो निश्चलं भवति। ननु क्षणं निश्चलं सदपि मनो विषयवासनया पुनर्विक्षिप्येत सुषुप्ताविव सर्वथा लीयेत वा तत्राह वैराग्येति वैराग्येणाविक्षिप्यमाणं अभ्यासयोगेन लक्ष्ये ध्रियमाणं स्थिरीक्रियमाणं ११ एकत्रेति कुत्रेत्याह यस्मिन्निति। यल्लयविक्षेपात्मकं मनः एतद्यस्मिन्परमानंदरूपे भगवति लब्धास्पदं सत्कर्मरेणून् कर्मवासनाः मुंचति तस्मिन्नेव ननु कर्मवासनात्यागेऽपि सुषुप्तिवल्लयो दुर्वारः नेत्याह सत्वेनेति। वृद्धेन उपशमात्मकेन रजस्तमसोरभावे विक्षेपलययोरभावान्निर्वाणं वृत्तिशून्यध्येयाकारेणावस्थानमुपैति कुतः अनिंधनं निंधनं गुणाः तत्कार्यं च तद्रहितं तदुक्तं योगशास्त्रे। मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः। यासंप्रज्ञातनामासौ समाधिरभिधीयत इति १२ श्रीरामभद्राय नमः श्रीवासुदेवाय नमः श्रीगोपालाय नमः श्रीरामो जयति ॥ ॥

तत्तश्चनेद्वैतस्फूर्तिरित्याह। तदेतिबहिर्द्दर्शनादिना अंतरस्मृत्या इषौगतात्मा तस्य कृत्नुकर्णे दत्तचित्तः भेरीघोषेणैतिके व्रजंतं नृपतिमपि न वेद तद्वत् १३
सर्पादिक्षितमाह एकचारीति। योगिसमर्दस्यापि त्यागे कुमारीगुरुर्जनसंगत्यागे सर्पः स यथा जनाधकमान एकाकी विचरति नियतनिकेतरहितश्च स
४ दाप्रमत्तश्च एकांतवासी च आचारैर्गतिभिः स्वविषो निर्विषो वेति न लक्ष्यते च असहायश्च मितभाषी च तद्वन्मुनिर्वर्ततेत्यर्थः १४ किंच गृहारंभ इति।
ध्रुवे वात्मनः नश्वरदेहस्य सुखं यथा भवति तथा वर्धते १५ कारकसामग्रीनिरपेक्षा केवलादीश्वराद्विश्वसृष्टिसंहारा ऊर्णनाभिदृष्टांतेन मया संभावि
ताविति वक्तुं प्रथमं संहारप्रकारमाह एक इति सार्धत्रयेण एकः कारकनिरपेक्षः पूर्वसृष्टमिदं जगत् कालकलया कालशक्त्या संहृत्य १६ एक एवाद्वितीय

तदैवमात्मन्यवरुद्धचित्तो न वेद किंचिद्बहिरंतरं वा। यथेषुकारो नृपतिं व्रजंतमिषौ गतात्मा न ददर्श पार्श्वे १३ एकचार्यनिकेतः स्या
दप्रमत्तो गुहाशयः। अलक्ष्यमाण आचारैर्मुनिरेकोल्पभाषणः १४ गृहारंभो हि दुःखाय विफलश्चाध्रुवात्मनः। सर्पः परकृतं वे
श्म प्रविश्य सुखमेधते १५ एको नारायणो देवः पूर्वसृष्टं स्वमायया। संहृत्य कालकलया कल्पांत इदमीश्वरः १६ एक एवाद्वि
तीयोभूदात्माधारोखिलाश्रयः। कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु १७ सत्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः। परावं
राणां परम आस्ते कैवल्यसंज्ञितः १८ केवलानुभवानंदसंदोहो निरुपाधिकः। केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकां १९
संक्षोभयन्सृजत्यादौ तया सूत्रमरिंदम॥ तामाहुस्त्रिगुणव्यक्तिं सृजंतीं विश्वतोमुखं २०

सजातीयविजातीयभेदशून्योभूत् १७ कारणभूतासु सत्वादिषु शक्तिष्वपि साम्यं नीतासु सतीषु। साम्यं गुणसाम्यं प्रधानं तदुपाधिः पुरुषस्त
योरीश्वरः परावराणां परे ब्रह्मादयः अवरे अन्ये च मुक्तास्तेषां परमः प्राप्य आस्ते कुतः कैवल्यसंज्ञितः मोक्षशब्दाभिधेयः १८ तत्र हेतुः
सम्महः केवलेति निर्विषयः स्वप्रकाशः आनंदानां संदोहः परमानंद इत्यर्थः कुतः निरुपाधिकः अतः केवलादेव सृष्टिं दर्शयति केवलेनात्मानुभावेन कालेन
सूत्रं क्रियाशक्तिप्रधानं महत्तत्त्वं सृजति जीवसंसारहेतुश्च तत्सूत्रं सृष्टेपि त्वमाभौरिति संबोधयति अरिंदम अरीन्रागादीन् दमयितुं समर्थ १९
सूत्रस्यैव व्यक्तिशब्देनोच्यमानस्य तामितिस्त्रीलिंगेन परामर्शः त्रिगुणव्यक्तिं गुणत्रयस्य कार्यं अत एव विश्वतोमुखं नानाविधं त्रिगुणात्मकं वि
श्वं अहंकारद्वारेण सृजंतीं २० श्रीरामाय नमः॥

परस्त्रलोकः त

त्रिगुणकार्यस्य सूत्रसंज्ञायाः कारणमाह यस्मिन्निति कारणभूते समष्टिरूपे यस्मिन्निदं विश्वं प्रोतं ग्रथितं वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रे
णायं च लोकः सर्वाणि च भूतानि संदृब्धानीति श्रुतेः येन वा स्वात्मप्राणरूपेण जीवः संसरति २० तदेवं विशिक्षितमर्थमुत्कादृष्टांतमाह यथेति।
हृदयादुद्धृतां वक्त्रतः वक्त्रेण संतत्य प्रसार्य विहृत्य क्रीडित्वा २१ भगवद्ध्यानपराणां तत्सारूप्यं न चित्रमिति परोक्षकृतो भ्रमरविशेषात् ज्ञातमित्या
ह यत्र यत्रेति। सकलमेकाग्रं २२ कुड्यां प्रवेशितः निरुद्धः भयेन ध्यायन्सात्मतां तत्सारूप्यं सात्मतामिति पाठे त्वार्षता पूर्वरूपमसंत्यजन्नित्यस्या
यमभिप्रायः यदा तेनैव देहेनान्यसारूप्यं दृश्यते तदा किं वक्तव्यं देहांतरेण सारूप्यं घटत इति २३ स्वदेहादेव शिक्षितमाह स्वात्मेति स्वात्मनो देहाच्छि

यस्मिन्प्रोतमिदं विश्वं येन संसरते पुमान् २० यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रतः। तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः
२१ यत्र यत्र मनो देही धारयेत्सकलं धिया। स्नेहाद्द्वेषाद्भयाद्वापि याति तत्तत्सरूपतां २२ कीटः पेशस्कृतं ध्यायन् कुड्यां तेन
प्रवेशितः। याति तत्सात्मतां राजन् पूर्वरूपमसंत्यजन् २३ एवं गुरुभ्य एतेभ्य एषा मे शिक्षिता मतिः। स्वात्मोपशिक्षितां बुद्धिं
शृणु मे वदतः प्रभो २४ देहो गुरुर्मम विरक्तिविवेकहेतुर्बिभ्रत्स्म सत्त्वनिधनं सततार्त्युदर्कं। तत्त्वान्यनेन विमृशामि यथा
तथापि पारक्यमित्यवसितो विचराम्यसंगः २५ जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णाति यत्प्रियचिकीर्षया वितन्वन्। त
स्वांते सकृच्छ्रमवरुद्धधनः स देहः सृष्ट्वास्य बीजमवसीदति वृक्षधर्मा २६

क्षितां २४ गुरुत्वे हेतुः विरक्तिविवेकयोर्हेतुः विरक्तिहेतुत्वमाह सत्त्वनिधनं उत्पत्तिविनाशौ बिभ्रत्स्म किं च सततं संततं आर्त्युदर्कं दुःखमेवोत्त
रफलं बिभ्रत् यद्वा सततार्तिरेव उदर्के उत्तरफलं यस्य तत् सत्त्वनिधनं बिभ्रत् विवेकहेतुत्वमाह तत्त्वानीति यथा यथावत् एवं मत्युपकारित्वेपि देहे ने
वास्था कर्तव्येत्याह तथापीति। पारक्यं श्वसृगालादिभक्ष्यमिति निश्चितवान् २५ सततार्त्युदर्कतां प्रपंचयति जायेति द्वाभ्यां। यस्य देहस्य प्रियचि
त कीर्षया भोगसंपादनेच्छया द्विवर्गान्वितन्वन् सन्पुष्णाति पुरुषः कथंभूतः सकृच्छ्रं यथा भवति तथा अवरुद्धानि संचितानि धनानि येन सः देहः विशे
षणं वा स देहः स्वांते स्वस्यायुषोंते अवसीदति नश्यति किं च देहनाशेपि न दुःखसमाप्तिरित्याह अस्य पुरुषस्य देहांतरबीजं कर्म सृष्ट्वेति वृक्षस्य
वधर्मो यस्य सः २६ ॥

किंच जिह्वेति अमुं देहवंतं अभिमानिनं पुरुषं एकतः रसं प्रति जिह्वा अपकर्षति। आकृष्य नयति। कर्हिचित् तर्षो पिपासा जलं प्रति। शिश्नो व्यवायं प्रति त्वक् स्पर्शं प्रति उदरं अन्नमात्रं प्रति। श्रवणं शब्दं प्रति। घ्राणो गंधं प्रति। चपलदृक् रूपं प्रति। क्व च कर्मशक्तिः स्वस्वविषयं प्रति कर्मशक्तिः। अन्यत्स्पष्टं। कर्मेंद्रियं। लुनंति त्रोटयंति २७ तदेवं देहो गुरुरित्यादि त्रिभिर्विरक्तिविवेकहेतुत्वमुपपाद्येदानीमस्य देहस्य दुर्लभत्वं दर्शयन्नीश्वरनिष्ठां विधत्ते सृष्ट्वेति द्वाभ्यां पुराणि शरीराणि पुरुषं पुरुषदेहं ब्रह्मणो अवलोकाय अपरोक्षाय धिषणा बुद्धिर्यस्मिन् तं तदुक्तं। तास्तां मे पौरुषी प्रियेति। श्रुतिश्च पुरुषे त्वेवाविस्तरामात्मेत्यादि ईश्वरो हि करणाधिष्ठात्री रश्म्यादिदेवताः वपारभिः सह सृष्टवान् तास्तत्प्रतिभोगार्थं शरीरमयाचंत स च ताभ्यो गोशरीरं अ

जिह्वैकतोमुमपकर्षति कर्हि तर्षा शिश्नोन्यतस्त्वगुदरं श्रवणं कुतश्चित्। घ्राणोन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति २७ सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान्। तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः २८ लब्ध्वा सुदुर्लभमिदं बहुसंभवांते मानुष्यमर्थदमनित्यमपीह धीरः। तूर्णं यतेत न पतेदनुमृत्यु यावन्निःश्रेयसाय विषयः खलु सर्वतः स्यात् २९ एवं संजातवैराग्यो विज्ञानालोक आत्मनि। विचरामि महीमेतां मुक्तसंगो

द अनहंकृतिः ३० न ह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलं। ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः ३१

पुरुषशरीरं

श्वशरीरं यथाक्रममानीतवान् ततस्ता देवताः सो अब्रवीद्यथायतनं वः सुरादिस्थानं अस्मिन्देहे प्रविशतेति तदाह ताभ्य इतीत्यादि तथा ताभ्यो गामानयत्ता अब्रुवन्न वै नोयमलमिति ताभ्यो श्वमानयत्ता अब्रुवन्न वै नोयमलमिति ताभ्यः पुरुषमानयत्ता अब्रुवन् सुकृतं बतेति च २८ तस्माद्बहूनां संभवानां जन्मनामंते मानुष्यं अनित्यमप्यर्थदं पुरुषार्थप्रापकं दैवाल्लब्ध्वा इदमनुमृत्यु अन्वनु निरंतरं मृत्युर्यस्य तत् यावन्न पतेत्तावदेव तूर्णं शीघ्रं निःश्रेयसाय यतेत। विषयः पुनः सर्वतः पश्वादियोनिष्वपि स्यादेव २९ तदेवं हेयोपादेयविवेकं बहुधा निरूप्येदानीं यदुक्तं त्वं तु कल्यः कविर्दक्ष इत्यादि तत्रोत्तरमाह एवमिति। एवं बहुभ्यो गुरुभ्यः शिक्षितेन विशिष्टज्ञानमेवालोकः प्रदीपो यस्य सः संजातवैराग्यः। अत्र आत्मविशेषणं आत्मनि स्थित एव महीं विचरामि ३० ननु किं बहुभिर्गुरुभिर्न हि श्वेतकेतुभृग्वादयो बहवो गुरवः आश्रितास्तत्राह न ह्येकस्मादिति। बहुधा सप्रपंचनिःप्रपंचभेदादिभिः अयं भावः नैते परमार्थोपदेष्टारो गुरवः किंत्वन्वयव्यतिरेकाभ्यामात्मन्यसंभावनादिमात्रनिवर्तकास्तेषां च बहुत्वं युक्तमेव तिष्ठति ज्ञानप्रदं तु गुरुमेकमेव वक्ष्य

तिमद्भिर्नगुरुं शांतमुपासीतेति। उक्तं च। तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेयउत्तममिति ३१

त्र मु

विप्रोदत्तात्रेयः योगर्धिमापुरुभयं यदुर्हैहयाद्याइत्युक्त्वा यथागतं तथैव यदृच्छया पर्यटितुमगादित्यर्थः ३२ भवान्स्वीयं कुलमिति श्लाघते नः पूर्वे
षां पूर्वजइति अत्र संग्रहश्लोकाः ॥ कपोतमीनहरिणमीनकुमारीगजपन्नगाः ॥ पतंगकुररश्चाष्टौ हेयार्थे गुरवो मताः १ मधुकृन्मधुहर्ता चापिंग
लाबहूयोस्त्रयः । उपादेयार्थविज्ञाने त्रोषाः षट् ध्याद्यो मताः २ तद्वांतरभेदश्चतत्रतत्र स्फुटीकृतः । अध्यायत्रितये चाष्टनवाष्टाकीर्तिताः क्रमात्
३३ ॥ ॥इति एकादशे नवमोऽध्यायः ॥ ॥ ॥चतुर्विंशतिगुर्वाख्यालब्धसंभावनाभुवः ॥ उद्धवस्यात्मतत्वाप्त्यै साधनोक्तिरतः परं १ दृश्य
मेदेहसंबंधात्संसृतिर्नात्मनः स्वतः । इत्येतद्वर्ण्यते मासमतांतरनिरासतः २ तदेवमन्वयव्यतिरेकाभ्यामुत्पन्नविवेकज्ञानस्य तत्वज्ञानाय इति

॥ श्रीभगवानुवाच इत्युक्त्वा स यदुं विप्रस्तमामन्त्र्य गभीरधीः ॥ वंदितोऽभ्यर्चितो राज्ञा ययौ प्रीतो यथागतं ३२ अवधूतवचः श्रुत्वा
पूर्वेषां नः स पूर्वजः ॥ सर्वसंगविनिर्मुक्तः समचित्तो बभूव ह ३३ ॥ ॥इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धव
संवादे यदुमुनिप्रश्नो नवमोऽध्यायः ॥ ॥ ॥९॥ ॥श्रीभगवानुवाच मयोदितेष्ववहितः स्वधर्मेषु मदाश्रयः ॥ वर्णाश्रमकु
लाचारमकामात्मा समाचरेत् १ अन्वीक्षेत विशुद्धात्मा देहिनां विषयात्मनां ॥ गुणेषु तत्वध्यानेन सर्वारंभविपर्ययम् २
सुप्तस्य विषयालोको ध्यायतो वा मनोरथः ॥ नानात्मकत्वाद्विफलस्तथा भेदात्मधीर्गुणैः ३ निवृत्तं कर्म सेवेत प्रवृत्तं मत्परस्त्यजे
त् ॥ जिज्ञासायां संप्रवृत्तो नाद्रियेत्कर्म चोदनां ४ यमानभीक्ष्णं सेवेत नियमान्मत्परः क्वचित् ॥ मदभिज्ञं गुरुं शांतमुपासीत मदात्मकम् ५

आत्म्यसाधनान्युपदिशति भगवान्मयेति । मयापंचरात्रादिषूक्तेष्वादधर्मेष्ववहितः अप्रमत्तः सन् तदविरोधेन वर्णाश्रमाचारमनुतिष्ठेत् १
कथमकामात्मता संभवति तत्राह अन्वीक्षेतेति । स्वधर्मैर्विशुद्धबुद्धिः सन् देहिनां विषयेषु सत्यत्वाभिनिवेशेन ये सर्वे आरंभास्तेषां फले वैपरी
त्यं पश्येत् एवं फलवैपरीत्यादकामः स्यात् २ किंच काम्यविषयाणां मिथ्यात्वादपीत्याह सुप्तस्येति । विफलः अर्थशून्यः अत्रैवं प्रयोगः इंद्रिये
र्यो बहिर्नानाबुद्धिः सा विफला नानात्मकत्वादैंद्रियकत्वाच्च मनोजन्यस्वप्नमनोरथवदिति ३ मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः नित्यनै
मित्तिके कुर्यात्त्यागात्प्रत्यवायजिहासया इति स्मृतेः अतः प्रवृत्तं काम्यं कर्म त्यजेन्निवृत्तं नित्यनैमित्तिकमेव कुर्यात् आत्मविचारे तु सम्यक्प्रवृत्तो निवृत्तं कर्म
चोदनामपि नाद्रियेत ४ किंतु यमान् अहिंसादीन् अभीक्ष्णं आदरेण सेवेत शौचादीन् नियमान् तु क्वचित् यथाशक्ति तदात्मज्ञानाविरोधेन यमान्
द्वादश नियमांश्चैकोनविंशे ध्याये वक्ष्यति किंच यमेष्वप्यादरं पं

गुरुसेवकस्य धर्मानाह अमानीति दक्षः अनलसः निर्ममः। जायादिषु ममताशून्यः गुरौ तु दृढसौहृदः असत्वरः अव्यग्रः अमोघवाक् व्यर्थालापरहि
तः एतान्येव शिष्यस्य लक्षणानि ज्ञेयानि ६ ननु स्वजायादिषु कथं निर्ममः स्यादत आह जायेति। औदासीन्ये हेतुं विवेकं दर्शयति आत्मनोऽर्थं प्रयो
जनं सर्वत्र सममेव पश्यन्निति अयं भावः सर्वदेहेष्वात्मन एकत्वात् जायादिदेहेष्विव स्वदेहे आत्मनोऽर्थः सुखादिः सम एव केन विशेषेण तेष्वभि अन्य
त्वाभिनिवेश इत्येवमुदासीनः सन् गुरुं प्रपद्येतेति ७ अहो कोऽसौ देहव्यतिरिक्त आत्मा यस्यैक्यात् सर्वेषु समः स्यात् तमाह विलक्षण इति।
स्थूलः सूक्ष्मदेहद्वयादात्मान्यः यतो विलक्षणः द्वैधा वैलक्षण्यं दर्शयति ईक्षिता स्वदृगिति द्रष्टा हि दृश्याद्विलक्षणः स्वप्रकाशश्च जडाद्विलक्षणः तथे

अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः॥ असत्वरोऽर्थजिज्ञासुरनसूयुरमोघवाक् ६ जायापत्यगृहक्षेत्रस्वजनद्रविणादिषु॥
उदासीनः समं पश्यन् सर्वेष्वर्थमिवात्मनः ७ विलक्षणः स्थूलसूक्ष्माद्देहादात्मेक्षिता स्वदृक्॥ यथाग्निर्दारुणो दाह्याद्दाहको
ऽन्यः प्रकाशकः ८ निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान्गुणान्॥ अंतःप्रविष्ट आधत्त एवं देहगुणान्परः ९ योऽसौ गुणैर्वि
रचितो देहोऽयं पुरुषस्य हि॥ संसारस्तन्निबंधोऽयं पुंसो विद्याच्छिदात्मनः १० तस्माज्जिज्ञासयात्मानमात्मस्थं केवलं परं॥ सं
गम्य निरसेदेतद्वस्तुबुद्धिं यथाक्रमं ११ श्रीरामाय

रन्यत्वे दृष्टान्तः यथाग्निर्दाहकः प्रकाशकश्च दाह्यात् प्रकाश्याच्च दारुणः काष्ठाद् अन्यस्तद्वदिति ८ अनेनैव दृष्टान्तेन नित्यत्वानादित्व विभुत्वे
कत्वादयोऽपि सिध्यन्तीत्याह निरोधेति। यथा दारुषु अन्तः प्रविष्टोऽग्निस्तत्कृतान् नाशादीन् प्राप्नोति न तु स्वतो नाशादिमान् एवं देहगुणाननित्य
३अ त्वादीन् देहात्परो नित्यादिस्वरूपोऽप्यात्मानुभवति ततश्च नित्यत्वादिभिरपि वैलक्षण्यादन्यत्वमिति ९ ननु चाग्नेर्दारुसंयोगात्तद्धर्मभाक्त्वं भावः
घटते आत्मनस्त्वसङ्गत्वात् कथं देहेन तद्धर्मैर्वा संबन्धः संबन्धे वा कुतस्तन्निवृत्तिस्तत्राह योऽसाविति। पुरुषस्येश्वरस्याधीनैर्मायागुणैर्योऽसौ
सूक्ष्मः अयं च स्थूलो देहो विरचितः पुंसो जीवस्यायं संसारस्तन्निबन्धस्तदध्यासकृतः हि यस्मादेवं तस्मादात्मविद्यानिवृत्तिकेत्याह आत्म
नो विद्या विज्ञानं तस्य छित् छेत्री आच्छिदिति वा पदच्छेदः १० यस्मादेवं तस्माज्जिज्ञासया विचारेण आत्मस्थं आत्मनि कार्यकारणसंघातेऽप
वस्थितं सम्यक् ज्ञात्वा एतत् एतस्मिन् देहादौ वस्तुबुद्धिं स्थूलसूक्ष्मक्रमेण निरसेत्त्यजेत् ११ श्रीरामाय नमः श्रीकृष्णाय ॥

भा॰ए॰

३२ गुरोर्लब्धया विद्यया विद्यातत्कार्यनिरसनक्षमेति स्फुटीकर्तुं विद्योत्पत्तिमग्न्युत्पत्तिरूपकेण निरूपयति आचार्य इति आद्यः अधरः तत्संधानं
तयोर्मध्यमं मथनकाष्ठं प्रवचनमुपदेशः विद्यानुसंधिः संधौ भवोऽग्निरिव। तथा च श्रुतिः। आचार्यः पूर्वरूपं अंतेवास्युत्तररूपं विद्या संधिः
प्रवचनं संधानमिति १२ अग्निसादृश्यमेवाह वैशारदीति। विशारदो निपुणस्तेन शिष्येण प्राप्तेति गुरुणोपदिष्टा वा अतिविशुद्धा बुद्धिर्गुण
कार्यरूपां मायां निवर्तयति प्रदाहात्मकमेतद्विश्वं जीवस्य संसृतिनिमित्तं तान्गुणांश्च दग्ध्वा असमिदग्निरिंधनस्तस्मात्कार्यजकारणे न विद्यया व्यवधाना
भावात्साक्षात्परमानंदरूपो भवतीति १३ एवं तावद्ब्रह्मप्रकाशज्ञानस्वरूपो नित्य एक एवात्मा कर्तृत्वादयश्च धर्माः तस्य देहोपाधिकास्तस्मादितिवि
क्तं सर्वमनित्यं मायामयं च अतः सर्वतो विरक्तः सन्नात्मज्ञानेन मुच्यत इत्युक्तं विलक्षणः स्थूलसूक्ष्मादित्यादिना तदेतच्छ्रुतिसमन्वयेन निराकरिष्य
र्वमतान्तरविशेषेण संदेहो माभूदिति तन्मतं निराकर्तुमनुवादयति। अथेति। अथ मन्यसे एषां जीवात्मनां कर्मकर्तॄणां सुखदुःखयोर्भोक्तॄणां च नानात्वमिति। ए
वं हि जैमिनीया मन्यन्ते अहंप्रत्ययविषय एवात्मा स च प्रतिशरीरं भिन्नः कर्तृभोक्तृरूपश्च न तु तत्स्वरूपभूतो निर्विकार एकः परमात्मास्तीति यथाहुः अहंप्रत्य

आचार्योऽरणिराद्यः स्यादंतेवास्युत्तरारणिः। तत्संधानं प्रवचनं विद्यासंधिः सुखावहः १२ वैशारदी सातिविशुद्धबुद्धिर्धुनोति मायां गुणसं
प्रसूतां। गुणांश्च संदह्य यदात्ममेतत्स्वयं च शाम्यत्यसमिद्यथाग्निः १३ अथैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोः। नानात्वमथ नि
त्यत्वं लोककालागमात्मनां १४ मन्यसे सर्वभावानां संस्था ह्यौत्पत्तिकी यथा। तत्तदाकृतिभेदेन जायते भिद्यते च धीः १५

वा यविषयो ज्ञातव्यः सर्वदेहिनामिति। तथा वैराग्यं च न संभवतीति तथा हि भोगस्थानानाम नित्यत्वाद्वैराग्यं भवेत् भोगकालस्य चानुपायकर्मबोधकागमस्य वा भोक्तु
रात्मनो वा नित्यत्वेन दर्शनीयत्याह। अथ नित्यत्वं लोककालागमात्मनां मन्यसे इति १४ न च भोग्यानां विच्छेदान्नायामयत्वाद्वैराग्यं स्यादित्याह मन्यसे इति सर्व
भावानां स्रक्चन्दनादीनां संस्था स्थितिः औत्पत्तिकी प्रवाहरूपेण नित्या यथा चक्रं निलिन कर्ता विद्वनीद्दृशं जगदिति। अतस्तत्कर्ता कश्चिदीश्वरोपि नास्तीति भावः किंच
यथा यथार्थं न तु मायामयी सर्वार्थः न चात्मस्वरूपभूतं नित्यमेकं ज्ञानमस्तीत्याह। तत्तदिति। घटपटाद्याकारभेदेन धीः जायते अतो नित्या भिद्यते च अयं भावः प्रत्यभि राम
ज्ञायते न हि नित्यज्ञानस्वरूप आत्मा अपि तु ज्ञानपरिणामवान् एव विकारित्वेनानित्यत्वप्रसंगः यथाहुः। विक्रियावत्तानरूपास्य न नित्यत्वे विरोध्यतः इति अतो मुक्ता ३२
विद्यादिरहितस्य परिणामासंभवात् कूटस्थेन तन्नाम अपुरुषार्थत्वात्तत्र निरवधिर्यत्नो न निरर्थक इति १५

तत्र तावत्तदुक्तमंगीकृत्य वैराग्योपपादनाय प्रवृत्तिमार्गस्यानर्थहेतुत्वं प्रपंचयति एवमपीत्यादिना लोकानां लोकपालानामित्यतः प्रा
क्तनेन ग्रंथेन भंगहेतुर्ध्रुवकालावयवतः संवत्सरादिरूपात् १६ अत्रापीति स्वातंत्र्याभावे दुःकर्मणो दुःखभोगस्य चासंभवादित्यर्थः १७ ननु
ये सम्यक्कर्म कर्तुं जानंति ते सुखिन एव ये तु न जानंति त एव दुःखिन इति चेत्तत्राह नेति विदुषामपि कश्चित्सुखं न विद्यते तथा मूढानामपि दुःखं न विद्यते
अतो वयं कर्मकुशलत्वात्सुखिन इति तेषां केवलं वृथैवाहंकार इत्यर्थः १८ अंगीकृत्याप्याह यदीति तद्योगमुपायं न विदुर्यथा साक्षान्मृत्युर्न भवे
त् १९ तथापि यावज्जीवं सुखं भविष्यतीति चेन्नेत्याह को न्विति । यतः अंतिके वर्तमानो मृत्युर्न तुष्टिं ददाति आघातं वधस्थानं प्रति २०

एवमप्यंग सर्वेषां देहिनां देहयोगतः ॥ कालावयवतः संति भावा जन्मादयोऽसकृत् १६ अत्रापि कर्मणां कर्तुरस्वातंत्र्यं
च लक्ष्यते ॥ भोक्तुश्च सुखदुःखानां को न्वर्थो विवशो भजेत् १७ न देहिनां सुखं किंचिद्विद्यते विदुषामपि ॥ तथा च दुःखं मू
ढानां वृथाहंकरणं परं १८ यदि प्राप्तिं विघातं च जानंति सुखदुःखयोः ॥ तेऽप्यद्धा न विदुर्योगं मृत्युर्न प्रभवेद्यथा १९
को न्वर्थः सुखयत्येनं कामो वा मृत्युरंतिके ॥ आघातं नीयमानस्य वध्यस्येव न तुष्टिदः २० श्रुतं च दृष्टवद्दुष्टं स्पर्धासूयात्यय
व्ययैः ॥ बह्वंतरायकामत्वात्कृषिवच्चापि निष्फलं २१ अंतरायैरविहितो यदि धर्मः स्वनुष्ठितः ॥ तेनापि निर्जितं स्थानं यथा ग
च्छति तच्छृणु २२ इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः ॥ भुंजीत देववत्तत्र भोगान्दिव्यान्निजार्जितान् २३ स्वपुण्योप
चिते शुभ्रे विमान उपगीयते ॥ गंधर्वैर्विहरन्मध्ये देवीनां हृद्यवेषधृक् २४

एवमस्मिँल्लोके सुखं नास्तीत्युक्तं लोकांतरेऽपि तथैवेत्याह श्रुतमिति श्रुतं स्वर्गादि तदपि दुष्टं स्पर्धा परसुखासहनं असूया परगुणे दोषाविष्करणं
४ अत्ययो नाशः व्ययोऽपक्षयः तैर्दुष्टं यद्वा व्ययो नाशः अत्ययोऽन्यस्यातिशयः नेदृष्टात्तत्प्राप्यादुःखमित्यर्थः किंच बहवोऽन्तराया वैगुण्यादिरूपा
विघ्ना यस्मिन् कामसुखे भावस्तत्त्वं तस्मात् कृषिर्यथा बहुविघ्नात् दृष्टसुखत्वेन श्रुतमपि निष्फलं २१ विघ्नवैगुण्याद्यभावमंगीकृत्यापि नाश
दुःखं दुःपरिहरमित्याह तस्य ॥ अंतरायैरिति पंचभिः निर्जितं साधितं २२ यज्ञैर्देवता इंद्रादिरूपा इष्ट्वा २३ स्वपुण्यैरुपचिते सर्वभोगसंप
न्ने देवीनां मध्ये विहरन् गंधर्वैरुपगीयते २४ श्रीरामभद्राय नमः श्रीगोपालाय नमः श्रीकृष्णाय नमः श्रीरामचंद्राय नमः ॥ ॥

भा॰ए॰
३२

नरकादिषु

कामेन इच्छया गच्छता विमानेन किंकिणीजालमालिना क्षुद्रघण्टिकासमूहयुक्तेन भिनास हस्त्रीभिः सुराक्रीडेषु क्रीडन्नात्मपातं न वेद २५
कालेन चालितः पातितः २६ प्रवृत्तिर्द्विविधा विध्यनुसारेण काम्ये कर्मणि वा तदुल्लंघनेनाधर्मे वा तत्र काम्यप्रवृत्तेर्गतिरुक्ता अधर्मप्रवृत्तेर्गति
माह यदीति। परिवेत्यन्वयः अजितेन्द्रियत्वात् कामात्मा अतः कृपणः अतो भोगे लुब्धो तृष्णाकुलः अतः स्त्रैणः स्त्रीलंपटः तदर्थं भूतविहिंस
कः २७ किंचदुष्टजनप्रलोभितो धनाद्यर्थं पशूनविधिना हत्वा तमः स्थावरतां याति २८ एवंकर्मसु प्रवृत्तस्य न सुखं नन्वनिवृत्तस्तु पसंहरति
कर्माणीति २९ तथापि लोकानां नित्यत्वादमर्त्यधर्मत्वाच्च लोकपालानां सुखमस्तीति चेन्नत्याह लोकानामिति। द्वौ परार्धौ परमायुर्यस्य तस्य

स्त्रीभिः कामगयानेन किंकिणीजालमालिना॥ क्रीडन्न वेदात्मपातं सुराक्रीडेषु निर्वृतः २५ तावत्स मोदते स्वर्गे यावत्पुण्यं समाप्य
ते॥ क्षीणपुण्यः पतत्यर्वागनिच्छन्कालचालितः २६ यद्यधर्मरतः संगादसतां वाजितेन्द्रियः॥ कामात्मा कृपणो लुब्धः स्त्रैणो
भूतविहिंसकः २७ पशूनविधिनालभ्य प्रेतभूतगणान्यजन्॥ नरकानवशो जन्तुर्गत्वा यात्युल्बणं तमः २८ कर्माणि दुःखोदर्का
णि कुर्वन्देहेन तैः पुनः॥ देहमाभजते तत्र किं सुखं मर्त्यधर्मिणः २९ लोकानां लोकपालानां मद्भयं कल्पजीविनां॥ ब्रह्मणोपि भ
यं मत्तो द्विपरार्धपरायुषः ३० गुणाः सृजन्ति कर्माणि गुणोनुसृजते गुणान्॥ जीवस्तु गुणसंयुक्तो भुंक्ते कर्मफलान्यसौ ३१
यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः॥ नानात्वमात्मनो यावत्पारतन्त्र्यं तदैव हि ३२ यावदस्यास्वतन्त्रत्वं तावदीश्वरतो भयं
य एतत्समुपासीरंस्ते मुह्यन्ति शुचार्पिताः ३३

ब्रह्मणोपि तथा च श्रुतिः। भीषास्माद्वातः पवते। भीषोदेति सूर्यः। भीषास्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पंचम इति। अतः प्रवृत्तिमार्गस्यैवमनर्थहे
तुत्वाद्धिरत्स्यात्ततो निवृत्तिरेव युक्तेति तात्पर्यार्थः ३० एतेनैव स्वयमीश्वरत्वादिप्रकारेणेश्वराभावादिप्रकारः परिहृतः अन्यदपि प्रोद्भावितं पूर्वमार्गो
कृतं निराकरोति न तु भिः तत्र यदुक्तं कर्तृभोक्तृस्वरूप एवात्मेति तन्निराकरोति गुणा इति गुणा इन्द्रियाणि कर्माणि सृजन्ति न त्वात्मा आत्मैवेन्द्रि
याणि प्रवर्तयन् कर्माणि करोतीति चेन्नेत्याह गुण इति गुणः सत्वादिर्गुणानिन्द्रियाणि अनुसृजते प्रवर्तयति न त्वात्मा अतः कर्तृत्वं तावन्नास्ति
भोक्तृत्वं मप्यौपाधिकमित्याह जीव इति गुणसंयुक्त इन्द्रियादिसंयुक्तः कुतः इत्यत आह असाविति अहंकारवानित्यर्थः ३१ यच्चोक्तमात्मनानात्वं
तदप्यौपाधिकमित्याह यावदिति गुणानां वैषम्यं अहंकारादिकार्यरूपेण तत्वात्मन एकत्वे कथं पारतन्त्र्यमुक्तं कथं वा लोकपालादीनामपि
मद्भयमित्युक्तं तत्राह नानात्वमिति ३२ यच्चाग्रहमभिप्रेतं प्रवृत्तिरेव श्रेयसीति तत्राह य एतदिति। एतद्गुणवैषम्यं तत्कृतं भोगं कर्म चेत्यर्थः
म

उपासीरन्सेवेरंस्ते शोकाद्यभिनिवेशेन शुचार्पिताः शोकव्याप्ता मुह्यन्ति ३३

तिरि

राम
३३

३४ नकेवलमनित्यतामात्रं । किंतु मायामयत्वमपीत्याह कालइति स्वभावो देवतादि परिणामे हेतुः धर्मस्तद्द्वारा कारणं गुणव्यतिकरे मायाक्षोभे सति
मामेव प्राहुः न तु मद्व्यतिरिक्तं सदिति ततो निरस्तं रेच मुक्तिहेतुत्वाच्छ्रेयस इति सिद्धं ३४ एवंतावदेकएवात्मानस्य स्वगुणकार्ये देहसंबंधकृतः संसारः
आत्मज्ञानेन च मुक्तिरित्युक्तं विलक्षणः स्थूलसूक्ष्मादित्यादिना तत्र चैवमतांतरनिरासेन दृढीकृतं अथैषामित्यादिना तत्र पृच्छति गुणेष्विति । अयमर्थः
गुणेषु सत्सु मुक्तिः सत्त्वे वा । आद्ये ज्ञानेन साधनाभावान्न मुक्तिः द्वितीये गुणेषु वर्तमानोपि तत्कार्ये देहजेषु कर्मसु सुखादिषु च कथं न बध्यते तथापि
तेराकाशवदनावृतत्वान्न बध्यत इति चेत्तर्हि बंधो न संभवतीत्याह अनपावृतः कथं बध्यत इति ३५ यदि तु सत्त्वेपि तद्देहकारणं बध्यते तन्निवृत्त्या च मु
नाहइति मते तर्हि तत्कथं ज्ञानवद्भिस्तिष्ठति । बद्धो मुक्तो वा कथं वर्तेतेत्यादि किं भुंजीत कथं भुंजीतेत्यर्थः ३६ एतत् एतद्विषयं प्रश्नं किंच एक एवात्मा

कालआत्मागमो लोकः स्वभावो धर्म एव च ॥ इति मां बहुधा प्राहुर्गुणव्यतिकरे सति ३४ श्रीउद्धव उवाच गुणेषु वर्तमानोपि देहजे
ष्वनपावृतः ॥ गुणैर्न बध्यते देही बध्यते वा कथं विभो ३५ कथं वर्तेत विहरेत्कैर्वा ज्ञायेत लक्षणैः ॥ किं भुंजीतोत विसृजेच्छयीतासीत
याति वा ३६ एतदच्युत मे ब्रूहि प्रश्नं प्रश्नविदां वर ॥ नित्यमुक्तो नित्यबद्ध एक एवेति मे भ्रमः ३७ ॥ ॥ इति श्रीभागवते म० ए०का०
धेभगवदुद्धवसंवादे दशमोध्यायः ॥ ॥ ॥ श्रीभगवानुवाच बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः ॥ गुणस्य मायामूलत्वान्न मे मो
क्षो न बंधनं १

नित्यत्वे नित्यत्वप्रसंगान्नित्यमुक्त इत्यप्यंगीकार्यं स्यात् । तत्र मे भ्रमो भवतीत्याह नित्य बद्ध इति ३७ ॥ ॥
नादिगुणसंबंधान्नित्यबद्धः मुक्तेर्जन्यत्वे ॥ ॥ ॥ एकादशे तु बद्धानां मुक्तानां चाथ लक्षणं ॥ साधूनां च तथा भक्तेर्लक्षणं हरिणोदितं १ नित्यबद्धे
इति श्रीभागवते एकादशटीकायां दशमोध्यायः ॥ तर्हि किं वस्तुतो विरोधः प्रतीतितो वा । नाद्यः । बंधमोक्षयोर्वास्तवत्वाभावादित्याह बद्धो मुक्त इति द्वाभ्यां आत्मा
नित्यमुक्त एक एवेति मे भ्रम इति यदुक्तं तत्र किं वस्तुतो विरोधः प्रतीतितो वा । नाद्यः । बंधमोक्षयोर्वास्तवत्वे किं न स्यात्तत्राह गुणस्य मायामूलत्वा
बद्धो मुक्त इत्थं मे गुणतः मदधीनसत्त्वादिगुणोपाधितः न वस्तुतः । नन्वौपाधिकत्वेपि तदुलपाका दिवद्वास्तवत्वं किं न स्यात्तत्राह गुणस्य मायामूलत्वा
द्बंधनं नास्ति अत एव मोक्षश्च नास्तीति । ननु कथं सर्वशास्त्रविरुद्धमुच्यते तत्राह इति मे व्याख्येति । एवं मत्कृतो निर्णयः अलमतिकुतर्कैरित्यर्थः । ३४
अथ वैवमन्वयः आत्मा बद्धो मुक्त इति याख्या तत्किं सा मे गुणतः मद्गुणपारतंत्र्यात् अत्र हेतुत्वेन गुणनियंतरि स्वस्मिन् तद्व्यतिरेकमाह अ
तएव न मे बंधनं मोक्षो वेति अन्यत्समानं एवं कारणभूतगुणानां मायामयत्वात्तत्कार्यं संसृतिर्मायैवेति प्रपंचयति । श्रीरामभद्राय नमः ॥ ॥

॥ १ ॥

भा॰ए॰
३४
३५

शोकमोहाविति। यथा स्वप्नः आत्मनः बुद्धेरेव ख्यातिर्विवर्त्तं तद्वत् २ अतो वस्तुविरोधस्तावन्नास्ति प्रतीतिस्त्वौपाधिकी घटत इत्याह विद्यावि
द्ये इति तन्यते मोक्षबंधावाभ्यामिति तनू शक्ती कुतः मे मायया विनिर्मिते मायावृत्तिरूपत्वात्। बंधमोक्षकरीत्येकवचनं द्विवचनार्थे ननु तत्कार्यत्वे बं
धमोक्षयोरनादित्वनित्यत्वेन स्यातां। न। आद्ये अनादी अतो यावदविद्यां प्रवर्त्तयामि तावद्बंधः। यदा विद्यां ददामि तदा मोक्षः स्फुरतीत्यर्थः। तथा च स्कंदपु
राणे। बंधको भवपाशेन भवपाशाच्च मोचकः। कैवल्यदः परं ब्रह्म विष्णुरेव सनातन इति। ननु शरीरिणामिति बहुवचनात् देहाद्युपाधिभेदेनाविरो
धउक्त इति भ्रांतिं व्यावर्त्तयन् बंधमोक्षव्यवस्थामुपपादयति ३ एकस्यैवेति। तर्हि किमात्माभेदात्तत्रापि बंधः नहीत्याह। अस्य जीवस्यैवेति। न
न्वात्माभेदे जीवो नामकोऽन्योऽस्ति पृथक् कथं च बंधमोक्षसुखदुःखादिव्यवस्था तत्राह ममांशस्य। अयं भावः। यद्येकस्यापि चंद्रादेर्जलाद्युपाधि

शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया॥ स्वप्नो यथात्मनः ख्यातिः संसृतिर्न तु वास्तवी २ विद्याविद्ये मम तनू विद्ध्युद्धव शरी
रिणां॥ मोक्षबंधकरी आद्ये मायया मे विनिर्मिते ३ एकस्यैव ममांशस्य जीवस्यैव महामते॥ बंधोऽस्याविद्ययानादिर्विद्यया च त
थेतरः ४ अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते॥ विरुद्धधर्मिणोस्तात स्थितयोरेकधर्मिणि ५ सुपर्णावेतौ सदृशौ सखायौ
यदृच्छयाकृतनीडौ च वृक्षे॥ एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान् ६

नाद्बिंबप्रतिबिंबरूपो भेदः यथा च तत्र जलकृताः कंपादयः प्रतिबिंबस्यैव। यथा च तत्र प्रतिबिंबानामप्युपाधिभेदेन भेदादेकस्मिन्नुदकुंभे भग्ने तत्प्रतिबिं
बस्यैव बिंबैक्यं नान्यगतस्य। तथा विद्यायां प्रतिबिंबितस्य ममांशस्य जीवस्यैव तत्कृतौ बंधः तस्य चोपाधितो भेदान्न व्यवस्था इति। तथा चाहुः यथैकस्मिन् घटाका
शे रजोधूमादिभिर्युते। न सर्वे संप्रयुज्यंते तथा जीवाः सुखादिभिरिति एतच्चानिरहस्यत्वबुध्यानिश्चि... तत्वमिति संबोधयति। हे महामते इतरो मोक्षः ४
अथेदानीं बद्धमुक्तयोर्वैलक्षण्यं प्रश्नस्योत्तरमाह अथेति तद्वैलक्षण्यं द्विविधं जीवेश्वरयोरेकं जीवानां चैकं तत्र जीवेश्वरयोर्वैलक्षण्यमाह द्विवि
धं रेवंव्यवस्थामुपपाद्य कथं वर्तेतेत्यादिवैलक्षण्यप्रश्नस्योत्तरमाह अथेति तद्वैलक्षण्यं द्विविधं जीवेश्वरयोरेकं जीवानां चैकं तत्र जीवेश्वरयोर्वैलक्षण्यमाह विरुद्धधर्मिणोरेकस्मिन्नु धर्मिणि शरीरे नियम्यनियंतृत्वेन स्थितयोः ५ सुपर्णौ वृक्षस्थपक्षिणाविव देहस्थौ पृथगङ्गता
सदृशौ चिद्रूपत्वात्। सखायौ अविद्यादेकमत्यात्। यदृच्छया अनिरुक्तया मायया दृश्यत इति वृक्षो देहः ऊर्ध्वमूलमवाक्शाखं वृक्षं यो वेद स प्रतीति श्रुतेः
ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययमिति स्मृतेश्च तस्मिन्नुकृतनीडौ निके तनं हृदयरूपं याभ्यां तौ तयोर्मध्ये एको जीवः पिप्पलान्नं पिप्पलोऽश्वत्थः देह
स्तस्मिन्नन्नं तत्कर्मफलमित्यर्थः खादति भक्षयति अन्यः ईश्वरः निरन्नः अभोक्तापि निजानंदतृप्तो बलेन ज्ञानादिना भूयानधिकः श्रुतिश्च
द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति ६ ॥ ३४
राम
३५

बद्धाधिक्यमेवाह आत्मानमपीति अतः यो विद्यया युक्तस्तु स तु नित्यबद्धः अनादिबद्धः यस्तु विद्याप्रधानः स तु नित्यमुक्तः मायाया अनाव
रकत्वात् आत्मतया व्यामोहकत्वाच्च ७ इदानीं बद्धमुक्तजीवानामेव मिथो वैलक्षण्यमाह देहस्थोपीति त्रिभिः विद्वान् मुक्तः संस्कारवशेन देह
स्थोपि देहस्थो न भवति। यथा स्वप्नादुत्थितः स्मर्यमाणे स्वप्नदेहे स्थितोपि तत्रस्थो न भवति तत्कृतसुखदुःखाद्यभावात्। तद्वत्। तथा वस्तुतः अदे
हस्थोपि कुमतिः अविद्वान् देहस्थः तन्निमित्तसुखदुःखभाक् यथा स्वप्नदेहगत इति ८ अत्र हेतुत्वेन वैलक्षण्यान्तरमाह द्वाभ्यां इंद्रियैरिंद्रिया
र्थेषु गृह्यमाणेष्वपि यस्तु विद्वान् सः नाहं कुर्यामहं करोमीति मतिं न कुर्यादित्यर्थः कुतः गुणैर्गुणेषु गृह्यमाणेषु अत एव अविक्रियः रमा
द्विक्रियस्य। तदुक्तं गीतासु तत्ववित्तु महाबाहो गुणकर्मविभागयोः गुणा गुणेषु वर्तन्त इति मत्वा न सज्जत इति ९ अबुधस्तु पूर्वकर्माधीने स्मिं दे

आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः॥ योऽविद्यया युक्स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ७ देहस्थो
पि न देहस्थो विद्वान् स्वप्नाद्यथोत्थितः॥ अदेहस्थोपि देहस्थः कुमतिः स्वप्नदृग्यथा ८ इंद्रियैरिंद्रियार्थेषु गुणैरपि गुणेषु च॥
गृह्यमाणेष्वहं कुर्यान्न विद्वान्यस्त्वविक्रियः ९ दैवाधीने शरीरेस्मिन् गुणभाव्येन कर्मणा॥ वर्तमानोबुधस्तत्र कर्तास्मीति नि
बध्यते १० एवं विरक्तः शयन आसनाटनमज्जने। दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु ११ न तथा बध्यते विद्वांस्तत्र तत्रा
दयन् गुणान्॥ प्रकृतिस्थोप्यसंसक्तो यथा खं सविताऽनिलः १२ वैशारद्येक्षयासंगशितया छिन्नसंशयः। प्रतिबुद्ध इव स्वप्ना
न्नानात्वाद्विनिवर्तते १३

रीरे वर्तमानः गुणैरिंद्रियैर्भाव्येन कर्मणा तत्र देहादौ निबध्यते कुतः कर्तास्मीत्यहंकारेण तदुक्तं तत्रैव प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्व
शः अहंकारविमूढात्मा कर्ताहमिति मन्यत इति १० एतैस्त्रिभिः श्लोकैः कथं वर्तेतेत्यस्य प्रश्नस्य सुखदुःखवत्त्वयोरभिमानश्च देहे वर्तेति तु तस्य नि
के भवति वैलक्षण्यान्तरं वदन् किं भुंजीतेत्यादि प्रश्नोत्तरमाह एवमिति त्रिभिः अभ्युगतमेव कर्ममात्रं भातीत्येवं विरक्तो विद्वान् तथा अविद्वा
न्निव शयनासनादिषु न बध्यते कुतः तत्र तत्र विषयेषु गुणानिंद्रियाणि आदयन् भोजयन् तत्साक्षित्वेन वर्तमानः न तु स्वयमदन् ११ एतदे
व कुतः तत्राह प्रकृतिस्थोपीति सार्धेन। यथा खं सर्वत्र स्थितमपि न सज्जते यथा सविता जले प्रतिबिंबितोपि यथा अनिलः सर्वत्र संचरन्नपि तद्व
त् १२ असंग्येन वैराग्येण शितया तीक्ष्णया छिन्नाः संशयाः असंभावनादयो यस्य सः नानात्वात् देहादिप्रपंचात् १३ श्रीरामायनमः॥

कथं विहरेदित्यस्योत्तरत्वेन वैलक्षण्यांतरमाह यस्य स्युरिति। तद्गुणैर्देहगुणैः संकल्पशून्याभिः प्राणादिवृत्तिभिः विहरन्मुक्त इत्यर्थः १४
एवं तावद्बद्धमुक्तयोः स्वरूपतो धर्मतश्च वैलक्षण्यमुक्तं इदानीं केन वा ज्ञायेत तल्लक्षणैरित्यस्योत्तरत्वेन परैरपि सुज्ञेयं वैलक्षण्यमाह यस्यात्मेति त्रि
भिः हिंस्रैः दुर्जनैरन्यैर्वा प्राणिभिः। यस्यात्मा देहः पीड्यते यदृच्छया येन केनापि क्वचित्किंचिदर्च्यते स बुधः तत्र न व्यतिक्रियते नाति
विक्रियत इत्यर्थः। तदुक्तं याज्ञवल्क्येन। यः कंटकैर्वितुदति चंदनैर्यश्च लिंपति अक्रुद्धोऽपरितुष्टश्च समस्तस्य च तस्य वेति १५ किंच साध्वसा
धु वा कुर्वतो वदतो वा जनान्न स्तुवीत न च निंदेत। यो लौकिकव्यवहारे विमुखः स मुक्त इत्यर्थः १६ अपि च न कुर्यादिति। यो देहिकेऽपि कर्म
ण्युदासीनः स मुक्त इतरो बद्ध इत्यर्थः १७ एतान्येव सर्वाणि मुमुक्षोः साधनानि ज्ञातव्यानि। यस्तु केवलं शब्दब्रह्मण्यभिज्ञः पांडित्य

यस्य स्युर्वीतसंकल्पाः प्राणेंद्रियमनोधियां॥ वृत्तयः स विनिर्मुक्तो देहस्थोऽपि हि तद्गुणैः १४ यस्यात्मा हिंस्यते हिंस्रैर्येन
किंचिद्यदृच्छया॥ अर्च्यते वा क्वचित्तत्र न व्यतिक्रियते बुधः १५ न स्तुवीत न निंदेत कुर्वतः साध्वसाधु वा॥ वदतो गुणदोषाभ्यां व
र्जितः समदृङ्मुनिः १६ न कुर्यान्न वदेत्किंचिन्न ध्यायेत्साध्वसाधु वा॥ आत्मारामोऽनया वृत्त्या विचरेज्जडवन्मुनिः १७ शब्द
ब्रह्मणि निष्णातो न निष्णायात्परे यदि॥ श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः १८ गां दुग्धदोहामसतीं च भार्यां देहं प
राधीनमसत्प्रजां च॥ वित्तं त्वतीर्थीकृतमंग वाचं हीनां मया रक्षति दुःखदुःखी १९ यस्यां न मे पावनमंग कर्म स्थित्युद्भव
प्राणनिरोधमस्य॥ लीलावतारेप्सितजन्म वा स्याद्वंध्यां गिरं तां बिभृयान्न धीरः २०

मात्रश्लाघी न तु तैः साधनैस्तदर्थनिष्ठो भवेत्तं निंदति। शब्दब्रह्मणि निष्णातः अर्थतः पारंगतोऽपि परे ब्रह्मणि न निष्णायात् ध्यानाद्यभियोगं
न कुर्यात् तस्य तावच्छ्रमः श्रमैकफलः न तु पुरुषार्थपर्यवसायी अधेनुमिव रक्षतः १८ एतदेवान्यार्थनिदर्शनैः प्रपंचयति गामिति दुग्धदोहां
हृतपयः दुग्धो दोहो नान्तरं दोहो यस्याः तां अर्थात् अन्याः असतीं भार्यां कामं रक्ष्यां देहं पराधीनं प्रतिक्षणं दुःखहेतुं असत्प्रजां दुष्टा दृष्टसाध
नं तत्र न्यं पुत्रं अतीर्थीकृतं आगते पात्रे दत्तं कीर्तिदुरितनाशकं अगेहे ऽप्रदत्तं दुःखानंतरं दुःखं मे वयस्यं स रक्षति मया हीनां वाचमित्युं विवृणोति १९
न तत्र त्यं पुत्रं तत्र हीनां कृत्वा आगतेऽपात्रे दत्तं दुःखं कीर्तिदुरितनाशकं अगेहे ...
यस्यां मे जगतः शोधकं चरित्रं न स्यात् किं तत् अस्य विश्वस्य स्थित्यादिरूपं तद्धेतुरित्यर्थः। लीलावतारेषु ईप्सितं जगतः प्रेमास्पदं श्रीरामकृष्णादिजन्म
वित्तं

वा नस्यात्तां तां निरूढयोगिनिरोधिमायाकथयन्नाह २० स्फोम

नकिंचित्कुर्यात् २

उ कर्मज्ञानमार्गमुपसंहरति एवं निश्चित्य विचारेणात्मनि नानात्वभ्रमं देहाध्यासं निरस्य निर्मलं मनो मयि सर्वगे परिपूर्णे समर्प्य संधार्य उपा
रमेत् नैशास्त्रपांडित्यमात्रेणेत्यर्थः २१ यद्यनीशः अशक्तः तर्हि आस्तामिदं मदुक्तं त्वं एवं कृतार्थो भविष्यसीत्याह मयीति मदर्पणेन २२ कर्म
भिर्विशुद्धसत्वस्यांतरंगां भक्तिमाह श्रद्धालुरिति द्वाभ्यां अभिनयन्नुत्सवयमनुकुर्वन् २३ आचरन्नुसेवमानः २४ ततश्चानेन प्रकारेण मयि
सत्संगेन लब्धया भक्त्या सभक्तो मां उपासिता ध्याता भवति। सच ध्यानशीलः सद्भिर्दर्शितं वेनिश्चितं सुखेनैव मे पदं स्वरूपं प्राप्नोति २५
सत्संगलब्धया भक्त्येत्युक्तं तत्र सतां भक्तेश्च विशेषं पृच्छति साधुरिति। साधवः स्वस्वमतिपरिकल्पिताः संति बहवः तत्तु कीदृशः संमतः भक्तिश्च
वि पद्बहुधा लोके कीदृशी पुनस्त्वय्युपयुज्येत। सद्भिश्च नारदादिभिरादृता २६ पुनश्च कथ्यतां इदं जानातिगुह्यं त्वयैव वक्तव्यमित्यैश्वर्यमाविष्करोति

एवं जिज्ञासयापोह्य नानात्वभ्रममात्मनि॥ उपारमेत विरजं मनो मय्यर्प्य सर्वगे २१ यद्यनीशो धारयितुं मनो ब्रह्मणि निश्चलं॥ मयि
सर्वाणि कर्माणि निरपेक्षः समाचर २२ श्रद्धालुर्मे कथाः शृण्वन् सुभद्रा लोकपावनीः॥ गायन्ननुस्मरन् कर्म जन्म चाभिनयन्मुहुः
२३ मदर्थे धर्मकामार्थानाचरन्मदपाश्रयः॥ लभते निश्चलां भक्तिं मय्युद्धव सनातने २४ सत्संगलब्धया भक्त्या मयि मां स उपा
सिता॥ स वै मे दर्शितं सद्भिरंजसा विंदते पदं २५ उद्धव उवाच साधुस्तवोत्तमश्लोक मतः कीदृग्विधः प्रभो॥ भक्तिस्त्वय्युपयुज्येत
कीदृशी सद्भिरादृता २६ एतन्मे पुरुषाध्यक्ष लोकाध्यक्ष जगत्प्रभो॥ प्रणतायानुरक्ताय प्रपन्नाय च कथ्यतां २७ त्वं ब्रह्म परमं
व्योम पुरुषः प्रकृतेः परः॥ अवतीर्णोसि भगवन् स्वेच्छोपात्तपृथग्वपुः २८ श्रीभगवानुवाच कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनां॥
सत्यसारोनवद्यात्मा समः सर्वोपकारकः २९ कामैरहतधीर्दांतो मृदुः शुचिरकिंचनः॥ अनीहो मितभुक् शांतः स्थिरो मच्छरणो मुनिः ३०

हे पुरुषाध्यक्ष साक्षिन् लोकाध्यक्ष ब्रह्मादिनियंतः २७ अत्र हेतुः त्वमिति व्योमवदसंगः यतः प्रकृतेः परः स्वेच्छयोपात्तं पृथक् परिमितं वपुर्येन सः २८
तत्र त्रिंशल्लक्षणैः साधुं निरूपयति। कृपालुरिति पंचभिः कृपालुः परदुःखासहिष्णुः सर्वदेहिनां केषांचिदप्यकृतद्रोहः तितिक्षुः क्षमावान् स
वीर्यं २ त्यसारः स्थिरबलं वीर्यं यस्य सः अनवद्यात्मा असूयादिरहितः सुखदुःखयोः समः यथाशक्ति सर्वेषामुपकारकः २९ कामैरक्षुभितचित्तः दांतः
संयतबाह्येंद्रियः मृदुः अकठिणचित्तः शुचिः सदाचारः अकिंचनः अपरिग्रहः अनीहः दृष्टक्रियाशून्यः मितभुक् लघ्वाहारः शांतः नियतांतःकर
णः स्थिरः स्वधर्मे मच्छरणः मदेकाश्रयः मुनिः मननशीलः ३० श्रीरामाय नमः॥

अप्रमत्तः सावधानः गभीरात्मा निर्विकारः धृतिमान् विपद्यप्यकृपणः जितषड्गुणः क्षुत्पिपासे शोकमोहौ जरामृत्यू च षडूर्मयः एते जिता येन सः
अमानी न मानाकांक्षी अन्येभ्यो मानदः कल्यः परबोधने दक्षः मैत्रः अवंचकः कारुणिकः करुणयैव प्रवर्तमानः न तु दृष्टलोभेन । कविः सम्यक्
ज्ञानी ३१ किंच मया वेदरूपेणादिष्टानपि स्वधर्मान् संत्यज्य यो मां भजेत सोऽप्येवं पूर्वोक्तवत् सत्तमः किमज्ञानान्नास्तिक्याद्वा न धर्माचरणे
सत्वशुद्ध्यादीन् गुणान् विपक्षे दोषांश्च आज्ञाय ज्ञात्वापि मद्ध्यानविक्षेपकतया मद्भक्त्यैव सर्वं भविष्यतीति । दृढनिश्चयेनैव धर्मान् संत्यज्य यद्वा
भक्तिदार्ढ्येन निवृत्ताधिकारतया संत्यज्य अथवा विद्धैकादशी कृष्णैकादश्युपवासो नुपवासो निवेद्य श्राद्धादयो ये भक्तिविरुद्धा धर्मास्तान् सं
त्यज्येत्यर्थः ३२ किंच यावान् देशकालाद्यपरिच्छिन्नः यश्च सर्वात्मा यादृशः सच्चिदानंदादिरूपः तं मां ज्ञात्वा अज्ञात्वापि यद्वा विशेषतः पुनः पुनर्ज्ञात्वा

अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः ॥ अमानी मानदः कल्यो मैत्रः कारुणिकः कविः ३१ आज्ञायैवं गुणान् दोषान् मयादि
ष्टानपि स्वकान् ॥ धर्मान् संत्यज्य यः सर्वान्मां भजेत स सत्तमः ३२ ज्ञात्वाज्ञात्वाथ ये वै मां यावान्यश्चास्मि यादृशः ॥ भजंत्यनन्यभा
वेन ते मे भक्ततमा मताः ३३ मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनं ॥ परिचर्या स्तुतिः प्रह्वगुणकर्मानुकीर्तनं ३४ मत्कथाश्रवणे
श्रद्धा मदनुध्यानमुद्धव ॥ सर्वलाभोपहरणं दास्येनात्मनिवेदनं ३५ मज्जन्मकर्मकथनं मम पर्वानुमोदनं ॥ गीततांडववा
दित्रगोष्ठीभिर्मद्गृहोत्सवः ३६ यात्रा बलिविधानं च सर्ववार्षिकपर्वसु ॥ वैदिकी तांत्रिकी दीक्षा मदीयव्रतधारणं ३७ ममार्चास्था
पने श्रद्धा स्वतः संहत्य चोद्यमः ॥ उद्यानोपवनाक्रीडपुरमंदिरकर्मणि ३८ संमार्जनोपलेपाभ्यां सेकमंडलवर्तनैः ॥ गृहशुश्रूषणं म
ह्यं दासवद्यदमायया ३९

एकांतभावेन ये भजंतीति ३३ साधुलक्षणमुक्त्वा भक्तेर्लक्षणमाह मल्लिंगेत्यष्टभिः लिंगानि प्रतिमादीनि ३४ सर्वलाभोपहरणं सर्वस्य ल
ब्धस्य समर्पणं ३५ पर्वाणि जन्माष्टम्यादीनि ३६ बलिविधानं पुष्पोपहारादिसमर्पणं सर्ववार्षिकपर्वसु । चातुर्मास्यैकादश्यादिषु वि
शेषतः ३७ उद्यानादिकरणे सामर्थ्ये सति स्वतः असति त्वन्यैः संभूय उद्यमः उद्यानं पुष्पप्रधानं उपवनं फलप्रधानं वनं आक्रीडः क्री
डास्थानं ३८ संमार्जनं रजसोपाकरणं उपलेपः गोमयोदकादिभिरालेपनं सेकः तैरेव प्रोक्षणं मंडलवर्तनं सर्वतोभद्रादिकरणं म
ह्यं मम ३९ श्रीराम ॥

तदनुमोदनं२

स्वयमन्येनवानिवेदितंनस्वीकुर्यात्। पत्रपुष्पाधारणाफलविषयं। तत्राप्राप्तविषयंवा। भक्त्यानुयाचैव। षड्‌र्मासोपवासैस्तुय
त्फलंपरिकीर्तितं। विष्णोर्नैवेद्यसिक्थेन पुण्यंतद्भुंजतांकलौ। हरिरूपंमुखेनामनैवेद्यमुदरेहरेः। पादोदकंचनिर्माल्यंमस्तकेयस्य
सोऽच्युतः। इत्यादिवचनेभ्यः। यद्वाअन्यस्मैनिवेदितंमेनोपयुंज्यात् मह्यंननिवेदयेदित्यर्थः। विष्णोर्निवेदितान्नेनयष्टव्यंदेवतांतरं।
पितृभ्यश्चैवतद्देयंतदानंत्यायकल्पते। पितरोपितु पोष्या भूयये परमात्मने। इतोधाः पितरःतस्य भवंति क्लेशभागिनः इत्यादिव
नेभ्यः ४० इदानींमेकादशपूजाधिष्ठानान्याह। सूर्यइतिहेभद्र ४२ अधिष्ठानभेदेनपूजासाधनान्याह सूर्यइतित्रिभिः। त्रय्या
विद्यया सूक्तैरुपस्थानादिना हे उद्धव अंग यवसादिना तृणादिना ४३ बंधुसत्कृत्या बंधुवत्संमानेन। हृदिखेहृदयाकाशे मुख्यधि

अमानित्वमदंभित्वं कृतस्यापरिकीर्तनं। अपि दीपावलोकं मे नोपयुंज्यान्निवेदितं ४० यद्यदिष्टतमं लोके यच्चाति
प्रियमात्मनः। तत्तन्निवेदयेन्मह्यं तदानंत्याय कल्पते ४१ सूर्योग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलं। भूरा
त्मा सर्वभूतानि भद्र पूजापदानि मे ४२ सूर्ये तु विद्यया त्रय्या हविषाग्नौ यजेत मां। आतिथ्येन तु विप्राग्र्ये गो
ष्वंग यवसादिना ४३ वैष्णवे बंधुसत्कृत्या हृदि खे ध्याननिष्ठया। वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः
४४ स्थंडिले मंत्रहृदयैर्भोगैरात्मानमात्मनि। क्षेत्रज्ञं सर्वभूतेषु समत्वेन यजेत मां ४५ धिष्ण्येष्वित्येषु मद्रूप
शंखचक्रगदांबुजैः। युक्तं चतुर्भुजं शांतं ध्यायन्नर्चेत्समाहितः ४६ इष्टापूर्तेन मामेवं यो यजेत समाहितः। ल
भेत मयि सद्भक्तिं मत्स्मृतिः साधुसेवया ४७ प्रायेण भक्तियोगेन सत्संगेन विनोद्धव। नोपायो विद्यते सध्र्यङ् प्रायणं

या प्राणदृष्ट्या तोये तोयादिभिर्द्रव्यैस्तर्पणादिना ४४ स्थंडिले भुवि मंत्रहृदयैः रहस्यमंत्रन्यासैः ४५ सर्वाधिष्ठानेषु ध्येय
माह धिष्ण्येष्विति इत्यनेनप्रकारेण एषु धिष्ण्येषु ४६ उक्तोपासकस्य फलमाह इष्टापूर्तेनेति सद्भक्तिं दृढां भक्तिं अस्या
भक्तेरंतरंगसाधनमाह। इह मत्स्मृतिः साधुसेवया भवति। यद्वा स्मृतिर्ज्ञानं ततश्च दृढभक्तिमतः पुंसः साधुसेवया मत्ज्ञानं भ
वतीत्यर्थः ४७ ज्ञानभक्तिमार्गावुक्तौ। तत्र ज्ञानमार्गादपि भक्तिमार्गः श्रेष्ठ इत्याह प्रायेणेति सत्संगेन यो भक्तियोगः तेन विनोपा
यः संसारतरणे न विद्यते। सत्संगेनेत्यत्र हेतुमाह हि यस्मात् सतां महं प्रायणं प्रकृष्टमय

श्री ४८

स्याधुर्नाम्नी दानवी तस्याः अपत्यं ६

इदानीं सांख्ययोगादीनि साधनांतराण्यपेक्षाणि सव्यभिचाराणि च सत्संगस्तु स्वतंत्र एव समर्थः फलाव्यभिचारी चेति वर्णयिष्यन्नाह
अथेति एतद्वक्ष्यमाणं परमगुह्यं अतः श्रोतव्यमित्यर्थः ४९ ॥ ॥ ॥ इति एकादशस्कंधे एकादशोऽध्यायः ॥ ॥ ॥ द्वादशे साधुसंग
स्य महिमा वर्ण्यते पुरा ॥ कर्मानुष्ठानत्यागव्यवस्था च ततः परं १ निरोधयति वशीकरोति । योगः आसनप्राणायामादिः
सांख्यं तत्त्वानां विवेकः धर्मः सामान्यतो हिंसादिः स्वाध्यायो वेदजपः तपः कृच्छ्रादि । त्यागः सन्यासः इष्टापूर्तं इष्टं च पूर्तं च तत्रेष्ट
मग्निहोत्रादि पूर्तं कूपारामादि निर्माणं । दक्षिणाशब्देन सामान्यतो दानं लक्ष्यते १ व्रतानि एकादश्युपवासादीनि यज्ञदे
वपूजा । छंदांसि रहस्यमंत्राः अवरुंधे वशीकरोति २ यातुधाना राक्षसाः ३ त्वाष्ट्रो वृत्रः कायाधवः प्रह्लादः ५ ऋक्षो जांबवा
अथैतत्परमं गुह्यं शृण्वतो यदुनंदन । सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखा ४९ ॥ ॥ ॥ इति श्रीभागवते
महापुराणे एकादशस्कंधे एकादशोऽध्यायः ॥ ॥ ॥ श्रीभगवानुवाच ॥ न रोधयति मां योगो न सांख्यं धर्म एव च ॥
न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा १ व्रतानि यज्ञश्छंदांसि तीर्थानि नियमा यमाः ॥ यथावरुंधे सत्संगः
सर्वसंगापहो हि मां २ सत्संगेन हि दैतेया यातुधाना मृगाः खगाः ॥ गंधर्वाप्सरसो नागाः सिद्धाश्चारणगुह्यकाः
३ विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोंत्यजाः ॥ रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन्युगेनघ ४ बहवो मत्प
दं प्राप्तास्त्वाष्ट्रकायाधवादयः ॥ वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः ५ सुग्रीवो हनुमानृक्षो गजो गृ
ध्रो वणिक्पथः ॥ व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथापरे ६ ते नाधीतश्रुतिगणा नोपासितमहत्तमाः ॥
न् गजो गजेंद्रः वणिक्पथः तुलाधारः व्याधः धर्मव्याधः अव्रतातप्ततपसः सत्संगान्मामुपागताः ७ अन्याः
यज्ञपत्न्यः नीलीसितभार्याः ६ तेषां सत्संगव्यतिरिक्तसाधनांतराभावमाह त इति न अधीताः श्रुतिगणा यैः तदर्थं च न उपासि
ता महत्तमा यैः तेन तथा किं च अव्रतानातप्ततपसः न व्रतानि येषां न तप्तानि तपांसि येषां तेन तथा सत्संगादिति सद्भिः संगो नाम ममैव सं
गस्त्वभिप्रेतोऽतः यद्वा स्वसंगस्यापि सत्संगत्वं विवक्षते । तस्यापि सत्ता च त्वत्सु मदीयानां संगादित्यर्थः ७ श्रीरामायनमः राम
३८

तत्रवृत्रादीनांभवतुनामकथंचित्साधनांतरं। गोपीश्चरंतीनांतुनान्यदस्तीत्याह केवलेनेति। सत्संगलब्धेन केवलेनैव भावेनप्रीत्या
नगाः यमलार्जुनादयः नागाः कालियादयः यद्वा तदानींतनानां सर्वतरुगुल्मादीनामपि भगवति भावोस्तीति गम्यते तदुक्तं भग
पादांबुजं वतैवअहोमीदेववरामरार्चितं तेसुमनःफलार्हणं। नमंत्युपादायशिखाभिरात्मनःस्तमोपहत्यैतरुजन्मयत्कृतमित्यादिना सिद्धाः
स्वार्थाः संतः ईयुः प्रापुः ८ एवंप्राप्तिहेतुर्दुर्लभतामाह यमिति। योगादिभिः कृतप्रयत्नोपि यंनप्राप्नुयात्। तंमामीयुरिति पूर्वेणान्वयः
अत्रचप्रथमेयागोप्यः पश्चाद्योवृक्षाः कृष्णेनसहसंगताः। तेसंतः तत्संगोन्येषांसत्संगः तेनचतेषांभक्तिरितिज्ञातव्यं ९ गोपीनां
भावंप्रपंचयति रामेणेति चतुर्भिः श्वाफल्किना अक्रूरेण मयिप्रणीते सति मेमत्तोन्यंसुखायनददृशुः कुतः वियोगेनतीव्रोदुःसहः

केवलेनहिभावेनगोप्योगावोनगामृगाः। येन्येमूढधियोनागाःसिद्धामामीयुरंजसा ८ यंनयोगेनसांख्येन
दानव्रततपोध्वरैः।। व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि ९ रामेणसार्धंमथुरांप्रणीतेश्वाफल्किना
मय्यनुरक्तचित्ताः।। विगाढभावेननमेवियोगतीव्राधयोन्यंददृशुःसुखाय १० तास्ताःक्षपाःप्रेष्ठतमेननीतामू
यैववृंदावनगोचरेण।। क्षणार्धवत्ताःपुनरंगतासांहीनामयाकल्पसमाबभूवुः ११ तानाविदन्मय्यनुषंगबद्धधि
यःस्वमात्मानमदस्तथेदं।। यथासमाधौमुनयोब्धितोयेनद्यःप्रविष्टाइवनामरूपे १२ मत्कामारमणंजारमस्वरूप
विदोबलाः।। ब्रह्ममांपरमंप्रापुःसंगाच्छतसहस्रशः १३

स्वाः आधिर्यासांताः अत्रहेतुः मयिविगाढेनअतिदृढेनभावेनप्रेम्णाअनुरक्ता नितरांसक्ता नियासांताः १० तीव्राधिर्व्यनक्ति तास्ताइति
मयासहयाएवक्षपा रात्रयः क्षणार्धवन्नीतास्ताएवपुनःमयाहीनास्तासांकल्पसमाबभूवुः कथंभूतास्ता वाचामगोचराइत्यर्थः ११
किंचएवंतीव्राधयस्ताः मोहमिवसमाधिंप्राप्ताइत्याह ताइति। मयिअनुषंगेनआसक्त्याबद्धाधियोयाभिस्ता स्वमात्मानंस्वदेहंअ
दः दूरस्थंइदंसंनिहितंचनाविदन्। यद्वा स्वंपतिपुत्रादिममतास्पदंआत्मानंअहंकारास्पदंअदःपरलोकंइदंइमंलोकंचनाविदन्निति।
यथामुनयःसमाधौनामरूपेनविदुःतद्वत् किंतुअब्धितोयेनद्यइवमयिप्रविष्टाइत्यन्वयः १२ एवंताअबलाः केवलंमत्कामाः अस्वरू
पविदः स्वरूपंनजानंति तथापिमत्संगात् जारंब्रह्मजारबुद्धिविषयमपिब्रह्मस्व

रूपमेवमामपिप्रापुरितिसर्गः १३ श्रीभागवतमः ॥

यस्मादेवंभूतो मद्भजनप्रभावः तस्मात्त्वं चोदनां श्रुतिं प्रतिचोदनां स्मृतिं च। यद्वा विधिं च निषेधं च उत्सृज्य १४ मां शरणं याहि मय्ये
वाकुतोभयस्याः भव॥ १५ पूर्वं तावन्मयोदितेष्ववहितः स्वधर्मेष्वित्यादिना कर्म कर्तव्यमित्युक्तं इदानीं तु तत्सर्वं त्यक्त्वा मच्छर
णं याहीत्युच्यते तत्र किमात्मनः कर्तृत्वाद्यस्ति नास्ति वा न्वेत्यात्मस्थः आत्मविषयः संशयो न निवर्तते। यद्वा कर्म कार्यं त्याज्यं वेत्यात्म
स्थः हृदिस्थः संशयो न निवर्तत इति पृच्छति। संशय इति येन संशयेन १६ उत्तरं स एष इत्यष्टभिः अयं भावः ईश्वरस्तावत्स्वमायाव
शात्प्रपंचात्मना भाति तत्प्रपंचाध्यासाच्च जीवानामनाद्यविद्यया कर्तृत्वादि। ततो विधिप्रतिषेधाधिकारः तदानीं सत्त्वशुद्ध्यर्थं क
कं र्माणि कुर्वित्युक्तं सत्त्वे च शुद्धे पुनः कर्मजाड्यपरिहाराय भक्तिविशेषैकमादरं परित्यज्य दृढविश्वासेन भजेत्युक्तं। ज्ञातायां तु विद्यायां न कि
चित्कर्तव्यमस्तीति। तत्र तावदीश्वराद्बुद्ध्यादीन्द्रियद्वारा जीवसंसृतिकारणभूतप्रपंचोद्गममाहात्म्यैश्वर्यलक्षितः स एषः अपरोक्षः जीवय

तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनां॥ प्रवृत्तं च निवृत्तं च श्रोतव्यं श्रुतमेव च १४ मामेकमेव शरणमात्मानं सर्वदेहि
नां॥ याहि सर्वात्मभावेन मया स्या ह्यकुतोभयः १५ उद्धव उवाच संशयः शृण्वतो वाचं तव योगेश्वरेश्वर॥ न निव
र्तत आत्मस्थो येन भ्राम्यति मे मनः १६ श्रीभगवानुवाच स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः॥ म
नोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः १७ श्रीराम॥

तीति जीवः परमेश्वरः अपरोक्षत्वे हेतुः विवरेष्वाधारादिचक्रेषु प्रसूतिरभिव्यक्तिर्यस्य सः तामेवाभिव्यक्तिमाह। घोषेणेति घो
षेण परारव्येन नादवता प्राणेन सह गुहामाधारचक्रं प्रविष्टः सन् मनोमयं सूक्ष्मरूपं पश्यन्त्याख्यं मध्यमाख्यं च मणिपूरकचक्रे विशुद्धिचक्रे च
प्राप्य उपेत्य च वक्त्रे मात्रा ह्रस्वादिः स्वर उदात्तादिः वर्णः आकारादिरित्येवं वैखर्याख्यः स्थविष्ठः अतिस्थूलो नानावेदशाखात्मको भवति। तथा च श्रुतिः
चत्वारि वाक्परिमितापदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति अभियुक्त
श्लोकश्च यथा साक्षिणा वरुणस्सरसा दुद्धरन्ती त्रिषष्टिं वर्णानन्तः प्रकटकरणैः प्राणसंगात्प्रसूते। तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धि
संस्थां वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्य इति १७ श्रीरामभद्राय नमः श्रीगोपालाय नमः श्रीकृष्णाय नमः॥

अव्यक्तस्य सतः सूक्ष्ममध्यमक्रमेणाभिव्यक्तौ दृष्टान्तमाह यथेति । यथाग्निः खे ऊष्मा अव्यक्तोऽरूपः दारुणि अधिकं मथ्यमानः अनिल सहायः सन् अणुः सूक्ष्मविस्फुलिंगादिरूपोऽभवति पुनः प्रकृष्टो जातो हविषा संवर्धते । तथैवेयं वाणी ममाभिव्यक्तिः १८ उक्तां वाग्वृत्तिमुपसंहरन्नुक्तेन्द्रियवृत्तीरप्यतिदिशति । एवं गदिः गदनं भाषणं मे व्यक्तिरित्युपसंहारः कर्म हस्तयोर्वृत्तिः गतिः पादयोः विसर्गः पायूपस्थयोरिति कर्मेन्द्रियाणां घ्राणः अवघ्राणं रसो रसनं दृक् दर्शनं स्पर्शः स्पर्शनं श्रुतिः श्रवणमिति ज्ञानेन्द्रियाणां संकल्पो मनसः विज्ञानं बुद्धिश्चित्तयोः अभिमानोऽहंकारस्य सूत्रं प्रधानस्य सत्वरजस्तमसां विकारोऽधिदैवादिस्त्रिविधः प्रपंचः मे व्यक्तिरिति पूर्वेणान्व

यथानलः खेऽनिलबंधुरूष्मा बलेन दारुण्यभिमथ्यमानः ॥ अणुः प्रजातो हविषा समिध्यते तथैव मे व्यक्तिरियं हि वाणी १८
एवं गदिः कर्म गतिर्विसर्गो घ्राणो रसो दृक् स्पर्शः श्रुतिश्च ॥ संकल्पविज्ञानमथाभिमानः सूत्रं रजः सत्वतमोविकारः १९
अयं हि जीवस्त्रिवृदब्जयोनिरव्यक्त एको वयसा स आद्यः ॥ विश्लिष्टशक्तिर्बहुधेव भाति बीजानि योनिं प्रतिपद्य यद्वत् २०
यस्मिन्निदं प्रोतमशेषमोतं पटो यथा तंतुवितानसंस्थः ॥ य एष संसारतरुः पुराणः कर्मात्मकः पुष्पफले प्रसूते २१ श्रीराम
द्वे अस्य बीजे शतमूलस्त्रिनालः पंचस्कंधः पंचरसप्रसूतिः ॥ दशैकशाखो द्विसुपर्णनीडस्त्रिवल्कलो द्विफलोऽर्कं प्रविष्टः २२

यः १९ तस्मादीश्वराभिव्यक्तिरूपः प्रपंचोऽनेश्वरादन्यो नास्तीत्याह अयमिति । अयं जीव ईश्वरः आद्यः अव्यक्त एक एव वयसा कालेन विश्लिष्टा विभक्ता भागा इन्द्रियरूपाः शक्तयो यस्य यद्वा विश्लेषेण श्लिष्टा आलिंगिता मायाशक्तिर्येन सः बहुप्रकार इव भाति यतः स एव आद्यः त्रिवृत् त्रिगुणाश्रयः अब्जयोनिः लोकपद्मस्य कारणभूतः एकस्य बहुधा भाने दृष्टान्तः योनिं क्षेत्रं प्रतिपद्य प्राप्य बीजानि यद्वदिति २० तस्मात्तन्मायाविलसितत्वात् तदाश्रयमिदं जगत् ततः पृथगिति न सदृष्टान्तमाह यस्मिन्निति । तन्तुवितानो संस्थास्थितिर्यस्य सः पटो यथा तथा यस्मिन्निदं विश्वं
गत ओतं दीर्घतन्तुषु पट इव प्रोतं तिर्यक्तन्तुष्विव । एवंभूतस्य मम ह्यव्यक्तस्य लोके निःश्रेयसविषया नान्यथास्तत्वं वृक्षरूपेणाविद्यकर्तृत्वादि संसारहेतुः अतस्तद्विवेकज्ञानेन कर्मादिसर्वत्याग इत्युक्तमित्याशयेनाह य एष इति सार्धैस्त्रिभिः पुराणः अनादिः कर्मात्मकः प्रवृत्तिस्वभावः पुष्पफले भोगापवर्गौ कर्मतत्फले वा प्रसूते जनयति २१ वृक्षरूपं प्रपंचयति द्वे इति पुण्यपापे अस्य बीजे दश च एकश्च शाखा दशेन्द्रियाणि यस्य द्वौ सुप
१ × स च शतमूलः शतं अपरिमिताः वासनाः मूलानि यस्य त्रयो गुणा नालानि प्रकाण्डानि यस्य पंचभूतानि स्कंधा यस्य पंचरसाः शब्दादिविषयास्तेषां प्रसूतिर्यस्मात् ×

र्णौ जीवपरमात्मनो नीडं यस्मिन् त्रयो वल्कला त्वचो वातपित्तश्लेष्माणो यस्य द्वे सुखदुःखे फले यस्य सः अर्कं प्रविष्टः सूर्यमण्डलपर्यन्तव्याप्तः मण्डलं भित्त्वा गतस्य संसाराभावात् २२

भा॰ए॰
४०

तत्फलभोक्तृत्वमाह गृध्यतीति गृध्राः कामिनः ग्रामेचराः गृहस्थाः अस्य वृक्षस्यैकं फलं दुःखमदंति। परिणामतः स्वर्गादेरपि दुःखरूपत्वात्। हं
सा विवेकिनोऽरण्यवासाः संन्यासिनः एकं फलं सुखमदंति। एकं परमात्मानं मायामयमेवं बहुरूपं ईड्यैः पूज्यैर्गुरुभिः कृत्वा यो वेद स वेदं वे
द तत्त्वार्थं वेद २३ त्वमेवं ज्ञात्वा कृत्यं सर्वं साधनं त्यजेत्याह एवमिति एकांतभक्त्या शितेन तीक्ष्णेन ज्ञानकुठारेण स्वतंत्रभावो वाहूपोऽज्ञान
भक्त्योः जीवोपाधिं त्रिगुणात्मकं लिंगशरीरं विवृश्च्य छित्वा परमात्मानं स्वसंपद्य प्राप्य अथास्त्रं साधनं त्यजेति २४ ॥ ॥इत्येकादशे द्वा
दशोऽध्यायः॥ ॥ ॥त्रयोदशेऽथ सत्त्वस्य वृद्ध्या विद्योदयक्रमः॥ हंसेति हासनश्चित गुणविभ्रेक्षवर्णनं १ विद्याकुठारेण जीवाशयं सं
वृश्च्य साधनं त्यजेत्युक्तं। न तु तत्र तम आदि गुणत्रयवृत्ति प्रतिबंधे सति कथं विद्योत्पत्तिरित्याशंक्य तन्निवृत्त्या विद्योत्पत्तिप्रकारमाह सत्त्वमि

अरतिवैकफलमस्य गृध्रा ग्रामेचरा एकमरण्यवासाः॥ हंसा य एकं बहुरूपमिज्यैर्मायामयं वेद स वेद वेदं २३ एवं गुरूपासनयै
कभक्त्या विद्याकुठारेण शितेन धीरः॥ विवृश्च्य जीवाशयमप्रमत्तः संपद्य चात्मानमथ त्यजास्त्रं २४ ॥ ॥इति श्रीभागवते म
हापुराणे एकादशस्कंधे भगवदुद्धवसंवादे द्वादशोऽध्यायः॥ ॥ ॥श्रीभगवानुवाच सत्त्वं रजस्तम इति गुणा बुद्धेर्न चात्मनः॥ १३
सत्त्वेनान्यतमौ हन्यात्सत्त्वं सत्त्वेन चैव हि १ सत्त्वाद्धर्मो भवेद्वृद्धात्पुंसो मद्भक्तिलक्षणः॥ सात्त्विकोपासया सत्त्वं ततो धर्मः प्रव
र्तते २ धर्मो रजस्तमो हन्यात्सत्त्ववृद्धिरनुत्तमः॥ आशु नश्यति तन्मूलो ह्यधर्म उभये हते ३

तिसृभिः तत्र यथा नंदादिवत् आत्मधर्मा गुणास्तु तर्हि तत्स्वरूपत्वात्तेषां निवृत्तिर्न स्यात् अतस्तेन हंतीत्याह बुद्धेः प्रकृतेरेते गुणाः न त्वात्मन
इति अतः सत्त्वेन सत्त्ववृद्ध्याऽन्यौ तमो हन्यात् रजस्तमो च द्वौ जयेदित्यर्थः सत्त्वं च सत्त्वदयादि वृत्तिरूपं उपशमात्मकेन सत्त्वेनैव हन्यात् १ ननु
गुणत्रयवृत्तीनां परस्परोपमर्दरूपत्वात्कथं सत्त्ववृत्त्यैवेतरवृत्तयो नियमेन हन्तव्याः तत्राह सत्त्वादिति। मद्भक्तिलक्षण इति यो धर्मः स भक्तिरू
प एवं वा सत्त्वमेव कथं वर्धेत तत्राह। सात्त्विकानां पदार्थानामुपासनया सेवया सत्त्वं वृद्धं भवतीत्यर्थः २ स च धर्मो रजस्तमश्च हन्यात् कुतः
न विद्यते उत्तमो यस्मात् सः सर्वोत्तमः यतः सत्त्ववृद्धिः सत्त्वस्य वृद्धिर्यस्मात् कारणात् सः अत एव तत्कार्याधर्मप्रतिबंधोऽपि नास्तीत्याह तस्मि
शुभ यस्मिन्नति तन्मूलस्ते रजस्तमसी नाम हृष्यादिना प्रमादालस्यादिना वकूलं यस्य सः ३ श्रीराम॥

राम
४०

सात्त्विकोपासनया सत्त्वं वर्धत इत्युक्तं। तानेव सत्त्ववृद्धिहेतून्दर्शयितुं सामान्यतो गुणत्रयवृद्धिहेतूनाह आगमः शास्त्रं अपः आपः क्षे
विदाग्मोर्थ इति पाठः ४ एषु सात्त्विकादिनिर्णयमाह। एषामेव मध्ये यद्यद्वृद्धाः प्रशंसन्ति। यद्यन्निंदंति तत्तत्तामसं। यत्तु तैरुपेक्षितं न स्तु
तं न च निंदितं तद्राजसं ५ सात्त्विकान्येवेति। निवृत्तिशास्त्राण्येव सेवेत न प्रवृत्तिपाखंडशास्त्राणि तीर्थापएव न गंधोदकं सुराद्याः प्रजा
न जनाः निवृत्तानेव जनान् प्रवृत्तदुराचारान् विविक्तदेशं न रथ्याद्यूतदेशान् कालं ब्राह्ममुहूर्तादिकं ध्यानादौ न प्रदोषनिशीथादीन् कर्म च नित्यं
न काम्याभिचारादीनि जन्म च वैष्णवदीक्षालक्षणं न शाक्तक्षुद्रदीक्षारूपं। ध्यानं श्रीविष्णोः न कामिनीविद्विषां मंत्रं प्रणवादिकं न का
म्यक्षुद्रान् संस्कारं आत्मनः शोधकं न तु केवलं देहगृहादीनां। ननु ज्ञानं महावाक्यश्रवणादेवोत्पद्यते। किं तत्र सत्त्ववृद्ध्या धर्मेण वा अत आह

आगमोपः प्रजा देशः कालः कर्म च जन्म च॥ ध्यानं मंत्रोथ संस्कारो दशैते गुणहेतवः ४ तत्तत्सात्त्विकमेवैषां यद्यद्वृद्धाः प्र
चक्षते॥ निंदंति तामसं तत्तद्राजसं तदुपेक्षितं ५ सात्त्विकान्येव सेवेत पुमान्सत्त्वविवृद्धये॥ ततो धर्मस्ततो ज्ञानं याव
त्स्मृतिरपोहनं ६ वेणुसंघर्षजो वह्निर्दग्ध्वा शाम्यति तद्वनं॥ एवं गुणव्यत्ययजो देहः शाम्यति तत्क्रियः ७ उद्धव उवाच॥
विदंति मर्त्याः प्रायेण विषयान्पदमापदां॥ तथापि भुंजते कृष्ण तत्कथं श्वखराजवत् ८ श्रीभगवानुवाच अहमित्यन्यथाबु
द्धिः प्रमत्तस्य यथा हृदि॥ उत्सर्पति रजो घोरं ततो वैकारिकं मनः ९

यावत्स्मृतिः आत्मापरोक्ष्यं यावद्देहद्वयतत्कारणभूतगुणापोहः तावत्पर्यंतं ज्ञानं भवतीत्यर्थः ६ ननु गुणव्यतिकराज्जातो देहः कथं स्वा
श्रयभूतान्गुणान्स्वत एवोत्पन्नया विद्ययापि घ्नन्स्वयमप्युपरमेत्तत्राह वेणूनां संघर्षेणा जातोऽग्निर्यथा स्वत एवोत्पन्नाभिर्ज्वालाभिस्तद्वनं
सर्वं दग्ध्वा स्वयं शाम्यति एवं देहोपि तत्क्रियः तस्याग्नेरिव क्रियाव्यापारो यस्य सः ७ ननु नियतेंद्रियतया सात्त्विकसेवायामियं न क्षितिः पुरुषा
र्थः तथापि राजसादीन्विषयान्दुःखमिति जानंतोपि कथं सेवंत इति पृच्छति विदंतीति। पदं स्थानं श्वानो यथा भर्त्स्यमाना अपि पत्नीं खराय
था पादप्रहाराद्यपमाना अपि खरीमनुधावंति अजा पशुघ्नं निर्लज्जाः हन्यमाना अपि तद्वत् ८ मिथ्याभिनिवेशेन भुंजत इति सहेतुकमाह
अहमिति त्रिभिः प्रमत्तस्याविवेकवतोऽन्यस्य देहादावहमिति मिथ्याबुद्धिर्हृदि यथा यथा वर्धते उत्सर्पति। ततो हेतुभूतेऽथ वैकारिकं सत्त्वप्रधानम
पि मनः प्रति घोरं दुःखात्मकं रजः उत्सर्पति मनो व्याप्नोतीत्यर्थः ९ श्रीरामभद्राय नमः॥

भा·ए· ने ४

४१ दूरमेवं दूरमेवं भोग्यमिति सविकल्पः संकल्पः स्यात् । ततश्च अहो रूपमहो भाव इति गुणध्यानात् दुर्धरः कामः स्यात् १० ततो विषयानुभोक्तुं
कर्माणि करोति ११ एवं चेत्तर्हि कस्यापि दुःखनिवृत्तिः स्यादित्याशंक्याह यदपीति यद्यपि रजस्तमोभ्यां विक्षिप्तधीः स्यात् तथापि विद्वान्
विवेकी पुनर्मनो निरुन्धन्न सज्जते १२ विषयदोषदृष्ट्यापि मनोनिरोधाशक्तौ सुखं तन्निरोधोपायमाह अप्रमत्त इति अनिर्विण्णः अन- यदि
लसः यथाकालं त्रिषवणं मयि परमानन्दरूपे व्यर्पयन् समारभ्यात् १३ विषयैः संग्रथितस्य मनसस्तद्दूर्षया योगेश्वरनिष्ठत्वमसंभावितमन्य-
मानं प्रति तन्निरूपणायेतिहासमुपक्षिपति एतावानिति । यथा अद्धा आवेश्यते तदृश एतावानित्यर्थः १४ मच्छिष्यैरित्युक्ते ते-
षामपि ध्याय सामेनेन रूपेण निरूपणासंभवात् पृच्छति यदेति । तत्कालं तद्रूपं वेदितुमिच्छामि तत्कथयेति १५ मानसाः पुत्राः स्र-

रजोयुक्तस्य मनसः संकल्पः सविकल्पकः ॥ ततः कामो गुणध्यानात् दुःसहः स्याद्धि दुर्मतेः १० करोति कामवशगः कर्मा-
ण्यविजितेन्द्रियः ॥ दुःखोदर्काणि संपश्यन् रजोवेगविमोहितः ११ रजस्तमोभ्यां यदपि विद्वान् विक्षिप्तधीः पुनः । अतन्द्रि-
तो मनो युञ्जन् दोषदृष्टिर्न सज्जते १२ अप्रमत्तोनुयुञ्जीत मनो मय्यर्पयंछनैः ॥ अनिर्विण्णो यथाकालं जितश्वासो जि-
तासनः १३ एतावान्योग आदिष्टो मच्छिष्यैः सनकादिभिः ॥ सर्वतो मन आकृष्य मय्यद्धावेश्यते यथा १४ उद्धव उवाच
यदा त्वं सनकादिभ्यो येन रूपेण केशव ॥ योगमादिष्टवानेतद्रूपमिच्छामि वेदितुं १५ श्रीभगवानुवाच पुत्रा हिरण्यगर्भ-
स्य मानसाः सनकादयः ॥ पप्रच्छुः पितरं सूक्ष्मां योगस्यैकान्तिकीं गतिं १६ सनकादय ऊचुः गुणेष्वाविशते चेतो गुणा-
श्चेतसि च प्रभो ॥ कथमन्योन्यसंत्यागो मुमुक्षोरतितितीर्षोः १७ श्रीभगवानुवाच एवं पृष्टो महादेवः स्वयंभूर्भूतभाव-
नः ॥ ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः १८ श्रीराम॥

ष्टुर्दुर्ज्ञेयामैकान्तिकीं गतिं परां काष्ठां १६ तदेवाह गुणेष्विति विषयेषु स्वभावतो रागादिवशात् चेतः प्रविशति ते चानुभूता विषया वास- राम
ती नारूपेण चेतसि प्रविशन्ति । अतितितीर्षोः विषयानतिक्रमितुमिच्छोः १७ एवमिति महादेवोपि स्वयंभूरपि भूतानां स्रष्टापि ध्या- ४१
यमानः विचारयन्नपि प्रश्नस्य बीजं यदज्ञानादयं प्रश्नः तन्नाविदत् यतः कर्मविक्षिप्तधीः १८ श्रीरामभद्राय नमः श्रीराम॥

प्रश्नस्य पारमुत्तरं अभिप्रायो वा तत्तितीर्षया जिज्ञासया हंसरूपेणेति। यथा हंसो नीरक्षीरयोः पृथक्कर्तुं शक्तः एवमहं गुणाश्चेतश्चेति द्योत
यितुं हंसरूपेणागतोस्मीति १९ इत्यहं मुनिभिः पृष्ट इति पृष्टभगवान्स्ये। यदवोचमिति व पृथक्। अतो स्वच्छत्वान्निरदोषः तेभ्यो यदवोचं तन्मे
वचनं निबोध २० २१ देहादिविविक्तात्मज्ञाने सति तन्निष्ठस्य रागाद्यसंभवात् स्वयमेव विषयपवेतस्त्रो विश्लेषो भवतीति वक्तुं प्रश्नस्य
तुन्मिषेणैव तावदात्मानात्मविवेकमाह वस्तुन इति त्रिभिः किमात्मनोयं प्रश्नः उतुपाधेर्भूतसंघस्य वा। यद्यात्मनः तर्हि तस्य वस्तुनः
परमार्थरूपस्य अनानात्वे सति हे विप्राः वः युष्माभिः कृतः ईदृशः बहुषु निर्धारणरूपः कथं घटेत। वक्तुरुत्तरदातुर्वा मे मम क आश्रयः
अविशेषे आत्मनि कं जातिगुणादिविशेषमाश्रित्योत्तरं वक्ष्यामीत्यर्थः २२ भूतसंघविषयत्वेपि अयं वः प्रश्नः वाचारंभः वाङ्मात्रेण

सम्मामचिंतयद्देवः प्रश्नपारतितीर्षया॥ तस्याहं हंसरूपेण सकाशमगमं तदा १९ दृष्ट्वा मां त उपाव्रज्य कृत्वा पादाभिवं
दनं॥ ब्रह्माणमग्रतः कृत्वा पप्रच्छुः को भवानिति २० इत्यहं मुनिभिः पृष्टस्तत्वजिज्ञासुभिस्तदा॥ यदवोचमहं तेभ्यस्तदुद्ध
व निबोध मे २१ वस्तुनो यद्य नानात्व आत्मनः प्रश्न ईदृशः॥ कथं घटेत वो विप्रा वक्तुर्वा मे क आश्रयः २२ पंचात्मकेषु
भूतेषु समानेषु च वस्तुतः॥ को भवानिति वः प्रश्नो वाचारंभो ह्यनर्थकः २३ मनसा वचसा दृष्ट्या गृह्यतेन्यैरपींद्रियैः॥ अ
हमेव न मत्तोन्यदिति बुध्यध्वमंजसा २४ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः॥ जीवस्य देह उभयं गुणाश्चेतो मदात्मनः २५

रर्थः। यतोनर्थकः कुतः भूतेषु देवमनुष्यादिदेहेषु पंचभूतात्मकेषु अतः समानेषु अभिन्नेषु पुनश्च वस्तुतः परमकारणात्मना अभि
न्नेषु। वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः २३ तत्र पंचात्मकत्वं प्रत्यक्षादिसिद्धमेवेति परमकारणाभेदमेवोपपादयति
मनसेति मनआदिभिर्यद्गृह्यते तत्तदहमेवेत्यर्थः। अंजसा तत्वविचारेण एतेनैव सर्वात्मकोहमित्यंजसाप्युत्तरमुक्तं भवति २४ एवं प्रश्नस्य
ईश्मिषेणैवात्मस्वरूपं सामान्यतो निरूप्य ब्रह्मणोपि दुष्परिहरं यत्पृष्टं तत्रोत्तरमाह गुणेष्विति आदिना यावदध्यायसमाप्तिः अयमभिप्रायः य
दि कर्तृत्वभोक्तृत्वादिरूपतया विषयैः संग्रथितं चित्तं बुध्यादिशब्दवाच्यमेव जीवस्य स्वरूपं भवेत् तर्हि तस्य तद्वियोगो न घटेत। तस्य तु स्वरूपमहं
ब्रह्मैव। चित्ताध्यासेन तु तत्स्वभावतया विषयैः संग्रथितं। अतः स्वस्य ब्रह्मत्वभावनया विषयाणां चैवं तत्र प्रविशति गुणाश्चेतसि च वं गुणा
१५ मिथ्यात्वानुसंधानेन सर्वतो निर्विषयं भगवंतं भजतो भवत्येव परिपूर्णस्वरूपावस्थानमिति हे प्रजाः पुत्रकाः सत्यं गुणेषु ४१

श्चेतश्चोभयग्रथितमहान्मनो ब्रह्मस्वरूपस्य जीवस्य देहः अध्यस्तउ
पाधिः न तु स्वरूपं २५ श्रीराम

तस्मात्त्वभीक्ष्णं पुनःपुनर्गुणसेवया तत्संस्कारेण गुणेष्वाविशच्चित्तं तेषु पुनर्वासनारूपेणाचित्ते प्रकर्षेण भवतीति तथा ते गु
णाश्चेतश्च एवं यदुभयं तन्मद्रूपः सन् त्यजेत् २६ ननु जाग्रदाद्यवस्थावतः कुतः कूटस्थत्वं मद्रूपतात्वंचाह जाग्रज्जागरः स्वप्नः सुषु
प्तं चेति । बुद्धेरेता वृत्तयः ता अस्येन स्वाभाविक्यः किंतु सत्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् । प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु
संततमिति वक्ष्यमाणक्रमेण गुणत एव । जीवस्तु विलक्षणः । तदवस्थारहित एव विनिश्चितः । कुतः तासां साक्षित्वेन २७ ननु तर्हि कि
थमहं जागर्मीत्यादि प्रतीतिस्तत्राह यर्हि यस्मात् सम्यक् संसृतिः संसरणमनयेति संसृतिर्बुद्धिः । तया बंधोयमात्मनो गुणवृत्तिदः द्रा
ति तस्मान्मयि तुर्ये स्थितः सं निःसंगस्सन् संसृतिबंधं जह्यात् । तत्र तदा गुणचेतसां गुणानां चेतसश्चान्योन्यं त्यागो भवति २८ कथं संस्त्या

गुणेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया ॥ गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत् २६ जाग्रत्स्वप्नः सुषुप्तं च गुणतो बु
द्धिवृत्तयः ॥ तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः २७ यर्हि संसृतिबंधोयमात्मनो गुणवृत्तिदः ॥ मयि तुर्ये स्थि
तो जह्यात् त्यागस्तद्गुणचेतसां २८ अहंकारकृतं बंधमात्मनोर्थविपर्ययं ॥ विद्वान्निर्विद्य संसारचिंतां तुर्ये स्थितस्त्यजेत्
२९ यावन्नानार्थधीः पुंसो न निवर्तेत युक्तिभिः ॥ जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ३० असत्वादात्मनोन्ये
षां भावानां तत्कृता भिदा ॥ गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ३१

तं बंधः कथं वैतद्धात्यत आह अहंकारेण कृतं बंधं आत्मनः अर्थविपर्ययं आनंदाद्यावरणेनानर्थहेतुं विद्वान् ज्ञानवान् निर्विद्य दुःखमेतदि
ति ज्ञात्वा तुर्ये स्थितो भूत्वा संसारचिंतां संसारो बुद्धिः तस्मिन्नु चिंतां अभिमानेन तत्कृतां भोगचिंतां च त्यजेदिति २९ यावदेवं नत्य
जेत् तावदस्य कर्मज्ञानादि सर्वं व्यर्थमित्याह । यावदिति यद्यपि जागर्ति कर्मादिषु तथापि स्वपन् स्वप्नान्पश्यन्निव भवति । यतोऽज्ञः । अ
सम्यग्दर्शी । अज्ञजागरत्वस्य स्वप्ने दृष्टांतः स्वप्न इति ३० ननु कथं वेदप्रमितवर्णाश्रमकर्मादिनानाधीर्निवर्तेत तत्राह असत्वादि
ति । भावानां देहादीनां तत्कृता भिदा वर्णाश्रमादिरूपा गतयः स्वर्गादिफलानि हेतवः कर्माणि चास्यात्मनो मृषा । अविद्यावद्विषयो वेद इ
ति भावः ३१

युक्तिभिरित्युक्तं।ता एव युक्तीराह।य इति।अर्थान् स्रक्चन्दनादीन् हारान् समस्तकरणैः चक्षुरादिभिर्भुंक्ते।कथंभूतान्।अनुक्षणधर्मिणः
क्षणिकबाल्यतारुण्यादिधर्मवतः।यश्च स्वप्ने हृदि जागरदृष्टसदृशान् वासनामयान् भुंक्ते।यश्च सुषुप्ते तान् सर्वानुपसंहरति स एकः
कुतः त्रिगुणवृत्तिदृक् अवस्थात्रयद्रष्टा।ननु जाग्रदवस्थायां सर्वेंद्रियाणि पश्यंति स्वप्ने मनः सुषुप्तिन संस्कारशेषा बुद्धिः कथमात्मा तद्द्र
ष्टा तत्राह इंद्रियेशः।ननु इंद्रियेशा अपि विश्वतैजसप्राज्ञा भिन्नाः।नेत्युक्तं नः स्मृत्या प्रतिसंधानेन सर्वावस्थास्वन्वयात्।यः स्वप्नान् द्रक्ष्ये
यश्च तदनंतरं न किंचिदवेदिषं स एव एतर्हि जागर्मीति।उपाधिभेदेन विश्वादिव्यवहारस्तु विभाव्यः।एते न बाल्ययुवाद्यवस्थास्वपि प्र
तिसंधानेन ऐक्यं द्रष्टव्यं ३२ ततः किं मत आह एवमिति गुणतो या एता मनसस्तिस्रोवस्थाः ताः मद्विषया मयि कृताः न तत्त्व

यो जागरे बहिरनुक्षणधर्मिणोर्थान् भुंक्ते समस्तकरणैर्हृदि तत्सदृक्षान्।स्वप्ने सुषुप्त उपसंहरते स एकः स्मृत्यन्वयात्
त्रिगुणवृत्तिदृगिंद्रियेशः ३२ एवं विमृश्य गुणतो मनसस्त्र्यवस्था मन्मायया मयि कृता इति निश्चितार्थाः।संछिद्य हा
र्दमनुमानसदुक्तितीक्ष्णज्ञानासिना भजत माखिलसंशयाधिं ३३ ईक्षेत विभ्रममिदं मनसो विलासं दृष्टं विनष्टम
तिलोलमलातचक्रं।विज्ञानमेकमुरुधेव विभाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ३४ दृष्टिं ततः प्रति
निवर्त्य निवृत्ततृष्णः तूष्णीं भवेन्निजसुखानुभवो निरीहः।संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्रमाय न भवेत्स्मृतिरानिपातात् ३५

तः प्रतिसंतीति निश्चितः आत्मस्वरूपार्थो यैस्ते यूयं अखिलसंशयानामाधिं आधीयते स्मिन्निति आधिरहंकारस्तं संछिद्य हार्दं हृदिस्थितं मां भ
जत केन छित्वा तदाह अनुमानेः सद्युक्तिभिः सतां गुरूपदेशैः श्रुतिभिश्च तीक्ष्णेन ज्ञानखड्गेन ३३ अनुमानानि दर्शयति ईक्षेतेति द्वाभ्यां इदं जगत्
विभ्रममेवेक्षेत तत्र हेतवः मनोविलसितत्वात् दृष्टनष्टत्वात् विनाशित्वाच्च स्वप्नवत् अतिलोलत्वात् अलातचक्रवत्।ननु भ्रमो निरधिष्ठा
भा पः कथं स्यात्तत्राह विज्ञानमिति निगमनं तस्मात् त्रिधा यो त्रिगुणपरिणामकृतो विकल्पो भेदः स मायैवेति ३४ तस्मात्ततो दृश्याद्दृष्टिं प्रति
निवर्त्य निजसुखानुभवो भवेत्तन्नैरंतर्यार्थं निवृत्ततृष्णः तूष्णीं निरीहश्च भवेत् मनोवाक्कायव्यापाररहितः इत्यर्थः ननु देहवतः सर्वथा
द्वैतदृष्टिप्रतिनिवर्तनं योगात्पुनः संसारः स्यादेव तत्राह संदृश्यत इति क्वचिदाहारादिव्यवहारे इदं यद्यपि दृश्यते तत

…पि पूर्वमवस्तुबुद्ध्या परित्यक्तं तत्पुनर्मोहाय न भवेदेव किंतु देहपातप
र्यंतं स्मृतिरिवस्मृतिः संस्कारमात्रेणावभासो भवेदित्यर्थः ३५

श्री

एतदेवोपपादयति देहमिति आसनादुत्थितमुत्थायतत्रैवस्थितं ततः क्वचिद्दपेतं निर्गतं पुनस्तत्रैवोपेतं वा देहमपि नानुसंधत्ते कुतोऽन्यत् ।
यतः येन देहेन स्वरूपमध्यगमत् ज्ञातवान् । तं देहं । यतः कारणात् शितिवा परिकृतं परि हितं वासो गतं स्थितं वा यथा नैवोन्मत्तः ३६
ननु चायं परिपाल्यमानोऽपि मुमूर्षति । तं चेत्न पश्यति तर्हि पतेदेवेत्याह देहोपीति दैववशोऽनगच्छन् स्वारंभकं कर्म यावदस्ति तावत्स्वयं तं प्र
तिसमीक्षत एव सासुः प्राणेंद्रियसहितः । तर्हि तस्मिन्कदाचिदासक्तो भवेत्तत्राह तमिति । स्वाप्नं स्वप्नतुल्यं अधिरूढः प्राप्तः समाधिपर्यंतो
योगो येन । अतएव प्रतिबुद्धं ज्ञातं परमार्थवस्तु येन सः । तथा च श्रुतिः । तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति ३७ उक्ता
र्थे तेषां विश्वासार्थं स्वस्वरूपमाह । मयेति सांख्यमात्मानात्मविवेकः । योगोऽष्टांगः तयोर्गुह्यं रहस्यं यज्ञो विष्णुः युष्मद्धर्मविवक्षयेत्यनेन

देहं च नश्वरमवस्थितमुत्थितं वा । सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं ॥ दैवादपेतमुत दैववशादुपेतं वासो यथा परिकृतं मदिरामदां
धः ३६ देहोऽपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः ॥ तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भ
जते प्रतिबुद्धवस्तुः ३७ मयैतदुक्तं वो विप्रा गुह्यं यत्सांख्ययोगयोः ॥ जानीत मागतं यज्ञं युष्मद्धर्मविवक्षया ३८ अहं योगस्य सां
ख्यस्य सत्यस्यर्तस्य तेजसः ॥ परायणं द्विजश्रेष्ठाः श्रियः कीर्तेर्दमस्य च ३९ मां भजंति गुणाः सर्वे निर्गुणं निरपेक्षकं ॥ सुहृदं
प्रियमात्मानं साम्यासंगादयोऽगुणाः ४० इति मे छिन्नसंदेहा मुनयः सनकादयः ॥ सभाजयित्वा परया भक्त्यागृणत संस्त
वैः ४१ तैरहं पूजितः सम्यक् संस्तुतः परमर्षिभिः ॥ प्रत्येयाय स्वकं धाम पश्यतः परमेष्ठिनः ४२ ॥ ॥ इति श्रीभागवते महा
पुराणे एकादशस्कंधे त्रयोदशोऽध्यायः ॥ ॥ ॥ उद्धव उवाच वदंति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः ॥ तेषां विकल्पप्राधान्यमुताहो

धर्मा अप्युपदिष्टा इति ज्ञेयं ३८ अत एव यत्तेन हंसरूपेण ब्रह्मणेऽभ्यास्म माधवेऽस्त्वनुवादो भविष्यति । ऋतं प्रमीयमाणो धर्मः सत्यं अनुष्ठी
यमानो धर्मः तेजः प्रभावः । एतेषां परमयनं ३९ किंच मामिति कथंभूताः अगुणाः गुणपरिणामरूपा न भवंति किंतु नित्या इत्यर्थः ४०
त मे मया अगृणत अस्तुवन् ४१ ॥ ॥ इत्येकादशे त्रयोदशः ॥ ॥ चतुर्दशे परं श्रेयो भक्तिरेव वरं स्मरेत् । इत्येतद्वर्ण्यते ध्यानयोगश्च सहसाधनैः एवं तावद्भ
गवता भक्त्या मोक्ष इत्युक्तं अन्ये त्वन्याभिः साधनाभिर्वदंति । तत्र विशेषनिर्धारणाय पृच्छति श्रेयांसीति । श्रेयः साधनानि किं विकल्पेन प्राधान्यं उताहो किं वा एक
स्यैव मुख्यता १ श्रीरामाय

२ प्राधान्येन वा किं कल्पितानि स्वल्पकफलानीति विवेक्तुं प्रकृत्यनुसारेण बहुधा वेदार्थप्रतिपत्तिमाह कालेनेति सप्तभिः

पक्षे श्रुतानेकारणे भवन्तीति । न अपेक्षितं अपेक्षा यस्मिन् सः अहैतुक अयमर्थः भवता यो भक्तियोग उक्तः अन्ये च यानि श्रेयःसाधनानि वद-
न्ति तेषां किं साक्षात्फलसाधनत्वेन प्राधान्यमेव सर्वेषामुतांगांगित्वं प्राधान्येपि किं विकल्पेन सर्वेषां तुल्यफलत्वं यद्वा कश्चिदस्ति विशेष इति २
तत्र भक्तिरेव महाफलत्वेन मुख्या अन्यानि तु स्वस्वप्रकृत्यनुसारेण पुष्पस्थानीयस्वर्गादिफलबुद्धिभिः प्राणिभिः मदात्मकः मय्येवा-
त्मा चित्तं येन सः ३ भृग्वादयः भृगुश्च मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुरित्येते वसिष्ठश्च ब्रह्माणः प्रजापतयः ते च ते महर्षयश्च ४ ५
किंदेवाः क्लमस्वेददौर्गंध्यादिराहित्येन किं देवाः मनुष्याः वेति संदेहास्पदभूता द्वीपांतरमनुष्याः एवं किंनराः किंचिन्नरा इव मुख्यतः शरीरतो

भवतोदाहृतः स्वामिन् भक्तियोगोनपेक्षितः ॥ निरस्य सर्वतः संगं येन त्वय्याविशेन्मनः २ श्रीभगवानुवाच कालेन न-
ष्टा प्रलये वाणीयं वेदसंज्ञिता ॥ मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ३ तेन प्रोक्ता स्वपुत्राय मनवे पूर्वजाय सा ॥
ततो भृग्वादयोगृह्णन् सप्त ब्रह्ममहर्षयः ४ तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः ॥ मनुष्याः सिद्धगंधर्वाः सविद्याध-
रचारणाः ५ किंदेवाः किन्नरा नागा रक्षः किंपुरुषादयः ॥ बह्व्यस्तेषां प्रकृतयो रजःसत्वतमोभुवः ६ याभिर्भूतानि भि-
द्यंते भूतानां मतयस्तथा ॥ यथाप्रकृति सर्वेषां चित्रा वाचः स्रवंति हि ७ एवं प्रकृतिवैचित्र्याद्भिद्यंते मतयो नृणां ॥ पारं-
पर्येण केषांचित्पाषंडमतयोपरे ८ मन्मायामोहितधियः पुरुषाः पुरुषर्षभ ॥ श्रेयो वदंत्यनेकांतं यथाकर्म यथारुचि ९
धर्ममेके यशश्चान्ये कामं सत्यं दमं शमं ॥ अन्ये वदंति स्वार्थं वा ऐश्वर्यं त्यागभोजनं १० श्रीरामाय नमः ॥

वा किंपुरुषाः किंचित्पुरुषा इव वानरादयः प्रकृतयः वासना बह्व्यः कुतः रजःसत्वतमोभिर्भुवः जन्मस्थानं यासां ताः ६ भूतानि देवासुरमनुष्या-
दीनि चित्रा वाचः वेदार्थव्याख्यानविषयाः ७ एवमित्युक्तोपसंहारः केषांचिदध्ययनादिशून्यानामप्युपदेशपारंपर्येण अपरे पाषंडमतयः
वेदविरुद्धार्थमतयः ८ एतत्प्रकृतीनां मायागुणमूलत्वात् मन्मायामोहितधियः अनेकांतं नानाविधं ९ तदेवाह धर्ममिति सार्धेन धर्मं कर्ममी-
मांसकाः तदुक्तं मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः । नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासयेत्यादि यशः काव्यालंकारकृतः यथाहुर्या-
वत्कीर्तिर्मनुष्यस्य पुण्या लोकेषु गीयते । तावद्वर्षसहस्राणि स्वर्गलोके महीयत इति कामं वात्स्यायनादयः सत्यं शमं दमं योगशास्त्रकृतः अन्ये द-
स्वार्थं वा रि नोर्दण्डनीतिकृतः वैषयिकं ऐश्वर्यमेव स्वार्थं पुरुषार्थं वदंति अतः सामाद्युपायाश्च श्रेयःसाधनानीति तेषां मते तथैव त्यागभोजनं च १०

लोकायतिकाः पूर्वं तपो दानं यज्ञो देवतानां पूजनं तपः स्वदानं च १०

भा॰ए॰ लोकायतिकाः पूर्वं तपोदानं यज्ञो देवतानां पूजनं तपः स्वदानं च

४४ तेषां तु तुच्छफलत्वमाह आद्यन्तवन्त इति एषां लोकाः एतैः साध्या निष्फलानि । तमो निष्ठा मोहावसाना भोगकालेऽप्यसूयादिभिः शुचार्पि
ताः व्याप्ताः ११ भक्तेर्मुख्यत्वमाह मयीति यावत्समाप्तिः हे सभ्य मया परमानन्दरूपेण आत्मना स्वरूपत्वेन स्फुरता १२
किंच अन्येषां तत्तल्लोकादि परिच्छिन्नं सुखं भक्तस्य तु परिपूर्णमित्याह अकिंचनस्येति १३ परिपूर्णतामेवाह न पारमेष्ठ्यमिति ।

तुष्ठं ३ रसाधिपत्यं पातालादिस्वाम्यं अपुनर्भवं मोक्षमपि मद्विना मां हित्वा अन्यं नेच्छति अहमेव तस्य प्रेष्ठ इत्यर्थः १४ ममापि स ए
व प्रेष्ठ इत्याह न तथेति द्वाभ्यां आत्मयोनिर्ब्रह्मा पुत्रोऽपि शंकरः मत्स्वरूपभूतोऽपि संकर्षणः भ्राताऽपि श्रीर्भार्याऽपि आत्मा मूर्ति

१०
केचिद्यज्ञं तपो दानं व्रतानि नियमान्यमान् । आद्यन्तवन्त एवैषां लोकाः कर्मविनिर्मिताः ११ दुःखोदर्कास्तमोनिष्ठाः क्षु
द्रा नंदाः शुचार्पिताः ॥ मय्यर्पितात्मनः सभ्य निरपेक्षस्य सर्वतः । मयात्मना सुखं यत्तत्कुतः स्याद्विषयात्मनां १२
अकिंचनस्य दान्तस्य शान्तस्य समचेतसः ॥ मया संतुष्टमनसः सर्वाः सुखमया दिशः १३ न पारमेष्ठ्यं न महेंद्रधि
ष्ण्यं न सार्वभौमं न रसाधिपत्यं ॥ न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत् १४ न तथा मे
प्रियतम आत्मयोनिर्न शंकरः ॥ न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान् १५ निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शि
नं ॥ अनुव्रजाम्यहं नित्यं पूयेयेत्यंघ्रिरेणुभिः १६ निष्किंचना मय्यनुरक्तचेतसः शान्ता महान्तोऽखिलजीववत्स
लाः ॥ कामैरनालब्धधियो जुषन्ति यत्तन्नैरपेक्ष्यं न विदुः सुखं मम १७

रपि । यथा भवानिति वक्तव्ये अक्षिहर्षेण अहं भवानिति १५ पूयेयमहं तत्र वर्तिब्रह्माण्डानि पवित्रीकुर्यामिति भावेनेत्यर्थः १६ किंच मद्भ
क्तानां सुखं एतावदेवेति भूतमिति वा को वक्तुं समर्थः यतस्तत्स्वसंवेद्यं निरुपममित्याह निःकिंचना इति । महान्तः निरहंमानाः अनाल
ब्धाधियः अस्पृष्टचित्ताः निष्किंचनत्वादीनां यथेष्टहेतुहेतुमद्भावः एवंभूताः मम मदीयाः यत्सुखं जुषन्ति सेवन्ते तत्सुखं त एव विदुः राम
नान्ये कुतो नैरपेक्ष्यं नास्ति अपेक्षणीयं येषां ते निरपेक्ष्याः तैरेव लभ्यं न तु मोक्षापेक्षैरित्यर्थः जुषन्ते प्रीणन्ति तत्र एवं यन्नैरपेक्ष्यं ४४
सुखं तद्विदुर्नान्य इत्यन्वयः १७ श्रीरामाय ॥

यद्वा एवंभूताः संतो ये मम मामाश्रिता इत्यर्थः ॥ २

प्राणायामो द्विविधः सगर्भोऽगर्भश्चेति तत्र श्रेष्ठत्वात् प्रणवगर्भमाह हृदीति द्वाभ्यां मूलाधारादारभ्य अविछिन्नं संततं घंटानादतुल्यमों
कारं हृदि संस्थिते प्राणे न तु दीर्घे ऊर्ध्वं द्वादशान्तपर्यन्तं नीत्वा कथं बिसोर्णवत् कमलनालतंतुवत् तत्र मात्रान्ते स्वरे यत्र दत्तां बिंदुसंज्ञे प्रापयेत्।
अथ पुनरित्यस्य तत्र बिंदुशिरस्कं कुर्यादित्यर्थः। यद्वा मूलाधारादारभ्य मूर्धान्तपर्यन्तं बिसतंतुवत्सूक्ष्ममविछिन्नं संतं हृदि मनसि प्राणेनोदी
र्याभिव्यज्य अथ पुनः तत्र ओंकारे घंटानादतुल्यं स्वरे उदात्तनादे स्थिरीकुर्यादिति ३४ मासादर्वाक् जितानिलो भवति ३५ एवं ध्यानांगमु
क्त्वा यादृशमित्यस्योत्तरं वक्तुं ध्येयपीठमाह। हृत्पुंडरीकमिति सार्धेन। अंतस्थे देहान्तर्वर्ति ऊर्ध्वनालमधोमुखं मुकुलितं कदलीपुष्पसंकाशं

हृद्यविछिन्नमोंकारं घंटानादं बिसोर्णवत्। प्राणेनोदीर्य तत्राथ पुनः संवेशयेत्स्वरे ३४ एवं प्रणवसंयुक्तं प्राणमेव समभ्य
सेत्। दशकृत्वस्त्रिषवणं मासादर्वाग्जितानिलः ३५ हृत्पुंडरीकमंतःस्थमूर्ध्वनालमधोमुखं। ध्यात्वोर्ध्वमुखमुन्नि
द्रमष्टपत्रं सकर्णिकं ३६ कर्णिकायां न्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरं। वन्हिमध्ये स्मरेद्रूपं ममैतद्ध्यानमंगलं ३७ समं प्रशां
तं सुमुखं दीर्घचारुचतुर्भुजं। सुचारुसुंदरग्रीवं सुकपोलं शुचिस्मितं ३८ समानकर्णविन्यस्तस्फुरन्मकरकुंडलं। हेमांबरं घन
श्यामं श्रीवत्सश्रीनिकेतनं ३९ शंखचक्रगदापद्मवनमालाविभूषितं। नूपुरैर्विलसत्पादं कौस्तुभप्रभया युतं ४० श्रीमा
द्युमत्किरीटकटककटिसूत्रांगदायुतं। सर्वांगसुंदरं हृद्यं प्रसादसुमुखेक्षणं ४१ सुकुमारमभिध्यायेत्सर्वांगेषु मनो दधत्।
इंद्रियाणींद्रियार्थेभ्यो मनसाकृष्य तन्मनः। बुध्या सारथिना धीरः प्रणयेन्मयि सर्वतः ४२ ४२

यदस्ति तदुपरि तद्ध्यात्वेत्यर्थः ३६ न्यसेत् चिंतयेत् सविशेषणं ध्यानमाह वन्हिमध्य इति षड्भिः ध्यानमंगलं ध्यानस्य शुभविषयं ३७
समं अनुरूपावयवं दीर्घाश्चारवश्चत्वारो भुजा यस्मिन् तत् सुचारु अतिरम्यं ३८ समानयोः कर्णयोर्विन्यस्ते स्फुरती मकराकारे कुंडले यस्मि
न्तत् ३९ श्रीवत्सश्रियो निकेतनं वक्षसि दक्षिणवामस्तनाभ्यां युक्तमित्यर्थः ४० द्युमद्भिः किरीटादिभिः आ समंताद्युतं अलंकृतं प्रासादे
न शोभनं मुखमीक्षणं च यस्मिन् तत् ४१ सुकुमारं अति कोमलं सविशेषणं ध्यानमुपसंहरति इंद्रियाणीति। प्रकर्षेण नयेत् सर्व
तः सर्वांगयुक्ते ४२ श्रीरामभद्राय नमः श्रीगोपालाय नमः श्रीकृष्णाय नमः श्रीरामचंद्राय नमः श्रीरामाय नमः॥

यादृशमित्यस्योत्तरत्वेन सविशेषणमुक्त्वा यदात्मकमित्यस्योत्तरत्वेन विशेषणत्यागेन ध्यानमेव समाधिपर्यंतमाह तदिति त्रिभिः
एकत्रांगे अन्यान्यंगानि न चिंतयेत् । एकत्रेति यदुक्तं तद्दर्शयति । सुस्मितमिति ४३ व्योम्नि सर्वकारणरूपे । तच्च कारणत्वमपि
त्यक्त्वा मदारोहः मयि शुद्धे ब्रह्मण्यारूढः सन् न किंचित् ध्यातृध्येयविभागमपि न चिंतयेत् ४४ मामेवात्मनि विचष्टे आत्मानं च सर्वा
त्मानमपि संयुते विचष्टे । ज्योतिर्ज्योतिषि संयुक्तमिवेत्यन्वयः ४५ एवंभूतसमाधिपर्यंत ध्यानस्य फलमाह । ध्यानेनेति । मनो युंजतः समा
दधतः द्रव्यज्ञानक्रियाभ्रमः । अधिभूताधिदैवाध्यात्मरूपः द्रश्यद्रष्टृदर्शनरूपो वा भ्रमः निर्वाणं शांतिं सम्यग्यास्यतीति ४६ ॥ ॥
इत्येकादशटीकायां चतुर्दशोध्यायः ॥ ॥ ॥ ततः पंचदशे प्रोक्ताः सिद्धयो धारणानुगाः ॥ श्रीविष्णुपदसंप्राप्तावंतरायतया मताः १ एवं मनो

[illegible] ॥ तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत् ४२ नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्मु
४३ खं ॥ तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् ४४ तच्च त्यक्त्वा मदारोहो न किंचिदपि चिंतयेत् ॥ एवं समाहितमतिर्मामेवात्मा ४४
४५ नमात्मनि ४५ विचष्टे मयि सर्वात्मन् ज्योतिर्ज्योतिषि संयुतं ॥ ध्यानेनेत्थं सुतीव्रेण युंजतो योगिनो मनः ॥ संयास्यत्याशु निर्वा
णं द्रव्यज्ञानक्रियाभ्रमः ४६ ॥ ॥ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे चतुर्दशोध्यायः ॥ ॥१४॥ ॥श्री॥
॥ ॥ श्रीभगवानुवाच ॥ जितेंद्रियस्य युक्तस्य जितश्वासस्य योगिनः ॥ मयि धारयतश्चेत उपतिष्ठंति सिद्धयः १ उद्धव उवा
च ॥ कया धारणया कास्वित्कथं स्वित्सिद्धिरच्युत ॥ कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदो भवान् २ श्रीभगवानुवाच ॥
सिद्धयोष्टादश प्रोक्ता धारणा योगपारगैः ॥ तासामष्टौ मत्प्रधाना दशैव गुणहेतवः ३ श्रीरामचंद्राय नमः

युंजतो योगिनोंतराविर्भवंत्यः सिद्धयो ह्यंतरायप्राया एव । अतस्ताः परिहृत्य परमेश्वरपर एव भवेदिति वक्तुं सिद्धीराह । जितेंद्रियस्येति । यु
क्तस्य स्थिरमतेस्तस्य १ स्विदिति वितर्के कास्वित् किंनाम्नी । कथं स्वित् कीदृशी वा । धारणायाश्च कतीति प्रश्नोत्तरे बाह्यरूपत्वमेवेति ज्ञाना
सि नान्यद्भूतासाशये नाह योगिनामिति २ धारणाश्च अष्टादश लमनुषंगः योगपारगैरिति त्रिकालज्ञत्वादिषु क्षुद्रसिद्धिरन्येपि जानंतीति
भावः अहमेव प्रधानं मुख्यः स्वभावतः आश्रयो यासां ताः मत्सारूप्यं प्राप्तेषु किंचिन्न्यूना भवंतीति भावः गुणहेतवः सत्वोत्कर्षहेतुकाः ३

यस्मादन्यत्साधनं तत्फलं च स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मात्तद्विहाय मय्येव मनः समाहितं कुर्वीतेति प्रकरणार्थमुपसंहरति तस्मादि
ति। मद्भावभावितं मद्भावेन भजनेनैव शोधितं २८ विशेषतो वात्स्यायनाद्युक्तकामसमार्गाः परित्याज्या इत्याह स्त्रीणामिति आत्मवान्
धीरः सन् क्षेमे निर्भये देशे विविक्ते विजने २९ एतदुपपादयति। न तथेति अस्य पुंसः यथा तत्संगिसंगतः क्लेशो भवेत् यथा च बंधो योषित्सं
तो गतः तथान्यप्रसंगान्न भवेदिति ३० मां चिंतयेदित्युक्तं तत्प्रकारं पृच्छति। यथेति ध्यानांगप्रश्नः यादृशमिति ध्येयविशेषणप्रश्नः। यदात्मक
मिति यस्य तानि विशेषणानि तत्स्वरूपप्रश्नः। एतन्मे ध्यानमेव वक्तुमर्हसीति पाठः तत्रायमर्थः। मुमुक्षुस्त्वां यथा ध्यायेत् तन्मे वक्तुमर्हसि

तस्मादसदभिध्यानं यथा स्वप्नमनोरथं ॥ हित्वा मयि समाधत्स्व मनो मद्भावभावितं २८ स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा
दूरत आत्मवान् ॥ क्षेमे विविक्त आसीनश्चिंतयेन्मामतंद्रितः २९ न तथास्य भवेत्क्लेशो बंधश्चान्यप्रसंगतः ॥ योषित्संगा
द्यथा पुंसो यथा तत्संगिसंगतः ३० उद्धव उवाच यथा त्वामरविंदाक्ष यादृशं वा यदात्मकं ॥ ध्यायेन्मुमुक्षुरेतन्मे ध्यानं मे व
क्तुमर्हसि ३१ श्रीभगवानुवाच समआसनआसीनः समकायो यथासुखं ॥ हस्तावुत्संग आधाय स्वनासाग्रकृतेक्षणः
३२ प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः ॥ विपर्ययेणापि शनैरभ्यसेन्निर्जितेंद्रियः ३३

त जिज्ञासेत् कथनीयं मे पुनरेतं [illegible] द्दास्यमेव पुरुषार्थः। न तु ध्याने न कृत्यमस्तीति तदुक्तं त्वयोपभुक्तस्रग्गंधेत्यादि त्वं वक्तुमर्हसीति पाठ
स्तु सुगमः ३१ तत्र ध्यानांगत्वेनासनप्राणायामप्रकारमाह सम इति चतुर्भिः समे नात्युच्छ्रिते नातिनीचे आसने कंबलादौ समकायस्स
न्यथासुखमासीन इति नात्र स्वस्तिकादिनियम इत्युक्तं। नासाग्रनिरीक्षणं च चित्तस्थैर्याय। अंतर्लक्ष्यो बहिर्दृष्टिः स्थिरचित्तः सुसंयत इ
ति योगशास्त्रोक्तेः ३२ विपर्ययेण रेचकपूरककुंभकक्रमेणापि पिंगलया वामनाड्या पूरितं दक्षिणयात्यजेत्। तया चापूरितं वामयात्यजेन् इ
त्येवं विपर्ययेण। यथोक्तं योगशास्त्रे। इडया पूरयेद्वायुं त्यजेत्पिंगलया ततः इति। निर्जितेंद्रिय इति प्रत्याहार उक्तः ३३ श्रीरामायनमः॥

अपिचआस्तांतावदुत्तमभक्तकथायंतुः प्राकृतोपिभक्तः कृतार्थएवेत्याह। बाध्यमानइतिद्वाभ्यां। विषयैराकृष्यमाणोपिप्रगल्भयासमर्थया
१८ पाकाद्यर्थंप्रज्वालितोग्निर्यथाकाष्ठानिभस्मीकरोतितथारागादिनाधिकंयंविनामद्विषयासतीभक्तिःसमस्तपापानीतिभगवा
नपिस्वभक्तिमहिमाश्चर्येणसंबोधयतिअहोउद्धवविस्मयंपश्यैवेति १९ अतएवंभूतंश्रेयोनान्यदस्तीत्याहनसाधयतीतिद्वाभ्यां २०
श्रद्धयायाभक्तिस्तयासंभवात्जातिदोषादपीत्यर्थः २१ भक्त्यभावेन्यत्साधनंव्यर्थमित्याहद्वाभ्यांधर्मइति २२ रोमहर्षादिकंविना

बाध्यमानोपिमद्भक्तोविषयैरजितेंद्रियः॥ प्रायःप्रगल्भयाभक्त्याविषयैर्नाभिभूयते १८ यथाग्निःसुसमिद्धार्चिःकरोत्ये
धांसिभस्मसात्॥ तथामद्विषयाभक्तिरुद्धवैनांसिकृत्स्नशः १९ नसाधयतिमांयोगोनसांख्यंधर्मउद्धव॥ नस्वाध्या
यस्तपस्त्यागोयथाभक्तिर्ममोर्जिता २० भक्त्याहमेकयाग्राह्यःश्रद्धयात्माप्रियःसतां॥ भक्तिःपुनातिमन्निष्ठाश्वपाकान
पिसंभवात् २१ धर्मःसत्यदयोपेतोविद्यावातपसान्विता॥ मद्भक्त्यापेतमात्मानंनसम्यक्प्रपुनातिहि २२ कथंविनारोमह
र्षंद्रवताचेतसाविना॥ विनानंदाश्रुकलयाशुध्येत्भक्त्याविनाशयः २३ वाग्गद्गदाद्रवतेयस्यचित्तंरुदत्यभीक्ष्णंहसतिक्व
चिच्च॥ विलज्जउद्गायतिनृत्यतेचमद्भक्तियुक्तोभुवनंपुनाति २४ यथाग्निनाहेममलंजहातिध्मातंपुनःस्वंभजतेचरूपं॥
आत्माचकर्मानुशयंविधूयमद्भक्तियोगेनभजत्यथोमां २५ यथायथात्मापरिमृज्यतेसौमत्पुण्यगाथाश्रवणाभिधानैः॥
तथातथापश्यतिवस्तुसूक्ष्मंचक्षुर्यथैवांजनसंप्रयुक्तं २६ विषयान्ध्यायतश्चित्तंविषयेषुविषज्जते॥ मामनुस्मरतश्चित्तंमय्ये
वप्रविलीयते २७

कथंभक्तिर्गम्यतेभक्त्याचविनाकथमाशयःशुध्येदिति २३ किंचभक्तिःस्वाश्रयंशोधयतीतिकिंवक्तव्यंयतोगद्गदवागादिलक्षणोमद्भक्तियु
क्तोलोकंसर्वंपुनातीत्याहवागिति २४ अपिचभक्त्यैवात्मशुद्धिर्नान्यतइतिसदृष्टांतमाहयथेति। यथाग्निनाध्मातंतापितमेवहेमसुवर्णं
अंतर्मलंजहातिनक्षालनादिभिः। स्वंनिजरूपंचभजते। एवंकर्मानुशयंकर्मवासनांमांभजतेमद्रूपतामापद्यते २५ ननुब्रह्मविदाप्नोतिपरं।
तमेवविदित्वातिमृत्युमित्यादिश्रुतिभ्योज्ञानादेवाविद्यानिवृत्त्यात्वत्प्राप्तिरवगम्यतेकुतोभक्तियोगेनेत्युच्यतेतत्राहयथायथेति। आत्माचित्तं
परिमृज्यतेशोध्यतेमत्पुण्यकथानांश्रवणैरभिधानैश्चभक्तेरेवांतरव्यापारोज्ञानंनपृथगित्यर्थः। किंचज्ञानेनाम। चित्तस्यमदाकारपरिणामः
२६

सवमोभजतःस्वभावतएवभवतिनचयत्नांतरमपेक्षतइतिसदृष्टांतमाह
विषयानिति २७॥

ताः स्वरूपेणोपदिशति अणिमेति सार्धैः पंचभिः । अणिमा महिमा लघिमा च मूर्तेर्देहस्य तिस्रः सिद्धयः प्राप्तिर्नाम सिद्धिः सर्वप्रा
८ णिनामिंद्रियैः सह तत्तदधिष्ठातृदेवतारूपेण संबंध इत्यर्थः श्रुतेषु पारलौकिकेषु दृष्टेषु दर्शनयोग्येष्वपि सर्वेषु भूविवरादिपिहितेष्वपि
प्राकाम्यं भोगदर्शनसामर्थ्यं सिद्धिः । शक्तीनां मायातदंशभूतानां प्रेरणं । तत्रेश्वरे मायायाः अन्येषु तदंशानां प्रेरणमीशिता नाम सिद्धिः अष्टो
४ विषयभोगेष्वसंगो वशिता सिद्धिः । यत्कामः यद्यत्सुखं कामयते तत्तदवस्यति तस्य तस्य सीमानं प्राप्नोतीति सिद्धिः औत्पत्ति
कः स्वभावसिद्धा निरतिशया इत्यर्थः ५ गुणहेतुसिद्धीराह अनूर्मिमत्त्वं क्षुत्पिपासादिराहित्यं दूरे श्रवणदर्शने चेति द्वे सिद्धी । म
नोवेगेन देहस्य गतिः कामितरूपप्राप्तिः परकायप्रवेशः ६ स्वेच्छामृत्युः अप्सरोभिः सह देवानां याः क्रीडाः तासामनुदर्शनं प्राप्तिः

अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिंद्रियैः ॥ प्राकाम्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता ४ गुणेष्वसंगो वशिता य
त्कामस्तदवस्यति ॥ एता मे सिद्धयः सौम्य अष्टावौत्पत्तिका मताः ५ अनूर्मिमत्त्वं देहेऽस्मिन् दूरश्रवणदर्शनं ॥ यथा
संकल्पसंसिद्धिः मनोजवः कामरूपं परकायप्रवेशनं ६ स्वच्छंदमृत्युर्देवानां सहक्रीडानुदर्शनं आज्ञाप्रतिहता ग
तिः ७ त्रिकालज्ञत्वमद्वंद्वं परचित्ताद्यभिज्ञता ॥ अग्न्यर्काम्बुविषादीनां प्रतिष्टंभोऽपराजयः ८ एताश्चोद्देशतः प्रोक्ता यो
गधारणसिद्धयः ॥ यया धारणया या स्याद्यथा वा स्यान्निबोध मे ९ भूतसूक्ष्मात्मनि मयि तन्मात्रं धारयन्मनः ॥ अ
णिमानमवाप्नोति तन्मात्रोपासको मम १० महत्तत्त्वात्मनि मयि यथासंस्थं मनो दधत् ॥ महिमानमवाप्नोति भूतानां च पृथक्

संकल्पानुरूपप्राप्तिः अप्रतिहता आ समंतात् गतिर्यस्याः सा आज्ञा चेत्येता दश ७ इदानीं क्षुद्रसिद्धीः पंचाह त्रिकालज्ञत्वमिति अद्वं
द्वं शीतोष्णाद्यनभिभवः अग्न्यादीनां संस्तंभनं ८ तत्तद्धारणाभिः सह विशेषतो निरूपयति ययेति यावत्समाप्तिः ९ भूतसूक्ष्मोपा
धौ मयि तन्मात्रं भूतसूक्ष्माकारं उपास्ते यः स तन्मात्रोपासकः मम मदीयमणिमानं १० ज्ञानशक्तिमहत्तत्त्वोपाधौ मयि यथासं
स्थं महत्तत्त्वाकारं भू… तानां सेति आकाशादिभूतोपाधौ च मयि मनो धारयन् तत्तद्भूतमहिमानं प्राप्नोतीत्यर्थः ११ श्रीराम

वाय्वादिभूतानां ये परमाणवः तन्मये तदुपाधौ चित्तं मयि रंजयन् योगी । कालसूक्ष्मार्थतां कालपरमाणूपाधिरूपतामिति लघुत्वावि
वरणे । तदुक्तं । स कालः परमाणुर्वै यो भुंक्ते परमाणुतामिति । १२ वैकारिकाहंकारोपाधौ मयि । अखिले एकाग्रे आत्मत्वे अधिष्ठा
तृत्वे । अत्र हेतुः मन्मनाः मयि मनोधारणाप्रभावादेव भवति । नात्रान्यो हेतुरनुसंधेय इति भावः । एवमुपधारणानुभावेन मद्योगबल
माश्रय इत्यादिषु द्रष्टव्यं १३ क्रियाशक्तिप्रधानं महत्तत्वमेव सूत्रं तदुपाधौ मयि । सः मे पारमेष्ठ्यं सर्वोत्कृष्टं प्राकाम्यं विंदते कथंभूत
स्य । अव्यक्ताज्जन्म यस्य तस्य सूत्रस्य तदुपाधेर्ममेत्यर्थः १४ त्र्यधीश्वरे त्रिगुणमायानियंतरि अतएव कालविग्रहे आकलयितृरूपे
अंतर्यामिणि ईशित्वं विशिनष्टि । क्षेत्रज्ञानां जीवानां क्षेत्राणां तदुपाधीनां चोदनां प्रेरणं न तु विश्वस्रष्ट्रादिकर्तृत्वलक्षणमित्यर्थः १५

परमाणुमये चित्तं भूतानां मयि रंजयन् ॥ कालसूक्ष्मार्थतां योगी लघिमानमवाप्नुयात् १२ धारयन्मय्यहंतत्वे मनो वै
कारिकेऽखिले ॥ सर्वेंद्रियाणामात्मत्वं प्राप्तिं प्राप्नोति मन्मनाः १३ महत्यात्मनि यः सूत्रे धारयेन्मयि मानसं ॥ प्राकाम्यं
पारमेष्ठ्यं मे विंदतेऽव्यक्तजन्मनः १४ विष्णौ त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे ॥ स ईशित्वमवाप्नोति क्षेत्रज्ञक्षेत्रचो
दनां १५ नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते ॥ मनो मय्यादधद्योगी मद्धर्मा वशितामियात् १६ निर्गुणे ब्रह्मणि
मयि धारयन्विशदं मनः ॥ परमानंदमाप्नोति यत्र कामोऽवसीयते १७ श्वेतद्वीपपतौ चित्तं शुद्धे धर्ममये मयि ॥ धारयंश्वे
ततां याति षडूर्मिरहितो नरः १८ मय्याकाशात्मनि प्राणे मनसा घोषमुद्वहन् ॥ तत्रोपलब्धा भूतानां हंसो वाचः शृणोत्यसौ १९

तुरीयाख्ये विराट् हिरण्यगर्भश्च कारणं चेत्युपाधयः । ईशस्य यत्त्रिभिर्हीनं तुरीयं तत्पदं विदुरित्येवंलक्षणे भगवच्छब्दशब्दिते ऐश्वर्य
स्य समग्रस्य धर्मस्य यशसः श्रियः ॥ ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरिता । तद्वति भगवच्छब्दशब्दिते १६ परमानंदरूपे सर्वोपि का
मस्तदंशभूतो वसीयते समाप्यते ते १७ अतः परं गुणहेतुकाः सिद्धीराह शुद्धे सत्वात्मिके । श्वेत x १६ x तो शुद्धरूपतां १८ आ
काशात्मनि प्राणे समष्टिरूपे तस्तद्रूपे मयि मनसा घोषेण नादं चिंतयन् अहं सौ सो जीवः तत्र आकाशे उपलब्धा ता ता सत्र तत्रस्थाः विचित्रवा
चः शृणोतीत्यहा तत्राकाशे उपलब्धा अभिव्यक्ताः भूतानां वाचस्ताः दूरतः शृणोतीति दूरश्रवणमुक्त्वा दूरदर्शनमाह १९ श्रीरामाय

दूरश्रवणमुक्त्वा दूरदर्शनमाह
त्वष्टा आदित्यः तस्मिन्नपि छिन्ने चक्षुः संयोज्य तत्त्वचक्षुषि संयोज्य तत्रोभयसंयोगे मां ध्यायन् विश्वं दूरतः पश्यति २० मनो देहं च तदनुवर्ति
नो वायुना सहमपि सुसंयोज्य या मद्धारणा क्रियते तस्याः प्रभावेन यत्र मनो याति तत्रात्मा देहोपि यातीत्यर्थः यद्वा मनः कर्तृ आत्मानं वायुना स
ह देहं मयि सुसंयोज्य यत्र याति तत्स्तु तत्र देहो यातीति २१ मनः उपादाय उपादानकारणीकृत्य यद्यद्देवादिरूपं भवितुमिच्छति तत्तन्म
नोरूपं मनसापि तद्रूपं योगी भवेत् । कुतः यतो मद्योगबलं योहमचिन्त्यशक्तिर्नानाकारस्तस्मिन्नपि मनसो योगधारणा तस्य बलं प्रभा प्राण
वः स एवाश्रयः कारणं २२ यत्र प्रविविक्षति तत्रात्मानं चिन्तयेत् । ततः पिण्डं स्वदेहं हित्वा प्राणः प्रधानलिंगशरीरोपाधिर्वायुभूतः बाह्यवा
योभूतः प्रविष्टः तेन मार्गेणेत्यर्थः षडंघ्रिवत् भृंगो यथा पुष्पात्पुष्पान्तरं मनोयासेन प्रविशतीति तद्वत् २३ पिंडं देहं त्यक्त्वा तत्र कारक

चक्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि ॥ मां तत्र मनसा ध्यायन् विश्वं पश्यति सूक्ष्मदृक् २० मनो मयि सुसंयोज्य दे
हं तदनुवायुना ॥ मद्धारणानुभावेन तत्रात्मा यत्र वै मनः २१ यदा मन उपादाय यद्यद्रूपं बुभूषति ॥ तत्तद्भवेन्मनोरूपं म
द्योगबलमाश्रयः २२ परकायं विशन्सिद्ध आत्मानं तत्र भावयेत् ॥ पिंडं हित्वा विशेत्प्राणो वायुभूतः षडंघ्रिवत् २३
पार्ष्ण्यापीड्य गुदं प्राणं हृदुरःकंठमूर्धसु ॥ आरोप्य ब्रह्मरंध्रेण ब्रह्म नीत्वोत्सृजेत्तनुं २४ विहरिष्यन्सुराक्रीडे मत्स्थं सत्त्वं
विभावयेत् ॥ विमानेनोपतिष्ठंति सत्त्ववृत्तीः सुरस्त्रियः २५ यथा संकल्पयेद्बुद्ध्या यदा वा मत्परः पुमान् ॥ मयि सत्ये म
नो युंजंस्तथा तत्समुपाश्नुते २६ यो वै मद्भावमापन्न ईशितुर्वशितुः पुमान् ॥ कुतश्चिन्न विहन्येत तस्य चाज्ञा यथा मम २७

कथयन् स्वच्छन्दमृत्युमाह पार्ष्ण्या पार्ष्णिना गुदं निरुध्य प्राणोपाधिमात्मानं ब्रह्मरंध्रेण मूर्धच्छिद्रेण ब्रह्मेत्युपलक्षणं ब्रह्म वा अन्यद्वा
अपेक्षितस्थानं मनसा नीत्वा २४ मत्स्थं मन्मूर्तिरूपं शुद्धसत्त्वं चिन्तयेत् । तदा सत्त्ववृत्तयः सत्त्वांशभूताः २५ यदा वा अकालेपि य
थावेति पाठे यथा वा येन केनापि प्रकारेण बुद्ध्या संकल्पयेत् तत्तथा यथावत्प्राप्नोतीत्यर्थः यद्वा यथा संकल्पयेत् यथा वा मत्परः म
यि चिन्त्या सदा भवति तथा तत्तदनुरूपं सर्वं प्राप्नोतीत्यर्थः किं कुर्वन् सत्ये सत्यसंकल्पे मयि मनो युंजन् २६ मदिति पृथक्पदं मम
त्यर्थः ईशितुः सर्वं नियंतुः वशितुः स्वतंत्रस्य मम भावं स्वभावं प्राप्तः एतद्गुणहेतवः ॥ श्रीरामचन्द्राय नमः ॥

॥२७॥

अतः परं सूक्ष्माः धारणा विदइति त्रिकालज्ञेश्वर धारणा सूचिता । त्रैकालिकी त्रिकालवस्तुविषया । जन्ममृत्युभ्यामुपबृंहिता सहिता । अ
नयैव परचित्ताद्यभिज्ञतापि व्याख्याता २८ अग्न्यादिसर्वोपघातशून्यो भगवानित्येवंभूतयोगमयं तेनाभिभूयेत । अत्र हेतुः मद्यो
गेति यादसामुदकं यथाभिघातेन भवति तद्वत्स्य वपुषो ग्न्यादयइत्यर्थः । अनयैवाद्भुताधिव्याख्याता २९ मद्विभूतीः ममावतारान्
ध्वजादिभिः सह ३० उपसंहरति उपासकस्येति । पूर्वे पृथक् धारणाभिः ३१ यद्वा किं नानाधारणाप्रयासेन एकयैव सर्वासिद्धयो भव
तीत्याह जितेन्द्रियस्येति । मद्धारणा न मायणो तुरीयाख्ये इत्यत्रोक्ता या सुदुर्लभा स्यात् । सा कान काचिदित्यर्थः ३२ यद्यप्येवं तथा
पि न प्रार्थ्य इत्याह अंतरायानिति ३३ तस्मादहेतुकीमेव धारणां कार्या नान्याः काम्या इत्याह जन्मेति जन्मनैव काश्चित्सिद्धयो

मद्रूत्यांशुद्धसत्वस्य योगिनो धारणाविदः । तस्य त्रैकालिकी बुद्धिर्जन्ममृत्यूपबृंहिता २८ अग्न्यादिभिर्न हन्येत मुनेर्योग
मयं वपुः । मद्योगशान्तचित्तस्य यादसामुदकं यथा २९ मद्विभूतीरभिध्यायन् श्रीवत्सास्त्रविभूषिताः । ध्वजातपत्र
व्यजनैः स भवेदपराजितः ३० उपासकस्य मामेवं योगधारणया मुनेः । सिद्धयः पूर्वकथिता उपतिष्ठन्त्यशेषतः ३१
जितेन्द्रियस्य दान्तस्य जितश्वासात्मनो मुनेः । मद्धारणां धारयतः का सा सिद्धिः सुदुर्लभा ३२ अंतरायान्वदंत्येता
युञ्जतो योगमुत्तमं । मया संपद्यमानस्य कालक्षपणहेतवः ३३ जन्मौषधितपोमन्त्रैर्यावतीरिह सिद्धयः । योगेनाप्नोति
ताः सर्वा नान्यैर्योगगतिं व्रजेत् ३४ सर्वासामपि सिद्धीनां हेतुः पतिरहं प्रभुः । अहं योगस्य सांख्यस्य धर्मस्य ब्रह्मवादिनां ३५
अहमात्मान्तरो बाह्योऽनावृतः सर्वदेहिनां । यथा भूतानि भूतेषु बहिरन्तः स्वयं तथा ३६ ॥ ॥ इति श्रीभा॰ए॰ पंचदशः ॥ ॥१५॥

भवंति यथा देवानां । यथा वायादसामुदके स्तंभः पक्ष्यादीनां खेचरत्वादि । तदुक्तं पातंजले जन्मौषधितपोमन्त्रयोगजाः सिद्धयइति । योगे
न मद्धारणामित्युक्तेन योगगतिं मत्सालोक्यादिरूपां ३४ कुतइत्यत आह सर्वासामिति धर्मेन प्रभुत्वोपपादनहेतुः कारणं पतिः पालयि
तावेति किंच न केवलं सिद्धीनामेव प्रभुः अपितु मोक्षादीनामपीत्याह अहमिति । योगो मोक्षः सांख्ये तत्साधनं ज्ञानं धर्मस्य तदुपदेष्टॄ
णां ब्रह्मवादिनां च ३५ कुतः तत्राह अहमिति सर्वदेहिनां जीवानामात्मा । यतः अंतरः अंतर्यामी एष आत्मान्तर्याम्यमृत इत्यादिश्रुतेः
तर्हि किमंतर्यामित्वात्परिच्छिन्नः न बाह्यश्च व्यापक इत्यर्थः तत्र हेतुः अनावृतः एतत्स दृष्टांतमाह भूतेषु चतुर्विधेषु महा

षोडशे तु हरेराविर्भावयुक्ता विभूतयः। ज्ञानवीर्यप्रभावादिविशेषेणोपवर्णिताः॥ १ ॥ अंतश्चिंतेन यद्ध्यानमशक्यमकृतात्मनो। अतस्त
द्योग्यतापत्त्यै विभूत्यादिनिरूपणं॥ २ ॥ एवं तावन्नवाध्याया मष्टप्रश्ना निरूपिताः। ब्रह्मत्वसंभवे तावत्समासाद्धि चतुष्टये। वेधमुक्त्यो
स्तु निर्धारि सद्गत्याश्च ततः परो। द्वादशेऽनंतरं कर्मकृतित्यागव्यवस्थितौ। हंसेतिहासतो योगनिष्ठायां वत्रयोरत्र श्रेयःसाधननिर्धारे
ध्याने चैव चतुर्दशे। धारणासिद्धिभेदेषु प्रसंगेन निरंतरे। उद्धवप्रश्नतो दत्तमुत्तरं हरिणोचितं। षोडशे भूतिविस्तारे द्वयोर्वर्णाश्रम
वृत्ते। ज्ञानादिनिर्णये चान्ते यमादीनां च निर्णये। योगत्रयाधिकारेषु विशेषं च नदनंतरे। तत्त्वसंख्याविवादेषु प्रकृत्योर्विवेच
ने। जन्ममृत्युप्रकारे च द्वाविंशे दत्तमुत्तरं। परापराधसहने चतुर्भिस्त्वदनंतरे। सप्तविंशे क्रियायोगप्रश्नेन तदुपवर्णनं। अष्टाविं
शे ततः प्रोक्ता ज्ञानयोगोपसंहृतिः। संसारासंभवप्रश्ने तन्मध्ये दत्तमुत्तरं। त्वात्सर्वा पुनः प्रश्ने भक्तियोगोपसंहृतिः। एवं प्रश्नोत्तरा

त्वं उद्धव उवाच। ब्रह्मपरमं साक्षादनाद्यंतमपावृतं। सर्वेषामपि भावानां त्राणस्थित्यप्ययोद्भवः॥ १ ॥ उच्चावचेषु
भूतेषु दुर्ज्ञेयमकृतात्मभिः। उपासते त्वां भगवन्याथातथ्येन ब्राह्मणाः॥ २ ॥ येषु येषु च भावेषु भक्त्या त्वां परमर्षयः॥
उपासीनाः प्रपद्यंते संसिद्धिं तद्वदस्व मे॥ ३ ॥ गूढश्चरसि भूतात्मा भूतानां भूतभावन। न त्वां पश्यंति भूतानि पश्यंतं मोहि

ण्यनुक्रमेणैतानि विंशतिः। अहमात्मांतरो बाह्योऽनावृतः सर्वदेहिनां। यथा भूतानि भूतेषु बहिरंतः स्वयं तथेत्युक्तं। तत्र भूतानि
यथा कुत्रचित्केनचिद्गुणविशेषेण दृश्यन्ते निवर्तंते। कचित्सामान्यरूपेणैव तथा त्वमपि कं कं कथं वर्तस इति विभूतीः प्रष्टुं प्रथमं तावदुक्त
मेव सर्वात्मकत्वमनुवदति। त्वं ब्रह्मेति। अपावृतं निरावरणं स्वतंत्रं वा। अत एव सर्वेषामपि त्राणं रक्षणं स्थितिर्जीवनं त्राणस्थितिस
१ हितौ अप्ययोद्भवौ यस्मात् स त्वं उपादानकारणमित्यर्थः। अत्र सदाचारं प्रमाणमाह याथातथ्येन यथार्थत्वेन सर्वभूतकारणं त्वां ब्राह्म
णा वेदतात्पर्यविदः॥ २ ॥ एवं कारणत्वेन सर्वात्मत्वमनूद्य विभूतीः पृच्छति येष्विति उपासीनाः सेवमानाः संतः॥ ३ ॥ दुर्ज्ञेयत्वमेवाह
गूढः अस्फुटः भूतानां प्राणिनां मध्ये अत्र हेतुः भूतानामात्मा। अंतर्यामी अत्रापि हेतुः हे भूतभावनेति। ते त्वया ४ श्रीरामय॥

भा॰ए॰
४९

ता एव साकल्येन पृच्छति हे महाविभूते याः काश्चिद्भूम्यादिषु ते विभूतयः रसायां रसातले। अनुभाविताः त्वयैव केनचिच्छक्तिविशेषेण संयोजि-
ताः तीर्थानां पदस्य तदंघ्रिपद्मं च ५ नरावतारत्वेनार्जुनप्रश्नमेवादित्वा त्वयार्थप्रश्नः साधर्म्यपानितितावदनुमोदते। एवमिति त्रिभिः प्रश्ने
प्रष्टव्य। सपत्नैर्योद्धुमिच्छता विनशने कुरुक्षेत्रे ६ युयुत्सोरर्थभूतिप्रश्ने कः प्रसंगस्तत्राह ज्ञात्वेति लौकिकः प्राकृतमतिः सन् ७ स त्वय
ततो ज्ञातिवधान्निवृत्तः तदा मया प्रतिबोधितः सन् यथा त्वमभिभाषसे एवं स आमामुखेमामभ्यभाषत। न तु देवलवापि कथयिष्यामीति
भावः ८ ता विभूतीः कथयति अहमिति अस्मच्छब्दसमानाधिकरणाः प्रथमांता द्वितीयांताश्च सर्वा विभूतयः तास्तास्तूपासनार्थं क

याः काश्च भूमौ दिवि वै रसायां विभूतयो दिक्षु महाविभूते॥ ता मह्यमाख्याह्यनुभाविताश्च नमामि ते तीर्थपदांघ्रिपद्मं ५
श्रीभगवानुवाच एवमेतदहं पृष्टः प्रश्नं प्रश्नविदां वर॥ युयुत्सुना विनशने सपत्नैरर्जुनेन वै ६ ज्ञात्वा ज्ञातिवधं गर्ह्यमधर्
मं राज्यहेतुकं॥ ततो निवृत्तो हंताहं हतोयमिति लौकिकः ७ स तदा पुरुषव्याघ्रो युक्त्या मे प्रतिबोधितः॥ अभ्यभाषत मामेवं
यथा त्वं रणमूर्धनि ८ अहमात्मोद्धवामीषां भूतानां सुहृदीश्वरः॥ अहं सर्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः ९ अहं ग
तिर्गतिमतां कालः कलयतामहं॥ गुणानां चाप्यहं साम्यं गुणिन्यौत्पत्तिको गुणः १० गुणिनामप्यहं सूत्रं महतां च महान
हं॥ सूक्ष्माणामप्यहं जीवो दुर्जयानामहं मनः ११ हिरण्यगर्भो वेदानां मंत्राणां प्रणवस्त्रिवृत्॥ अक्षराणामकारोस्मि पदा
नि छंदसामहं १२ इंद्रोहं सर्वदेवानां वसूनामस्मि हव्यवाट्॥ आदित्यानामहं विष्णू रुद्राणां नीललोहितः १३ ब्रह्मर्षीणां भृगु
रहं राजर्षीणामहं मनुः॥ देवर्षीणां नारदोहं हविर्धान्यस्मि धेनुषु १४ सिद्धेश्वराणां कपिलः सुपर्णोहं पतत्रिणां॥ प्रजापतीनां द
क्षोहं पितृणामहमर्यमा १५ मां विद्ध्युद्धव दैत्यानां प्रह्लादमसुरेश्वरं॥ सोमं नक्षत्रौषधीनां धनेशं यक्षरक्षसां १६

थ्यते ध्येयत्वेन तत्तद्विभूतिर्धर्मिणि संबंधो वक्तव्यः यथायोग्यं द्रष्टव्या। ततश्चामीषां भूतानामात्मेति। सुहृदिति ईश्वर इति च समासान्येनाहंउपास्य इत्य
र्थः। एवं सर्वत्र तेषां स्थित्युद्भवाप्ययः तत्तद्धेतुरित्यर्थः ९ विशेषतो विभूतीराह। कलयतां वशीकुर्वतां मध्ये गुणानामप्यहं गुणिनि धर्मिणि औत्प
त्तिकः स्वाभाविको यो गुणः सोहं १० सूत्रं प्रथमकार्यं महान्महत्तत्त्वं। सूक्ष्मोपाधित्वात् दुर्ज्ञेयत्वाच्च जीवस्य सूक्ष्मत्वं। बुद्धेर्गुणेनात्मगुणे
न चैव ह्याराग्रमात्रो ह्यवरोपि दृष्ट इति श्रुतेः ११ वेदानां सबंधनिकामधापकः पदानि त्रिपदा गायत्रीत्यर्थः १२ १३ हविर्धानी कामधेनुः १४

राम
४९

गी

यादसां प्रभुं तपतां तापवतां द्युमतां च मध्ये १७ संयमतां दण्डयतामित्यर्थः १८ शृङ्गिणां दंष्ट्रिणां च मध्ये तेषां प्रभुर्वा। तुर्यः संन्यासः प्रथमः आश्र
मः १९ स्रोतसां प्रवाहानां च। सरसां स्थिरोदकाशयानां २० धिष्ण्यानां निवासस्थानानां। गहनानां दुर्गमानां २१ श्रेष्ठिष्ठानां वेदार्थनिष्ठानां
सेनान्यां च भूपतीनां अग्रण्यां सन्मार्गप्रवर्तकानां। अतः ब्रह्मा। शुचीनां शोधकानामपि मार्जनतक्षणघर्षणादीनां मध्ये वायुरग्निरूपः शोधको ऽहं २३
२२ महतां योगानां योगांगानां मध्ये आत्मसंरोधः समाधिरहं। मन्त्रो नीतिः। कौशलानां विवेकादिनैपुणानां मध्ये आन्विक्षिकी आत्मानात्मविवेकविद्या। अरक्षो

ऐरावतं गजेन्द्राणां यादसां वरुणं प्रभुम्॥ तपतां द्युमतां सूर्यं मनुष्याणां च भूपतिं १७ उच्चैःश्रवास्तुरगाणां धातूनामस्मि काञ्चनं॥ यमः
संयमतां चाहं सर्पाणामस्मि वासुकिः १८ नागेन्द्राणामनन्तो ऽहं मृगेन्द्रः शृङ्गिदंष्ट्रिणां॥ आश्रमाणामहं तुर्यो वर्णानां प्रथमो ऽनघ
१९ तीर्थानां स्रोतसां गंगा समुद्रः सरसामहं॥ आयुधानां धनुरहं त्रिपुरघ्नो धनुष्मतां २० धिष्ण्यानामस्म्यहं मेरुर्गहनानां हिमा
लयः॥ वनस्पतीनामश्वत्थ ओषधीनामहं यवः २१ पुरोधसां वसिष्ठो ऽहं ब्रह्मिष्ठानां बृहस्पतिः॥ स्कन्दो ऽहं सर्वसेनान्यामग्रण्यां भगवान
जः २२ यज्ञानां ब्रह्मयज्ञो ऽहं व्रतानामविहिंसनं॥ वाय्वग्न्यर्काम्बुवागात्मा शुचीनामप्यहं शुचिः २३ योगानामात्मसंरोधो मन्त्रो ऽस्मि विजि
क्षि गीषतां॥ आन्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनां २४ स्त्रीणां तु शतरूपाहं पुंसां स्वायम्भुवो मनुः॥ नारायणो मुनीनां च कुमारो
ब्रह्मचारिणां २५ धर्माणामस्मि संन्यासः क्षेमाणामबहिर्मतिः॥ गुह्यानां सुनृतं मौनं मिथुनानामजस्त्वहं २६ संवत्सरो ऽस्म्यनि
मिषां ऋतूनां मधुमाधवौ॥ मासानां मार्गशीर्षो ऽहं नक्षत्राणां तथाभिजित् २७ अहं युगानां च कृतं धीराणां देवलो ऽसितः॥ द्वैपायनो
ऽस्मि व्यासानां कवीनां काव्य आत्मवान् २८ वासुदेवो भगवतां त्वं तु भागवतेष्वहं॥ किंपुरुषाणां हनुमान्विद्याध्राणां सुदर्शनः २९

न्यथाख्यातिः शून्यख्यातिः सत्ख्यातिरनिर्वचनीयख्यातिवादिनां एवमिदमेवं वेति यो ऽद्भुतो विकल्पः सो ऽहं २४ कुमारः सनत्कुमारः २५ संन्यासः
भूताभयदानं। क्षेमाणामभयस्थानानां मध्ये अबहिर्मतिः अन्तर्निष्ठा। सुनृतं प्रियवचनं मौनं वचनाहि प्रियभाषणे मौने च पुरुषस्याभिप्रायो ऽज्ञा
यते। अजः प्रजापतिः। यस्य देहार्धाभ्यां मिथुनमभूत् स एव मुख्यं मिथुनं अर्धो ह वा एष आत्मनो यत्पत्नीति श्रुतेः २६ अनिमिषां अप्रमत्ता
नां मधुमाधवौ वसन्तऋत्वित्यर्थः। अभिजिदुत्तराषाढाया तुर्यपादः। तथा च श्रुतिः। अभिजिन्नाम नक्षत्रमुपरिष्टादाषाढानामधस्ताच्छ्रोणायाः ऽऽत्या
दि २७ कृतं कृतयुगं देवलः असितश्च। व्यासानां वेदविभागकर्तॄणां कवीनां विदुषां काव्यः शुक्रः २८ भगवतां उत्पत्तिप्रलयं वेदवाभूतानामागतिं

भा·ए·
५०

सुपेशसां सुदर्शनानां । दर्भजातीनां काशदूर्वादीनां हविःषु चरुपुरोडाशादिषु घृतेषु वा ३० लक्ष्मीः धनादिसंपत् ३१ बलवतां ओजःसहश्च । सा
त्वतां भागवतानां भक्त्या कृतं कर्माहमित्यर्थः तेषामेव नवमूर्तयः हार्दे ते वासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववराहनृसिंहब्रह्माण इति
या नवमूर्तयस्तासां मध्ये वासुदेवाख्या ३२ गंधर्वाणां विश्वावसुः अप्सरसां पूर्वचित्तिः गंधमात्रमविकृतम् ३३ परमः मधुरः परः पराख्य
शब्दः ३४ अर्जुनः पार्थः । भूतानां प्राणिनां प्रतिसंक्रमः प्रलयः ३५ गत्यादयः पंचकर्मेंद्रियव्यापाराः । स्पर्शादयो ज्ञानेंद्रियव्यापाराः तत्रल
क्षणं दर्शनं सर्वेंद्रियाणामिंद्रियं तदर्थग्रहणशक्तिरप्यहं ३६ तदेवं तत्र तत्र निर्धारणेन तत्तत्संबंधेन च विशेषतो विभूतीर्निरूप्येदानीं सामा

रत्नानां पद्मरागोस्मि पद्मकोशः सुपेशसां ॥ कुशोस्मि दर्भजातीनां गव्यमाज्यं हविःष्वहं ३० व्यवसायिनामहं लक्ष्मीः कितवा
नां छलग्रहः ॥ तितिक्षास्मि तितिक्षूणां सत्वं सत्ववतामहं ३१ ओजः सहो बलवतां कर्माहं विद्धि सात्वतां ॥ सात्वतां
नवमूर्तीनामादिमूर्तिरहं परा ३२ विश्वावसुः पूर्वचित्तिर्गंधर्वाप्सरसामहं ॥ भूधराणामहं स्थैर्यं गंधमात्रमहं भुवः ३३
अपां रसश्च परमः तेजिष्ठानां विभावसुः ॥ प्रभा सूर्येंदुताराणां शब्दोहं नभसः परः ३४ ब्रह्मण्यानां बलिरहं वीराणामह
मर्जुनः ॥ भूतानां स्थितिरुत्पत्तिरहं वै प्रतिसंक्रमः ३५ गत्युक्त्युत्सर्गोपादानमानंदस्पर्शलक्षणं ॥ आस्वादश्रुत्यवघ्राणम
हं सर्वेंद्रियेंद्रियं ३६ पृथिवी वायुराकाश आपो ज्योतिरहं महान् ॥ विकारः पुरुषोऽव्यक्तं रजः सत्वं तमः परं ३७ अहमेतत्प्र
संख्यानं ज्ञानं तत्वविनिश्चयः ॥ [illegible] गुणेन गुणिना विना ३८

न्यतः सर्वमपि निरूपयति पृथिवीति सार्धद्वयेन । पृथिव्यादिशब्दैस्तन्मात्राणि विवक्षितानि अहं अहंकारः महान् महत्तत्वं एताः सप्त प्रकृतिवि
कृतयः । विकारः पंचमहाभूतानि । एकादशेंद्रियाणि चेत्येवं षोडशसंख्याकः । पुरुषो जीवः । अव्यक्तं प्रकृतिः एवं पंचविंशतितत्वानि । ननु
क्तं मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुष इति किंच । रजःसत्वतमांसीति प्रकृतेर्गुणा
श्चापरं ब्रह्म च तदेतत्सर्वमहमेव ॥ ३७ किंच एतत्प्रसंख्यानं एतेषां परिगणनं । एतेषां लक्षणतो ज्ञानं तत्फलं तत्वविनिश्चयश्चाहमेव ३८

राम
५०

६ मयेश्वरेण जीवेन गुणेन गुणिना विना

एतदेव संक्षिप्याह मयेति जीवेश्वररूपो द्विविधो यो भोक्तृश्च गुणगुणिरूपः । यश्च क्षेत्रक्षेत्रज्ञरूपः स सर्वोऽपि मया विना मद्व्यतिरेकेण नास्ति अहमेव सर्व
मित्यर्थः ३९ ननु सामान्यतः किमेवं संक्षिप्य कथयसि । पूर्ववन्निर्धारणसंबंधाभ्यां विशेषतः कस्मान्न कथयसीति चेत्तत्राह । संख्यानं पृथिव्यादिपरमा
णूनां कालेन महता तातः रपि मयैव क्रियते कृत्वा वक्तुं शक्यते । तथा मे विभूतीनां संख्यानं कर्तुं न शक्यते । कुत इत्यत आह सृजतोऽण्डानीति । यदा मया सृज्यमा
नानां ब्रह्माण्डानामेव तावत्संख्या नास्ति । तदंशकं तस्तद्गतानां विभूतीनां संख्येत्यर्थः । तथापि विशेषत एव सर्वा अपि संक्षेपतः कथयामीत्याह । तेजः प्र ४०
भावः । श्रीः संपत् । सौभगं मनोनयनाह्लादकत्वं । भगः भाग्यं । वीर्यं बलं । अंशकः विभूतिः ४१ उपसंहरति एता इति । एते च विभूतिभेदा मायिका एवेति तावतारा

सर्वात्मनापि सर्वेण न भावो विद्यते क्वचित् ३८ संख्यानं परमाणूनां कालेन क्रियते मया ३९ न तथा मे विभूतीनां सृजतोऽण्डानि कोटिशः ॥४०
तेजः श्रीः कीर्तिरैश्वर्यं ह्रीस्त्यागः सौभगं भगः । वीर्यं तितिक्षा विज्ञानं यत्र यत्र स मेंऽशकः ॥ एतास्ते कीर्तिताः सर्वाः संक्षेपेण वि ४१
भूतयः ४१ मनोविकारा एवैते यथा वाचाभिधीयते ४२ वाचं यच्छ मनो यच्छ प्राणान्यच्छेन्द्रियाणि च । आत्मानमात्मना यच्छ न भू
यः कल्पसेऽध्वने ४३ यो वै वाङ्मनसी सम्यगसंयच्छन्धिया यतिः ॥ तस्य व्रतं तपो दानं स्रवत्यामघटाम्बुवत् ४४ तस्माद्वचोमनःप्राणा
न्नियच्छेन्मत्परायणः ॥ मद्भक्तियुक्तया बुद्ध्या ततः परिसमाप्यते ४५ ॥ ॥ ॥ इति श्रीभा० एका० षोडशोऽध्यायः ॥ ॥ ॥ उद्धव उवाच
यस्त्वयाभिहितः पूर्वं धर्मस्त्वद्भक्तिलक्षणः । वर्णाश्रमाचारवतां सर्वेषां द्विपदामपि १

यत्कथिताः । अतो नात्रातीवाभिनिवेशः कर्तव्य इत्याह । मनोविकारा एव न तु परमार्था यथा किंचित् खपुष्पादि वाचा केनाभिधीयते तत्तुल्याः ४२
तस्माद्वागादीन्नियच्छ आत्मानं बुद्धिं आत्मना सत्त्वसंपन्नया तयैव नियच्छ । अध्वने संसारमार्गाय ४३ असंयमने दोषमाह य इति असंयच्छन्नसंय
मति ४४ परिसमाप्यते कृतकृत्यो भवतीत्यर्थः ४५ ॥ इति श्रीभा० टी० महाविभूतिर्नाम षोडशोऽध्यायः ॥ ॥ ॥ ततः सप्तदशेऽप्येष स्वधर्मं भक्ति
लक्षणं ॥ हंसोक्तं धर्ममन्वाह ब्रह्मचारिगृहस्थयोः १ कर्माहैविशिष्टात्मतामित्यत्र भक्त्या कृतं कर्म मोक्षसाधनं मद्विभूतिरित्युक्तेः भक्तिसाधन
त्वं कर्मणां मयोदितेष्वधिहितः स्वधर्मस्थित्यादिना तत्र तत्रोक्तं । न च कर्मानुष्ठातॄणां नियमेन भक्तिर्दृश्यते अतः पृच्छति यस्त्वयेति सप्तभिः पूर्वक
त्यादौ त्वद्भक्तिलक्षणः त्वत्प्रापकः । तत्साधनमित्यर्थः । वर्णाश्रमहीनानामपि द्विपदां नराणां १ श्रीरामचंद्राय नमः श्रीकृष्णाय नमः ॥ ॥

भा॰ पु॰

५१ यथा येन प्रकारेणानुष्ठीयमानेन स्वधर्मेण २ ननु संप्रदायादेव ज्ञास्यते किं पुनर्वर्णनेनेत्यत्राह पुरेति। परमकं परमश्चासौ कसुखरूपश्चेति। यद्वै हंस रि
रूपेण धर्मोऽभ्युक्तः एवं न तु योगमात्रं ज्ञानात्तमागतं पक्षे पुष्ट्य धर्मविवक्षये स्युक्तत्वात्। ३ प्रागनुशासितोपि न भविता न भविष्यति ४ अत्र हेतुमा
ह वक्तेति द्वाभ्यां नेत्वत्तोन्यः। कला वेदाद्याः। ५।६ तत्तस्मात् नः अस्माकं मनुष्याणां मध्ये यस्य यथा विधीयते ७ धर्म्यः धर्मादनपेतः कुतः नैःश्रेयसकरः
भक्तिजनकः अतः मम त्तः तं धर्मं निबोध। ८ तत्रादौ मदुपासनालक्षण एव मुख्यो धर्म आसीत्। आचारलक्षणस्तु पश्चादित्याह त्रिभिः सर्वेव मनुष्ठितो भ
क्तिहेतुरिति वर्णोपि तु माह आदाविति कल्पादौ यत् कृतयुगं तस्मिन्। ते च तदा मामुपासत एव केवलं नान्यत् कुर्वन्तीति वक्तुं कृतयुगनामनिरुक्तिमाह कृतकृ

यथानुष्ठीयमानेन त्वयि भक्तिर्नृणां भवेत्। स्वधर्मेणारविंदाक्ष तत्समाख्यातुमर्हसि २ पुरा किल महाबाहो धर्मं परमकं प्रभो। यत्तेन
हंसरूपेण ब्रह्मणेऽभ्यात्थ माधव ३ स इदानीं सुमहता कालेनामित्रकर्शन। न प्रायो भविता मर्त्यलोके प्रागनुशासितः ४ वक्ता
कर्ताविता नान्यो धर्मस्याच्युत ते भुवि। सभायामपि वैरिंच्यां यत्र मूर्तिधराः कलाः ५ कर्त्राविता प्रवक्त्रा च भवता मधुसूदन। त्यक्ते म कृ॰
हीतले देव विनष्टं कः प्रवक्ष्यति ६ तत्त्वं नः सर्वधर्मज्ञ धर्मस्त्वद्भक्तिलक्षणः। यथा यस्य विधीयेत तथा वर्णय मे प्रभो ७ श्रीभगवा
धर्म्य एष तव प्रश्नो नैःश्रेयसकरो नृणां। वर्णाश्रमाचारवतां तमुद्धव निबोध मे ८ आदौ कृतयुगे वर्णो नृणां हंस इति स्मृतः। कृतकृत्याः वर्णा
प्रजा जात्या तस्मात्कृतयुगं विदुः ९ वेदः प्रणव एवाग्रे धर्मोऽहं वृषरूपधृक्। उपासते तपोनिष्ठा हंसं मां मुक्तकिल्बिषाः १० त्रेतामु
खे महाभाग प्राणान्मे हृदयात्त्रयी। विद्या प्रादुरभूत्तस्या अहमासं त्रिवृन्मखः ११ विप्रक्षत्रियविट्शूद्रा मुखबाहूरुपादजाः। वैरा
जात्पुरुषाज्जाता य आत्माचारलक्षणाः १२ [illegible]

त्या इति। जात्या जन्मनैव किंच विधायकाभावादपि न तदानीं नान्यत्कर्मास्तीत्याह वेद इति। धर्मश्च मनोविषयोऽहमेव वृषरूपधृक् चतुष्पात् न तु क्रियापात्रो वो यज्ञा
दिः अतः तपोनिष्ठाः मनसश्चेन्द्रियाणां च स्वैकाग्र्यं परमं तप इति वचनात् कायानया हंसं शुद्धं मां ध्यायन्तीत्यर्थः १० पश्चात् त्रेतायुगप्रवेशे मे वैराजरूपस्य प्राण
निमित्तात् हृदयात् सकाशात् तस्याः त्रय्याः सकाशात् होत्राध्वर्यवौद्गात्रैः त्रिवृत् त्रिरूपः यज्ञो वै विष्णुरिति श्रुतेः ११ वर्णानामाश्रमाणां च धर्मान्वक्तुं तेषा राम
मुत्पत्तिमाह विप्रेति द्वाभ्यां आत्माचारः स्वधर्म एव लक्षणं ज्ञापको येषां ते १२ [illegible] ५१

ममवेराजरूपस्य हृदः वक्षसोधस्तात् ब्रह्मचर्यमिति नैष्ठिकाभिप्रायं १३ तेषामधिकारिविशेषणस्वभावानाह वर्णानामिति पंच
भिः जन्मस्थानानुसारिण्यः। नीचैरित्यस्यायं अतोयमर्थः मंदाभिर्जन्मभूमिभिर्मंदाः उत्तमाभिरुत्तमाश्चेति १४ तपआलोचनं १५
तेजः प्रतापः एतैरेवाश्रमस्वभावा अपि ज्ञेयाः १६।१७।१८ तद्बाह्यानां स्वभावानाह अशौचमिति शुष्कविग्रहः निर्मूलकलहः तर्षः तृष्णा
तत्रे १९ तावत्सर्वसाधारणं धर्ममाह अहिंसेति वर्णग्रहणमुपलक्षणार्थं वर्णधर्मो नृगृहस्थप्रकरणे वक्ष्यति प्रथमं तावदाश्रमेषु ब्रह्मचा

गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम॥ वक्षस्थलाद्वनेवासो न्यासः शीर्षणि संस्थितः १३ वर्णानामाश्रमाणां च जन्मभूम्य
नुसारिणीः॥ आसन्प्रकृतयो नृणां नीचैर्नीचोत्तमोत्तमाः १४ शमो दमस्तपः शौचं संतोषः क्षान्तिरार्जवं॥ मद्भक्तिश्च दया स
त्यं ब्रह्मप्रकृतयस्त्विमाः १५ तेजो बलं धृतिः शौर्यं तितिक्षौदार्यमुद्यमः॥ स्थैर्यं ब्रह्मण्यमैश्वर्यं क्षत्रप्रकृतयस्त्विमाः
१६ आस्तिक्यं दाननिष्ठा च अदंभो ब्रह्मसेवनं॥ अतुष्टिरर्थोपचये वैश्यप्रकृतयस्त्विमाः १७ शुश्रूषणं द्विजगवां
देवानां चाप्यमायया॥ तत्र लब्धेन संतोषः शूद्रप्रकृतयस्त्विमाः १८ अशौचमनृतं स्तेयं नास्तिक्यं शुष्कविग्रहः॥ काम
क्रोधश्च तर्षश्च स्वभावोंत्यवसायिनां १९ अहिंसा सत्यमस्तेयमकामक्रोधलोभता॥ भूतप्रियहितेहा च धर्मोयं सार्व
वर्णिकः २० द्वितीयं प्राप्यानुपूर्व्याज्जन्मोपनयनं द्विजः॥ वसन्गुरुकुले दांतो ब्रह्माधीयीत चाहुतः २१ मेखला
जिनदंडाक्षब्रह्मसूत्रकमंडलून्॥ जटिलोधौतदद्वासोरक्तपीठः कुशान्दधत् २२

को रिणः धर्मा वर्ण्यंते। स च द्विविधः उपकुर्वाणो नैष्ठिकश्च तत्राद्यस्य धर्मानाह द्वितीयमिति नवभिः द्विजः त्रैवर्णिकः आनुपूर्व्यान्
गर्भाधानादिसंस्कारक्रमेण द्वितीयमुपनयनाख्यं जन्म प्राप्याचार्येणाहूतो ब्रह्मवेदमधीयीत चकारात्तदर्थं च विचारयेत् २१
किंच मेखलादीन् कुशांश्च दधत्। तत्राक्षशब्देनाक्षमाला कथंभूतः जटिलः अनभ्यंगादिना जाता जटा यस्य तथा अधौतदद्वासोरक्तपीठः दंता
श्च वासश्च दद्वासी असिनधौतानि तानि यस्य सः अधौतदद्वासाः स चासावरक्तपीठश्च न कौतुकादिना रक्तं पीठमासनं यस्य सः २२ २०

भा·ए·
५२

जपश्च उच्चारो मूत्रपुरीषोत्सर्गश्च अपोच्चारस्तस्मिन् वाग्यतः मौनी भवेत् २३ रेतो बुद्धिपूर्वेणा विकिरेत् नोत्सृजेत् ब्रह्मव्रतधरः अ
गृहस्थः स्वयमेव कथंचिद्दवकीर्णे अवगाह्य स्नात्वा यतासुः कृतप्राणायामः त्रिपदां गायत्रीं जपेत् २४ संध्ये बहूयतवाक् जपन्नु
पासीत। मध्याह्ने संध्यानिमित्तं मौनं नास्तीति हूवचनं २५ ६ अन्यदपि यत्स प्राप्तं तच्च निवेदयेत् तेनानुज्ञातं संयतः सन्नुपयु
ञ्जीतेत्यर्थः २७ यानशय्यासनस्थानैः यांतं पृष्ठतो यानेन तिष्ठंतमग्रे तं तया समीपशयनेन विश्रांतं पादसंवाहनादिभिः समीपास प्र

स्नानभोजनहोमेषु जपोच्चारेच वाग्यतः॥ नछिंद्यांनखरोमाणि कक्षोपस्थगतान्यपि २३ रेतोनावकिरेज्जातु ब्रह्मव्र
तधरः स्वयं॥ अवकीर्णेवगाह्याप्सु यतासुस्त्रिपदींजपेत २४ अग्न्यर्काचार्यगोविप्रगुरुवृद्धसुराछुचिः॥ समाहितउपा
सीतसंध्येद्वेयतवाग्जपन् २५ आचार्यंमांविजानीयान्नावमन्येतकर्हिचित्॥ नमर्त्यबुद्ध्यासूयेतसर्वदेवमयोगुरुः॥
२६ सायंप्रातरुपानीय भैक्ष्यंतस्मैनिवेदयेत्॥ यच्चान्यदप्यनुज्ञातमुपयुंजीतसंयतः २७ शुश्रूषमाणआचार्यंसदो
पासीतनीचवत्॥ यानशय्यासनस्थानैर्नातिदूरेकृतांजलिः २८ एवंवृत्तोगुरुकुलेवसेद्भोगविवर्जितः॥ विद्यासमाप्य
ते यावद्बिभ्रद्व्रतमखंडितं २९ यद्यसौछंदसांलोकमारोक्ष्यन्ब्रह्मविष्टपं॥ गुरवेदेहंस्वाध्यायार्थंबृहद्व्रतः ३० अग्नौगु विन्यसे
रावात्मनिचसर्वभूतेषुमांपरं॥ अपृथग्धीरुपासीतब्रह्मवर्चस्व्यकल्मषः ३१ स्त्रीणांनिरीक्षणस्पर्शसंलापक्ष्वेलनादिकं॥

नेन आसीनं कृतांजलिर्नियोगप्रतीक्षया नातिदूरेवस्थानेनेत्यर्थः २८ प्राणिनोमिथुनीभूतानगृहस्थोग्रतस्त्यजेत् ३२
एवंवृत्ते वृत्तं यस्य सः २९ एवमुपकुर्वाणस्य धर्मानुक्त्वा नैष्ठिकस्य विशेषधर्मानाह यदीति षड्भिः असौ ब्रह्मचारी यदि छंदसां लोकं महर्
लोकं ततो ब्रह्मलोकं चारोक्ष्यन् आरोढुमिच्छतीत्यर्थः। यद्वा छंदसां लोकमिति ब्रह्मलोकविशेषणं। यत्र मूर्तिधराः कलादस्तुकत्वात्। तर्हि राम
बृहद्व्रतः सन् नैष्ठिकं व्रतं यस्य सः विन्यसेत् समर्पयेत् अधिकस्वाध्यायार्थं अधीतनिःक्रियार्थं वा ब्रह्मवर्चः वेदाभ्यासजं तेजस्तद्वान् ३१ ५२
तस्यैव वनस्थस्य च साधारणधर्मानाह स्त्रीणामिति। निरीक्षणं भावगर्भं क्ष्वेलनं परिहासः एवमा×३०×दिकं त्यजेत्। मिथुनीभूतानग्रतः
त्यजेत्। न पश्येदित्यर्थः ३२ श्रीरामायनमः

तस्यैव सर्वाश्रमसाधारणं धर्ममाह शौचमिति द्वाभ्यां ३३ ३४ निष्कामनैष्ठिकस्य तु मोक्षफलमाह एवमिति अमलः निःकामश्चेत् दग्ध
कर्माशयोंतःकरणं यस्य तथाभूतः सन् मद्भक्तो भवति ३५ उपकुर्वाणस्य समावर्तनप्रकारमाह अथेति अनंतरं द्वितीयाश्रमं आवेक्ष्य
द्रष्टुमिच्छन् यथा यथावद्विचारितवेदार्थः स्नायात् अभ्यंगादिकं कृत्वा समावर्ततेत्यर्थः ३६ तस्याधिकारानुरूपमाश्रमविकल्पसमुच्चया
वाह गृहमिति सकामश्चेद्गृहं अंतःकरणशुध्यादिकामश्चेद्वनं प्रविशेत् शुद्धांतःकरणः सन् द्विजोत्तमः द्विजोत्तमस्त्वुक्तेः क्षत्रियवैश्ययोर्न प्रव्र

शौचमाचमनं स्नानं संध्योपासनमार्जवं॥ तीर्थसेवा जपोऽस्पृश्याभक्ष्यासंभाष्यवर्जनं ३३ सर्वाश्रमप्रयुक्तोऽयं नियमः कुलनंद
न॥ मद्भावः सर्वभूतेषु मनोवाक्कायसंयमः ३४ एवं बृहद्व्रतधरो ब्राह्मणोऽग्निरिव ज्वलन्॥ मद्भक्तस्तीव्रतपसा दग्धकर्माशयो
मलः ३५ अथानंतरमावेक्ष्यन् यथा जिज्ञासितागमः॥ गुरवे दक्षिणां दत्त्वा स्नायाद्गुर्वनुमोदितः ३६ गृहं वनं वोपविशेत्प्रव्रजे
द्वा द्विजोत्तमः॥ आश्रमादाश्रमं गच्छेन्नान्यथामत्परश्चरेत् ३७ गृहार्थी सदृशीं भार्यामुद्वहेदजुगुप्सितां॥ यवीयसीं तु वयसा
यां सवर्णामनुक्रमात् ३८ इज्याध्ययनदानानि सर्वेषां च द्विजन्मनां॥ प्रतिग्रहोऽध्यापनं च ब्राह्मणस्यैव याजनम् ३९ प्रति
ग्रहं मन्यमानस्तपस्तेजोयशोनुदं॥ अन्याभ्यामेव जीवेत शिलैर्वा दोषदृक्तयोः ४० ब्राह्मणस्य हि देहोऽयं क्षुद्रकामाय नेष्य
ते॥ कृच्छ्राय तपसे चेह प्रेत्यानंतसुखाय च ४१

ज्याधिकारः स्वयति। ब्राह्मणश्चेत् प्रव्रजेदित्यर्थः। यद्वा आश्रमादाश्रमान्तरं गच्छेत् अन्यथा अनाश्रमी प्रतिलोमं च नाचरेदित्यर्थः अमत्परस्तु ते
वाचरेः स्वभक्तस्याश्रमनियमाभावस्य वक्ष्यमाणत्वात् ३७ विवाहनियमपूर्वकं वर्णधर्मैः सह गृहस्थधर्मानाह गृहार्थीति। सदृशीं सव
र्णां अजुगुप्सितां कुलतो लक्षणतश्चानिंदितां। कामतस्तु यामन्यामुद्वहेत् तां सवर्णामनु तस्या अनंतरं तत्रापि वर्णक्रमेणोद्वहेदित्यर्थः
तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमं ब्राह्मणक्षत्रियविशां भार्याः स्वाः शूद्रजन्मनः इति स्मृतेः ३८ इज्यादयस्त्रैवर्णिकानां मावश्यका
धर्माः प्रतिग्रहादित्रयं तु वृत्तिः सा च ब्राह्मणस्यैव ३९ तत्रापि मुख्यामुख्यतमां चान्यां वृत्तिमाह प्रतिग्रहमिति तयोर्याजनाध्यापन
योरपि कार्पण्यादिदोषपश्यन् शिलैः स्वामिन्यक्तैः क्षेत्रपतितैः कणिशैः ४० एवंवृत्तिकस्यैवं ब्राह्मणेन सोढव्यमित्याह ब्राह्मणस्येति ४१

भा॰ए॰
५३

उंछवृत्तिर्नाम विपणादिपतितकणोपादानं तां शिलवृत्त्येकीकृत्य तया तुष्टचित्तस्य मोक्षफलमाह शिलोंछेति महांतं आतिथ्यादिलक्षणं विरजं
निष्कामं सेवमानः ४२ परमधनस्य महत्फलमुक्त्वा सधनानामप्याह त्रिभिः समुद्धरंतीति द्वाभ्यां आपदुत्तारयति । विप्रमिति उपलक्षणं मत्प
रायणोपलक्षणमपि ४३ राजसत्तावश्यकमेतदित्याह सर्वा इति ४४ सर्वेषामापदुद्धारात् सौरादिभिस्तिसृभिः पण्यैर्विक्रयार्हैः नन्वसुरालव
णाद्यैः । तत्राप्यापदाक्रांतः खड्गेन क्षत्रियवृत्त्या वा यद्यपि गोमोनंतरा पापीयसीं वृत्तिमातिष्ठेत इति स्मरन् खड्गधर्मेणोपरायविक्र
याद्युक्तं मन्यते । तथापि हिंसातो वाणिक्वृत्तिरेव श्रेष्ठेति भगवतो मतं । न तु श्ववृत्त्या नीचसेवया ४६ तत्राप्यापदि मृगयया विप्ररूपेण

शिलोंछवृत्त्या परितुष्टचित्तो धर्मं महांतं विरजं जुषाणः । मय्यर्पितात्मा गृह एव तिष्ठन्नातिप्रसक्तः समुपैति शांतिं ४२
समुद्धरंति ये विप्रं सीदंतं मत्परायणं । तानुद्धरिष्ये नचिरादापद्भ्यो नौरिवार्णवात् ४३ सर्वाः समुद्धरेद्राजा पितेव व्यस
नात्प्रजाः । आत्मानमात्मना धीरो यथा गजपतिर्गजान् ४४ एवंविधो नरपतिर्विमानेनार्कवर्चसा । विधूयेहाशुभं कृत्स्न
मिंद्रेण सह मोदते ४५ सीदन्विप्रो वणिग्वृत्त्या पण्यैरेवापदं तरेत् । खड्गेन वापदाक्रांतो न श्ववृत्त्या कथंचन ४६ वैश्य
वृत्त्या तु राजन्यो जीवेन्मृगययापदि । चरेद्वा विप्ररूपेण न श्ववृत्त्या कथंचन ४७ शूद्रवृत्तिं भजेद्वैश्यः शूद्रः कारुकटक्रियां । कृ
च्छ्रान्मुक्तो न गर्ह्येण वृत्तिं लिप्सेत कर्मणा ४८ वेदाध्यायस्वधास्वाहाबल्यन्नाद्यैर्यथोदयं । देवर्षिपितृभूतानि मद्रूपाण्यन्व
हं यजेत् ४९ यदृच्छयोपपन्नेन शुक्लेनोपार्जितेन वा । धनेनापीडयन्भृत्यान्न्यायेनैवाहरेत्क्रतून् ५०

नाऽध्यापनादिना ४७ कारवः प्रतिलोमजविशेषाः कुलालादयः तेषां वृत्तिं कटादिक्रियां आपदुत्तीर्णस्तु नानुकल्पेन वर्तेतेत्याह कृच्छ्रादिति ४८
नरेवं वृत्तिव्यवस्थामुक्त्वा पुनर्गृहस्थस्यावश्यकान्पंचयज्ञानाह वेदाध्ययनेन ब्रह्मयज्ञः तेन ऋषीन् स्वधाकारेण पितॄन् स्वाहाकारेण दे
वान् । बलिहरणेन भूतानि । अन्नाद्यैरन्नोदकादिभिर्मनुष्यान् नित्यं यथोदयं विभवानुसारतः तेष्वीश्वरदृष्टिं विधत्ते मद्रूपाणी
ति ४९ आवश्यकं धर्ममुक्त्वा शास्त्रानुसारं धर्ममाह । यदृच्छया उद्यमं विना उपार्जितेन वा शुक्लेन स्ववृत्त्या लब्धेन शुद्धेन धनेनैवाभृ
त्यान् पोष्यान् ५० श्रीरामभद्रायनमः श्रीगोपालायनमः श्रीकृष्णायनमः श्रीरामचंद्रायनमः श्रीरामोजयति ॥

राम
५३

गृहस्थस्यापि निवृत्तिनिष्ठामेवाह कुटुंबेष्विति त्रिभिः। न प्रमाद्येत् ईश्वरनिष्ठायां प्रमत्तो न भवेत्। ननु दृष्टादृष्टार्थकर्मासक्तस्य कथमप्रमा
दः विचारेणेत्याह विपश्चिदिति ५१ तत्रापि दृष्टे ग्रासकेरादि कृत्वा तेषां नश्वरतां प्रपंचयति पुत्रादीनामिति संगमः पाथानां प्रपा
यां संगम इव। तत्र हेतुः अनुदेहं प्रतिदेहमेते वियंति विनश्यंति निद्रानुवर्तिस्वप्नो निद्रापायेयथेति। ५२ अतिथिवत् उदासीनः ५३
अस्या व्याश्रमविकल्पमाह। कर्मभिरिति। गृहाश्रमपूर्वं तिष्ठेत् यदि प्रजावान् तर्हि प्रव्रजेद्वा ५४ गृहासंगे दोषमाह यस्त्विति त्रिभिः ५५ धी

कुटुंबेषु न सज्जेत न प्रमाद्येत् कुटुंब्यपि। विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ५१ पुत्रदाराप्तबंधूनां संगमः पांथसंगमः।
अनुदेहं वियंत्येते स्वप्नो निद्रानुगो यथा ५२ इत्थं परिमृशन्मुक्तो गृहेष्वतिथिवद्वसन्। न गृहैरनुबध्येत निर्ममो निर
हंकृतः ५३ कर्मभिर्गृहमेधीयैरिष्ट्वा मामेव भक्तिमान्। तिष्ठेद्वनं वोपविशेत्प्रजावान्वा परिव्रजेत् ५४ यस्त्वासक्तम
तिर्गेहे पुत्रवित्तैषणातुरः। स्त्रैणः कृपणधीर्मूढो ममाहमिति बध्यते ५५ अहो मे पितरौ वृद्धौ भार्या बालात्मजा
त्मजाः। अनाथा मामृते दीनाः कथं जीवंति दुःखिताः ५६ एवं गृहाशयाक्षिप्तहृदयो मूढधीरयं। अतृप्तस्ताननु
ध्यायन्मृतोंधं विशते तमः ५७ इति श्रीभागवते महापुराणे एकादशस्कंधे सप्तदशोध्यायः ॥ ॥ १७ ॥ ॥ ॥
॥ ॥ श्रीभगवानुवाच ॥ वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा। वन एव वसेच्छांतस्तृतीयं भागमायुषः १ कंदमूलफ
लैर्वन्यैर्मेध्यैर्वृत्तिं प्रकल्पयेत्। वसीत वल्कलं वासस्तृणपर्णाजिनानि च २ केशरोमनखश्मश्रुमलानि बिभृयाद्दतः।
न धावेदप्सु मज्जेत त्रिकालं स्थंडिलेशयः ३ श्रीराम

बंधमेवाभिनयेन दर्शयति अहो इति बाला आत्मजा यस्याः सा आत्मजाश्च मां विना अनाथाः संतः कथं जीविष्यंतीति ५६ गृहे य आशयो वासना
तेन आ सर्वतः क्षिप्तं हृदयं यस्य सः अंधं तमः अतितामसीं योनिं ५७ ॥ ॥ इति एका० सप्तदशोध्यायः ॥ ॥ ॥ अष्टादशे तु वर्णैर्वन
स्थयतिगोचरः। अधिकारविशेषेण विशेषवापितकृतं १ क्रमप्राप्तान्वनस्थधर्मानाह वनमिति। आयुषः तृतीयं भागं पंचाशद्वर्षप
र्यंतं। ततः परं क्षीणे द्वितीयस्य षष्ठिरंगेपि संन्यासाधिकारस्यादिति भावः १ वसीत परिदधीत २ दतः दंतान् न धावेत् न शोधयेत् त्रिकालमप्सु ये
मज्जेत मुसलवत्स्नायात् स्थंडिलेशयः भूमिशायी ३ श्रीरामायनमः

भा.ए.

५४

तप्येत पंचाग्नीन् सूर्येणासह चतुर इतरान् मध्ये निधायात्मानं तापयेदित्यर्थः आसारषाट् आसारं धारासंपातं सहत इति तथा अभ्रावकाश
नाम व्रतं चरेत् जले आकंठमग्नः उदकवासं नाम व्रतं चरेत् ४ उलूखलेन वा अश्मना वा कुट्टयति कुट्टयतीति तथा दंता एव उलूखलं यस्य स
तथा ५ संचिनुयात् आहरेत् अन्यदा कालांतरे आहृतं कालांतरे नाददीत। लब्धेन वेन वेन चाद्यपुराणं तु परित्यजेदिति नारदोक्तेः ६ कालचो
७ दितान् आग्रयणादीन् किंच अग्निहोत्रमिति। मुनेश्च नैगमैः वेदवादिभिः ८ अस्य निष्कामस्य फलमाह एवमिति। धमनिभिः शिराभिः

ग्रीष्मे तप्येत पंचाग्नीन् वर्षास्वासारषाड् जले। आकंठमग्नः शिशिर एवंवृत्तस्तपश्चरेत् ४ अग्निपक्वं समश्नीयात् कालपक्व
मथापि वा। उलूखलाश्मकुट्टो वा दंतोलूखल एव वा ५ स्वयं संचिनुयात् सर्वमात्मनो वृत्तिकारणं। देशकालबलाभि
ज्ञो नाददीतान्यदाहृतं ६ वन्यैश्चरुपुरोडाशैर्निर्वपेत् कालचोदितान्। न तु श्रौतेन पशुना मां यजेत वनाश्रमी ७ अ
ग्निहोत्रं च दर्शश्च पूर्णमासश्च पूर्ववत्। चातुर्मास्यानि च मुनेराम्नातानि च नैगमैः ८ एवं चीर्णेन तपसा मुनिर्धम
निसंततः। मां तपोमयमाराध्य ऋषिलोकादुपैति मां ९ यस्त्वेतत् कृच्छ्रतश्चीर्णं तपो निःश्रेयसं महत्। कामायाल्पी
यसे युंज्याद् बालिशः कोऽपरस्ततः १० यदासौ नियमेऽकल्पो जरया जातवेपथुः। आत्मन्यग्नीन् समारोप्य मच्चित्तोऽग्निं
समाविशेत् ११ यदा कर्मविपाकेषु लोकेषु निरयात्मसु। विरागो जायते सम्यङ् न्यस्ताग्निः प्रव्रजेत्ततः १२

संततः व्याप्तः। यावज्जीवं कृतेन तपसा शुष्कमांस इत्यर्थः ऋषिलोकात् महर्लोकादि क्रमेण अयं भावः अंतःकरणशुद्धिभक्तिद्वारा तत्रैव
तावन्मुच्यते। प्रतिबंधकं वा कृत्स्नं तेन क्रमेण मुच्यत इति ९ तं सकामं निंदति य इति निःश्रेयसं मोक्षफलं अल्पीयसे आविरिं
च्यात् अत्यल्पमेव तस्मै। एवं यावज्जीवं वर्तमानस्य मोक्षसिद्धिः। तृतीयभागावसाने तु मंदविरागेऽपि संन्यासाधिकारः यदि तु ततो वा
गिवरवधर्माशक्तो भवेत् तदापि सम्यगविरक्तः विरक्तो वा १० तत्राविरक्तस्य कृत्यमाह यदेति जातो वेपथुः कंपो देहे यस्य सः ११ विरक्ते राम ५४
प्रत्याह यदेति १२

तत्रादौ कृत्यमाह इष्ट्वेति यथोपदेशं श्राद्धादिकं कृत्वैवं प्राजापत्येष्ट्यामभिष्टु। स्वप्राणे आत्मनि १३ संन्यासे विघ्ना भवंति तानविशिण
ष्य संन्यसेदित्येतावदियन्नाह विप्रस्येति केनाभिप्रायेण कुर्वंति तमाह अयमिति । परं परं ब्रह्म १४ एवं प्रव्रजितस्य धर्मानाह भिक्ष्यान्नेदिति ।
परं कौपीनादन्यद्वासो यदि धारयितुमिच्छति तर्हि कौपीनमाच्छाद्य तेयावतालावन्मात्रं धारयेदित्यर्थः । त्यक्तं प्रेषो वा रागात्पूर्वमेव अतोऽन्यत्किंचि
दपि न बिभ्यात् । दंडपात्राभ्यामित्यावश्यकजलपात्रादेरुपलक्षणं १५ मनःपूतं मनसा सम्यक् विचार्य यद्दुष्टं तदाचरेत् १६ मौनेवाचोदंडः

इष्ट्वा यथोपदेशं मां दत्वा सर्वस्वमृत्विजे ॥ अग्नीन्स्वे प्राण आदेश्य निरपेक्षः परिव्रजेत् १३ विप्रस्यैवे संन्यसतो देवा दारादि
रूपिणः ॥ विघ्नान्कुर्वंत्ययं ह्यस्मानाक्रम्य समियात्परं १४ भिक्ष्यान्नेन मुनिर्वासः कौपीनाच्छादनं परं ॥ त्यक्तं न दंडपात्राभ्या
मन्यत्किंचिदनापदि १५ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलं ॥ सत्यपूतं वदेद्वाक्यं मनःपूतं समाचरेत् १६ मौनानीहा सु
निरायामा दंडा वाग्देहचेतसां ॥ न ह्येते यस्य संत्यंग वेणुभिर्न भवेद्यतिः १७ भिक्षां चतुर्षु वर्णेषु विगर्ह्यान्वर्जयेच्चरेत् ॥ सप्तागारा
न्संकल्पितांस्तुष्येल्लब्धेन तावता १८ बहिर्जलाशयं गत्वा तत्रोपस्पृश्य वाग्यतः ॥ विभज्य पावितं शेषं भुंजीताशेषमा
हृतं १९ एकश्चरेन्महीमेतां निःसंगः संयतेंद्रियः ॥ आत्मक्रीड आत्मरत आत्मवान्समदर्शनः २० विविक्ते क्षेमशरणो म
द्भावविमलाशयः ॥ आत्मानं चिंतयेदेकमभेदेन मया मुनिः २१

अनीहा काम्यकर्मत्यागो देहस्य प्राणायामश्चेतसः एते अंतस्त्रयो दंडा यस्य न संति अगहेतुध्रुव अंगेष्वेतैर्वेणुभिरिति वा १७ चतुर्ष्विति
ब्राह्मणेष्वेव वृत्तिभेदेन चतुर्विधेषु पूर्वपूर्वासंभवे वा विगर्ह्यान् अभिशस्तपतितान् असंकल्पितान् अन्नायैताभ्यो भविष्यतीति पूर्वमनुदिष्टा
न् १८ बहिर्ग्रामात्पावितं प्रोक्षणादिभिः शोधितं विभज्य विष्णुब्रह्मार्कभूतेभ्यः । अशेषमित्यधिकाहरणं निरस्तं याचितमिति पाठे माधुक
रेण पावितमन्नं चेत् तर्हि विभज्य भुंजीत न त्वयाचितादि भैक्ष्यमनुष्ठेयमित्यर्थः माधुकरे तु नैवेद्यं भैक्ष्येनान्येषु विधत्ते निवेद्यकं क्षिपेदप्सु त्रिनय
भौतिकं बाह्यं इति स्मृतेः । यद्वा तदानीं केनापि याचितं चेत् तन्मध्ये तस्मै किंचिद्विभज्य दत्वेत्यर्थः १९ किंच एकश्चरेदिति आत्मन्येव क्रीडा कौतुकं
यस्य सः आत्मन्येव रतः संतुष्टः आत्मवान् धीरः २० विविक्ते विजने क्षेमं निर्भयं शरणं स्थानं यस्य सः मय्यभिभावेन विमल आशयो यस्य सः २१

भा॰ए॰
५५

बंधंमोक्षंचकेनबंधःकेनवामोक्षइतितावाह बंधइति २२ २३ पुराणिहद्दादिमंतिग्रामास्तद्बहितः व्रजागोष्ठानितान्। सार्थान्यात्रिक
जनसमूहान् २४ यतः शिलवृत्त्याप्राप्तेनतेनैवान्धसाअन्नेनशुद्धसत्वःसन् निवृत्तमोहः संसिध्यति मुच्यते २५ ननु मृष्टान्नविषयका अतः
थ शिलान्ने प्रवृत्तिः स्यादत आह नैतदिति एतद्दृश्यमानंमृष्टान्नादिकंवस्तुतयानपश्येत्। यतो विनश्यति इहामुत्रचलोके असक्तचित्तःसन् चिकीर्षि
तात् तदर्थकृत्यात् विरमेत् २६ ननु तथापि यावद्गुणात्सुखहेतुत्वात्ममविषयतावर्ततेकुतो विरागस्यात्तत्राह यदेतदिति एतज्जगत् ममात्मस्वदे

अन्वीक्षेतात्मनोबंधंमोक्षंचज्ञाननिष्ठया॥ बंधइंद्रियविक्षेपोमोक्षएषांचसंयमः २२ तस्मान्नियम्यषड्वर्गंमद्भावेनचरेन्मुनिः॥
विरक्तःक्षुद्रकामेभ्योलब्ध्वात्मनिसुखंमहत् २३ पुरग्रामव्रजान्सार्थान्भिक्षार्थंप्रविशंश्चरेत्॥ पुण्यदेशसरिच्छैलवनाश्र
मवतीमहीं २४ वानप्रस्थाश्रमपदेष्वभीक्ष्णंभैक्ष्यमाचरेत्॥ संसिध्यत्याश्वसंमोहः शुद्धसत्वःशिलांधसा २५ नैतद्वस्तुतयाप
श्येद्दृश्यमानंविनश्यति॥ असक्तचित्तोविरमेदिहामुत्रचिकीर्षितात् २६ यदेतदात्मनिजगन्मनोवाक्प्राणसंहतं॥ सर्वं
मायेतितर्केणस्वस्थस्त्यक्त्वानतत्स्मरेत् २७ ज्ञाननिष्ठोविरक्तोवामद्भक्तोवानपेक्षकः॥ सलिंगानाश्रमांस्त्यक्त्वाच
रेदविधिगोचरः २८ बुधोबालकवत्क्रीडेत्कुशलोजडवच्चरेत्॥ वदेदुन्मत्तवद्विद्वान्गोचर्यांनैगमश्चरेत् २९

मनोवाक्प्राणैः संहतं संहितमहंकारास्पदंशारीरंचसर्वंतज्जन्यसुखंचआत्मनिमायामात्रमितितर्केणस्वप्नादिदृष्टांतेनत्यक्त्वा स्वस्थआत्म
निष्ठःसन् पुनः तन्नस्मरेत् नैवचिंतयेत् २७ एवंबहूदकादिधर्मानुक्त्वापरमहंसधर्मानाह। ज्ञाननिष्ठइतिसार्धैर्द्विभिः बहिर्विरक्तोमु
मुक्षुःसन् योज्ञाननिष्ठोवामोक्षेप्यनपेक्षोमद्भक्तोवासलिंगान्त्रिदंडादिसहितान् आश्रमांस्तद्धर्मान्त्यक्त्वातदासक्तिंत्यक्त्वायथोचितंधर्मं दि
चरेदित्यर्थः। नपुनरस्मत्त्यागएवविवक्षितः पुनर्धर्मविधानात् अक्रियत्वस्योत्तराध्यायेवक्ष्यमाणत्वाच्च तर्हिपूर्वस्मात्कोविशेषः तमाह।
अविधिगोचरः विधिकिंकरोनस्यादिति एतदेवस्फुटीकरिष्यति शौचमाचमनंस्नानंनतुचोदनयाचरेदित्यादिना २८ कथंचरेत्तत्रा
ह बुधः विवेकवानपिबालकवत् मानावमानविवेकशून्यः कुशलः निपुणोपिजडवत् फलानुसंधानाभावेन विद्वानपितथापिउन्मत्तव
त् लोकरंजनाभावेन नैगमः वेदार्थनिष्ठोपिगोचर्यांअनियताचारमिव २९ श्रीराम

राम
५५

वेदवादरतः कर्मकांडव्याख्यानादिनिष्ठः हैतुकः केवलतर्कनिष्ठः शुष्कवादे निःप्रयोजनगोष्ठ्यां यो विवादस्तस्मिन् ३० अतिवादान् दुरुक्तानि
आत्मदृष्ट्या तावद्वैरकारणं नास्तीत्युक्तं ३१ एक एवेति देहदृष्ट्यापि नास्तीत्याह भूतानि देहा अपि कारणरूपेणैकात्मकानि ३२ दैवतंत्रि
तं दैवाधीनं यतः ३३ अस्तु तर्हि भिक्षाप्रयत्ने नापि तत्राह आहारमात्रार्थं समीहेत वा यतः प्राणधारणं युक्तं सम्यक् कथं तेन प्राणधारणेन तस्य
तत्त्वं विचार्यते । किं तेनापि तदाह तद्विज्ञायेति ३४ तर्हि किं मृष्टान्नादिकमप्यार्थमेव केनैव भुंक्ते इत्याह यदृच्छयेति ३५ यथाहमीश्वरो ली
लया चरामि तथा ज्ञानी ज्ञाननिष्ठः अनासक्तः कुर्यात् न तु विधिकिंकरत्वेन तस्य ज्ञाननिष्ठाविरोधादित्यर्थः ३६ कुतो विधिकिंकरत्वाभाव

वेदवादरतो न स्यान्न पाषंडी न हेतुकः ॥ शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत् ३० नोद्विजेत जनाद्धीरो जनं चोद्वेजयेन्न तु ॥
अतिवादांस्तितिक्षेत नावमन्येत किंचन ३१ देहमुद्दिश्य पशुवद्वैरं कुर्यान्न केनचित् ॥ एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः ॥
यथेंदुरुदपात्रेषु भूतान्येकात्मकानि च ॥ ३२ ॥ ॥ अलब्ध्वा न विषीदेत काले कालेऽशनं क्वचित् ॥ लब्ध्वा न हृष्येद्धृतिमानुभयं
दैवतंत्रितं ॥ ३३ ॥ ॥ आहारार्थं समीहेत युक्तं तत्प्राणधारणं ॥ तत्त्वं विमृश्यते तेन तद्विज्ञाय विमुच्यते ३४ यदृच्छयोपपन्नान्न
मद्याच्छ्रेष्ठमुताधरं ॥ तथा वासस्तथा शय्यां प्राप्तं प्राप्तं भजेन्मुनिः ३५ शौचमाचमनं स्नानं न तु चोदनया चरेत् ॥ अन्यांश्च निय
मान्ज्ञानी यथाहं लीलयेश्वरः ३६ न हि तस्य विकल्पाख्या या च मद्वीक्षया हता ॥ आदेहांतात्क्वचित्ख्यातिस्ततः संपद्यते
मया ३७ दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान् ॥ अजिज्ञासितमद्धर्मो गुरुं मुनिमुपाव्रजेत् ३८ तावत्परिचरेद्भक्तः श्र
द्धावाननसूयकः ॥ यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः ३९ यस्त्वसंयतषड्वर्गः प्रचंडेंद्रियसारथिः ॥ ज्ञानवैराग्यरहितस्त्रिदं

स्तस्य तत्राह न हीति तस्य विकल्पाख्या भेदप्रतीतिः । ननु वस्तु सा । सत्यं या वासीत्सापि मद्वीक्षया ज्ञानेन हता । पुनर्दृश्यमानत्वात् तत्राह आ
देहांतात् क्वचित्कदाचित् बाधितैव ख्यातिर्भवति ३७ तदेवं विरक्तस्यापरोक्षज्ञानवतः संन्यासं तद्धर्मांश्चोक्त्वा केवलवैराग्यवतो विविदि
षुसंन्यासमाह । दुःखोदर्केष्विति । नजिज्ञासितो मद्धर्मो मत्प्राप्तिसाधनं येन सः ३८ मामेव मद्रूपमेव गुरुं परिचरेत् । ततः परमेकश्चरेदित्यादि
धर्मैर्वर्तितव्यमिति भावः ३९ अनधिकारिणः संन्यासं निंदति द्वाभ्यां यस्त्विति । प्रचंडोन्मासकः इंद्रियसारथिर्बुद्धिर्यस्य सः ४० श्रीराम ॥

सुरानृषय्र्याद्वेवान् आत्मानं स्वात्मानं आत्मस्थं मां च निह्नुते प्रतारयति निह्नवफलमाह अस्मादिति ४१ चतुर्णामसाधारणधर्मानाह भि
क्षोरिति अन्यधर्मान् कांश्चित् गृहस्थेप्यतिदिशति ब्रह्मचर्यमिति । शौचं शमादिरहितैर्ग्योः तस्य ब्रह्मचर्यप्रकारमाह ऋतौ गन्तुः ४३ एवंभूत रिति
वर्ण्या ४२ ४ श्रमधर्मफलमाह इति मामिति द्विहाम् भक्तिं विंदते ४४ ततः किं मत आह भक्त्येति महेश्वरत्वे हेतुः सर्वोत्पत्त्यप्ययं सर्वोत्प स्या
त्त्यप्ययो यस्मात् अतएव तत्कारणम् मा मां ब्रह्मरूपं वैकुंठनिवासिनं । यद्वा ब्रह्म वेदस्य कारणं मां उपयाति सामीप्येन प्राप्नोति ४५ तत
श्चासौ मुक्त एवेत्याह इति एवंभूतेन स्वधर्मेण निर्णिक्तं शुद्धं सत्त्वं यस्य सः अतएव निर्ज्ञाता मम गतिरैश्वर्यं येन ४६ उक्तमर्थं संक्षिप्या

सुरानात्मानमात्मस्थं निह्नुते मां च धर्महा ॥ अविपक्वकषायोस्मादमुष्माच्च विहीयते ४१ भिक्षोर्धर्मः शमो हिंसा तप ईक्षा व
नौकसः ॥ गृहिणो भूतरक्षेज्या द्विजस्याचार्यसेवनं ४२ ब्रह्मचर्यं तपः शौचं संतोषो भूतसौहृदं ॥ गृहस्थस्याप्यृतौ गंतुः स
र्वेषां मदुपासनं ४३ इति मां यः स्वधर्मेण भजेन्नित्यमनन्यभाक् ॥ सर्वभूतेषु मद्भावो मद्भक्तिं विंदते दृढां ४४ भक्त्योद्धवानपा
यिन्या सर्वलोकमहेश्वरं ॥ सर्वोत्पत्त्यप्ययं ब्रह्म कारणं मोपयाति सः ४५ इति स्वधर्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः ॥ ज्ञान
विज्ञानसंपन्नो न चिरात्समुपैति मां ४६ वर्णाश्रमवतां धर्म एष आचारलक्षणः ॥ स एव मद्भक्तियुतो निःश्रेयसकरः परः
४७ एतत्तेभिहितं साधो भवान्पृच्छति यच्च मां ॥ यथा स्वधर्मसंयुक्तो भक्तो मां समियात्परं ४८ ॥ इति श्रीभागवते म
एकादशस्कंधे अष्टादशोध्यायः ॥ ॥ ॥ श्रीभगवा० यो विद्याश्रुतसंपन्न आत्मवान्नानुमानिकः ॥ मायामात्रमिदं ज्ञात्वा ज्ञानं च म

ह यद्यप्येष आचारलक्षणः पितृलोकप्राप्तिफलः मद्भक्तियुतः मदर्पणेन कृतः ४७ प्रकारार्थमुपसंहरति एतत्ते इति अभिहितं यथा भक्तो
भूत्वा मां परं संप्राप्नुयादिति ४८ ॥ ॥ इत्येकादशस्कंधे टीकायामष्टादशोध्यायः ॥ ॥ १८ ॥ ज्ञानादेर्निर्णयः पूर्वं हतो ह्याश्रमध
र्मतः ॥ एकोनविंशोत्र तमे ज्ञानादेस्तदागम्यते । १ ननु देवतर्कतो बाधितोपि देहादिप्रपंचो यावदपरोक्षानुभवेन दृष्टो हारिरिव न लीयते ताव
त्तत्सानाभ्यासस्ततो मुक्तिरित्युक्तं आदेहोनात् कृवित्तस्यानिस्तेतः स पद्यते मयेत्याह इति । यस्य त्वपरोक्षानुभवेन प्रपंचो लीनप्रायस्तस्य न किंचि
त्कृत्यमस्तीत्याह यदि । विद्या अनुभवः तत्पर्यंतेन श्रुतेन संपन्नः अतएव आत्मवान् प्राप्तात्मतत्त्वः नानुमानिकः केवलपरोक्षज्ञानवान्न भव
ति अनकारपाठे प्राक् श्रुत्यनुकूलं तर्कतो निर्णीतार्थ इत्यर्थः । स्वरूपे तं निरतिसाधनं मायामात्रमिदं ज्ञात्वा ज्ञानं तत्साधनं संन्यसे
त् अयमेव विद्वत्संन्यासो नाम १ श्रीरामाय ॥

अत्रो हेतुमाह ज्ञानस्थिति। यस्मादहमेव तस्येष्टः अपेक्षितः स्वार्थः फलं हेतुः तत्साधनं च संमतः स्वर्गो ऽभ्युदयश्च अपवर्गः संसारनि
वृत्तिश्च अतः ×नि× स्तस्य न प्राप्यं कृत्यं वा किं चिदस्तीत्यर्थः २ अत्र विद्वदनुभवं प्रमाणयति ज्ञानेति यथोक्तं ज्ञानिनमभिन्नं दृति ज्ञा
नीति यतो ऽसौ ज्ञानेन मां धारयति ३ तस्य ज्ञानस्तौति तपइति अलं अत्यर्थं ज्ञानस्य कलया लेशेन ४ ज्ञानेन सहितं तत्पर्यन्तं यथा
भवति तथा ज्ञात्वा न संपन्नः सन् मामेव भज अन्यत्सर्वं त्यजेत्यर्थः ५ तस्य प्रत्ययार्थं पूर्वेषां वृत्तिमाह ज्ञानेति मामेव संसिद्धिं

ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च संमतः॥ स्वर्गश्चैवापवर्गश्च नान्यो ऽर्थो मदृते प्रियः २ ज्ञानविज्ञानसंसिद्धाः पदं
श्रेष्ठं विदुर्मम॥ ज्ञानी प्रियतमो ऽतो मे ज्ञानेनासौ बिभर्ति मां ३ तपस्तीर्थं जपो दानं पवित्राणीतराणि च॥ नालं कु
र्वंति तां सिद्धिं या ज्ञानकलया कृता ४ तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव॥ ज्ञानविज्ञानसंपन्नो भज मां
भक्तिभावितः ५ ज्ञानविज्ञानयज्ञेन मामिष्ट्वात्मानमात्मनि॥ सर्वयज्ञपतिं मां वै संसिद्धिं मुनयो ऽगमन् ६ त्वय्यु
द्धवाश्रयति यस्त्रिविधो विकारो मायांतरापतति नाद्यपवर्गयोर्यत्॥ जन्मादयो ऽस्य यदमी तव तस्य किं स्युराद्यंतयो
र्यदसतो ऽस्ति तदेव मध्ये ७ श्रीउद्धव उवाच ज्ञानं विशुद्धं विपुलं यथैतत् वैराग्यविज्ञानयुतं पुराणं॥ आख्याहि विश्वेश्व
र विश्वमूर्ते त्वद्भक्तियोगं च महद्विमृग्यं ८

ज्ञाप्ताः ६ तदेव ज्ञानं संक्षेपत उपदिशति त्वयीति त्रिविधः आध्यात्मिकादिर्विकारः देहादिः सः मायान्तु परमार्थः यत् यस्मात्
अंतरा मध्य एवापतति आरज्जौ सर्पमालादिवत् नाद्यपवर्गयोः न त्वादावंते चास्ति अतः यत् यदा अस्य विकारस्यामी जन्मादयः स्युः
तदा तस्य तवाधिष्ठानभूतस्य किं न किं चिदित्यर्थः तस्यापि वस्तुतो न संतीति तस्यासत्त्वादित्याह आद्यंतयोरिति असतः सर्पादेः
आद्यंतयोर्यदस्ति रज्ज्वादि तदेव मध्ये ऽपि न तु सर्पादि। तद्द्रव्यं विकारो नास्तीत्यर्थः। यद्वा आद्यंतयोर्यदस्ति तन्मध्ये ऽप्यस्त्येव न
तस्य जन्मादयः संति अतस्त्वं निर्विकार असीति ७ ज्ञानादेर्विशेषजिज्ञासुः पृच्छति विशुद्धमेतत् ज्ञानं विपुलं निश्चितं यथा भ
वति तथा कथयेति। महद्भिर्ब्रह्मादिभिर्विमृग्यं ८ श्रीरामाय॥

भा·ए·
५७

महद्भिमृग्यत्वमभिनिवेशेनाह तापत्रयेणाभिहतो हतस्य अतः संतप्यमानस्य अंघ्रिद्वंद्वमेवातपत्रं तस्मात् न केवलमातपत्रं किं तु अमृ
तमप्यभितो वर्षति यत्तस्मात् ९ अतिकृपामुत्पादयन्नाह दष्टमिति अस्मिन् बिले संसारकूपे पतितं तत्रैव कालाहिना दष्टं एवं मापि क्षुद्र
सुखेष्वेव उरुस्तर्षः तृष्णा यस्य तं ह्रमानः कथं समुद्धरणी यद्यति चेत्तत्राह आपवर्ग्यैः अपवर्गबोधकैः वागमृतैरासिंचेति त्वद्विश्वासार्थं
विहूक्तभायांनिर्णीतमहं वक्ष्यामीत्याह इत्थमिति ११ ज्ञानादिभिरुपबृंहितान् सहितानित्यर्थः १३ तज्ज्ञानं कथयति ४१·४ नवेति प्रक
तिपुरुषमहदहंकारपंचतन्मात्राणि एकादशेंद्रियाणि पंचमहाभूतानि त्रयो गुणाः एतान् भावानष्टाविंशतितत्त्वानि भूतेषु ब्रह्मादिस्थावरां

तापत्रयेणाभिहतस्य घोरे संतप्यमानस्य भवाध्वनीश॥ पश्यामि नान्यच्छरणं तवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात् ९ दष्टं ज
नं संपतितं बिलेस्मिन् कालाहिना क्षुद्रसुखोरुतर्षं॥ समुद्धरैनं कृपयापवर्ग्यैर्वचोभिरासिंच महानुभाव १० श्रीभगवानुवाच
इत्थमेतत्पुरा राजा भीष्मं धर्मभृतां वरं॥ अजातशत्रुः पप्रच्छ सर्वेषां नोनुशृण्वतां ११ निवृत्ते भारते युद्धे सुहृन्निधनविह्व
लः॥ श्रुत्वा धर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत १२ तानहं तेभिधास्यामि देवव्रतमुखाच्छ्रुतान्॥ ज्ञानवैराग्यविज्ञानश्र
द्धाभक्त्युपबृंहितान् १३ नवैकादश पंच त्रीन् भावान् भूतेषु येन वै॥ ईक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितं १४ एत
देव हि विज्ञानं न तथैकेन येन यत्॥ स्थित्युत्पत्त्यप्ययान्पश्येद्भावानां त्रिगुणात्मनां १५ श्रीराम

येन
...वत्तेषु कार्येषु अनुगतानि येन ज्ञानेनेक्षेत अथ एषु अपि भावेषु एकं परमात्मतत्त्वं अनुगतं पश्येत् न कार्यकारणात्मकं जगत्त्रयं परमकार
णात्मकमेवैतत् न तु ततः पृथगिति येन पश्येत् तत् ज्ञानमित्यर्थः १४ विज्ञानमाह एतदेवेति एकेनैवकार्धेन यत्पदार्थेनैकेनानुगतानेकात्म
कान् भावान् पूर्वमैक्षत नानुगतान् पृथगेवान्वैक्षत किं तु तदेकं परमकारणमेवैक्षत न तदा एतदेव विज्ञानमुच्यते तदुक्तं भवति। यो संज्ञाने नापरोक्ष
भ्रमस्य दिग्भ्रान्त्यादिवन्निवृत्त्यभावात्तदा जगत्स्वरूपं तत्त्वात्मनः पृथक्सदिति न मन्यते अपरोक्षज्ञाने तु बाधितमेव जगत् बन्धुकं संस्कारशेषं प
श्यति। ततः परं न पश्यति च अतः परोक्षापरोक्षज्ञाने ज्ञानविज्ञानशब्दाभ्यामुच्येते इति एकेन सर्वकार्याणामनुगतिं कार्याणां कारणात्पृथ
गसत्त्वं चोपपादयति साधने। तत्र परिनिष्ठानित्यादि जगदादिरिमत्तेनैतेषां भावानामुत्पत्त्यादयो न स्युः तर्हि कारणस्यैकस्याभावादेको
त्मता मिथ्यात्वं च नस्यात् अतस्तेषामुत्पत्त्यादीन् साधयति स्थितीति त्रिगुणात्मनां सावयवानामित्यर्थः विकारस्य

राम
५७

तत्र आदौ उत्पत्तौ अंते परिणामांतरापत्तौ वा कारणैरेव न मध्ये वा आश्रयत्वेन । सृज्यात् सृज्यं कार्यात् कार्यांतरं प्रति यदन्वियात् अनुगच्छेत् । तत्प्र
तिसंक्रामे तेषां प्रलये च यदवशिष्येत तदेव तदेव सदिति पश्येदित्यर्थः १६ वैराग्यमाह श्रुतिरिति द्वाभ्यां श्रुतिर्नेह नानास्ति किंचनेत्यादि ।
प्रत्यक्षं पटादिकार्यं तंत्वादिव्यतिरेकेण न दृश्यते । चेतन्यव्यतिरेकेण च न किंचिद्दृश्यत इति ऐतिह्यं महाजनप्रसिद्धिः अनुमानं विमतं मि
थ्या दृश्यत्वात् शुक्तिरजतवदित्यादि । एवं प्रमाणचतुष्टयेप्यनवस्थानात् । एतैर्बाधितत्वात् । स एवं सर्वानुगतं सत्यमात्मानं पश्यन्विक
ल्पस्य मिथ्यात्वात् ततो विरज्यते विरक्तो भवतीत्यर्थः १७ न च वेदोक्तस्वर्गादिसुखाशया न विरज्येतेत्याह कर्मणामिति आविरिंच्यात् आब्रह्म

आदावंते च मध्ये च सृज्यात्सृज्यं यदन्वियात् ॥ पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत् १६ श्रुतिः प्रत्यक्षमैतिह्यमनुमानं च
तुष्टयं ॥ प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यते १७ कर्मणां परिणामित्वादाविरिंच्यादमंगलं ॥ विपश्चिन्नश्वरं प
श्येददृष्टमपि दृष्टवत् १८ भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेनघ ॥ पुनश्च कथयिष्यामि मद्भक्तेः कारणं परं । १९
श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनं ॥ परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम २० आदरः परिचर्यायां सर्वांगैरभिवं
दनं ॥ मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः २१ मदर्थेष्वंगचेष्टा च वचसा मद्गुणेरणं ॥ मय्यर्पणं च मनसः सर्वकाम
विवर्जनं २२ मदर्थेर्थपरित्यागो भोगस्य च सुखस्य च ॥ इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः २३ एवं धर्मैर्मनुष्याणामुद्ध
वात्मनिवेदिनां ॥ मयि संजायते भक्तिः कोन्योर्थोस्यावशिष्यते २४

लोकपर्यंतं अदृष्टमपि सुखं अमंगलं दुःखरूपं नश्वरं च पश्येत् १८ भक्तियोगं सकारणमाह भक्तियोगः पूर्वमुक्त एव तथापि तस्मिन् प्रीतिं
प्राप्नुवते तुभ्यं पुनश्च कथयिष्यामि १९ श्रद्धेति श्रवणादरः शश्वदिति सर्वत्रानुषज्यते । मदनुकीर्तनं श्रवणानंतरं मत्कथाव्याख्यान
मित्यर्थः २० २१ अंगचेष्टा लौकिकी क्रिया । वचसा लौकिकेनापि मद्गुणानामीरणं कथनं २२ मदर्थमिज्यार्थं तद्विरोधिनोर्थस्य
परित्यागः भोगस्य तत्साधनस्य चंदनादेः सुखस्य पुत्रोपलालनादेः इष्टं वैदिकं पूर्तकर्म तदपि मदर्थं कृतं भक्तेः कारणमित्यर्थः २३
भक्तिः प्रेमलक्षणा संजायते अस्य भक्तस्य अन्यः कोर्थः साधनरूपः साध्यरूपो वा वशिष्यते । सर्वोपि स एव भवतीत्यर्थः २४

भा॰ ए॰

५८

किं बहुना चित्तमेवात्र वृत्तिभिर्निमित्तमर्थानर्थयोः कारणं तदेवाह । यदात्मनीति द्वाभ्यां यदा आत्मनि मय्यीश्वरे चित्तमर्पितं तदा पुमान् धर्मा
दीन्प्राप्नोत्येव २५ एतद्व्यतिरेकेण दुःखमित्याह यदा तु चित्तं विकल्पे देहगेहादावर्पितं सत्परिधावति तदा धिक् रजस्वलमसन्निष्ठ
व भवति ततश्च विपर्ययं अधर्मादिकं विद्धि २६ स्वाभिप्रेतान् धर्मादीन् व्याचष्टे । धर्मो मद्भक्तिकृत् यतः स एव प्रोक्तः प्रकृष्टत्वेनोक्तः शास्त्रे
षु २७ धर्मादीनां महाजनप्रसिद्धानामन्यथा व्याख्यातत्वात् यमादिष्वपि संख्यातः स्वरूपतो बोधः किं सिद्धलक्षणं पृच्छन्त्या इति सप्तचनयानादि
शेषाणि सांसुः पृच्छति यम इति पञ्चभिः २८ इष्टमभ्यर्हितं धनं वाकं २९ परेति विद्यादीनां विशेषणं । श्रीमद् इति । ३० प्रश्नानष्टानर्थी

यदात्मन्यर्पितं चित्तं शान्तं सत्त्वोपबृंहितं । धर्मं ज्ञानं सवैराग्यमैश्वर्यं चाभिपद्यते २५ यदर्पितं तद्विकल्पे इन्द्रियैः परिधावति ।
रजस्वलं चासन्निष्ठं चित्तं विद्धि विपर्ययं २६ धर्मो मद्भक्तिकृत् प्रोक्तो ज्ञानं चैकात्म्यदर्शनं । गुणेष्वसंगो वैराग्य
मैश्वर्यं चाणिमादयः २७ उद्धव उवाच यमः कतिविधः प्रोक्तो नियमो वारिकर्षण । कः शमः को दमः कृष्ण का तितिक्षा धृतिः
प्रभो २८ किं दानं किं तपः शौर्यं किं सत्यमृतमुच्यते । कस्त्यागः किं धनं चेष्टं को यज्ञः का च दक्षिणा २९ पुंसः किं स्वि
द्बलं श्रीमन् भगो लाभश्च केशव । का विद्या ह्रीः परा का श्रीः किं सुखं दुःखमेव च ३० कः पंडितः कश्च मूर्खः कः पंथा उत्पथ
श्च कः । कः स्वर्गो नरकः कः स्वित्को बंधुरुत किं गृहं ३१ क आढ्यः को दरिद्रो वा कृपणः कः क ईश्वरः । एतान्प्रश्नान्मम ब्रूहि वि
परीतांश्च सत्पते ३२ अहिंसा सत्यमस्तेयमसंगो ह्रीरसंचयः । आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभयं ३३ शौचं जप
श्रीभगवानु स्तपो होमः श्रद्धातिथ्यं मदर्चनं । तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनं ३४ एते यमाः सनियमा उभयोर्द्वादश स्मृताः ।
पुंसामुपासितास्तात यथाकामं दुहंति हि ३५

नु विपरीतान् अशमादीन् ३२ यमान्नियमानाह अहिंसेति त्रिभिः । अ
स्तेयं मनसापि परस्वापहरणे आस्तिक्यं धर्मे विश्वासः । ३३ शौचं बाह्यमाभ्यंतरं चेति द्वयं । अतो द्वादश नियमाः । श्रद्धा धर्मादरः ३४ उभयो राम ५८
र्लोकयोर्द्वादश स्मृताः तत्र यमा नियमाश्च यद्यप्युभयोः प्रवृत्तिनिवृत्तयोः मुमुक्षोर्यमा मुख्याः । सकामस्य नियमा मुख्याः स्मृता इत्यर्थः । अत्र हे
तुमाह हि यस्मात् उपासिताः सेविताः सन्तः पुंसां प्रवृत्तानां निवृत्तानां च यथाकामं कामानुसारेण मोक्षमभ्युदयं च दुहन्तीति ३५ श्रीराम

मुमुक्षोरुपदेयानुशमादीन् हेयाश्चदुःखादीन्महोत्तनप्रक्षिप्तेभ्यो विलक्षणानाह शमइत्यादिनायावत्समाप्तिपर्यन्तेनैवतद्रूप अशमाद
योप्युक्तेयाः। शमोमन्निष्ठताबुद्धेः नतुशांतिमात्रं दमइंद्रियसंयमः नचौरादिदमनं। तितिक्षाविहितदुःखस्य संमर्षः सहनं नभारादेः
जिह्वोपस्थयोर्वेगधारणं धृतिः। नत्वनुद्वेगमात्रं। ३६ दंडोभ्रंतद्रोहः तस्यत्यागोदानं। नधनार्पणं। कामत्यागः भोगापेक्षा तपः नतुधा
दिस्वभावोवा सनातस्यजयः प्रतिबंधः शौर्यनविक्रांतिः समंब्रह्मतस्यदर्शनमालोचनं सत्यं विषयत्वात्सत्यं नयथार्थभाषणमात्रं ३७
अन्यत्रऋतंसूनृतासत्याप्रियावबाक्‌पुरुषैर्ऋतसत्ययोः स्फुटएववि...वेकः कर्मप्राप्तत्यागैर्व्याख्यातुमादौ ततोभेदेनशौर्येव्या

शमोमन्निष्ठताबुद्धेर्दमइंद्रियसंयमः॥ तितिक्षादुःखसंमर्षोजिह्वोपस्थजयोधृतिः ३६ दंडन्यासः परंदानं कामत्यागस्त
पःस्मृतं॥ स्वभावविजयः शौर्यं सत्यंचसमदर्शनं ३७ ऋतंचसूनृतावाणी कविभिः परिकीर्तिता॥ कर्मस्वसंगमः शौ
चं त्यागः संन्यासउच्यते ३८ धर्मइष्टंधनंनृणां यज्ञोहंभगवत्तमः॥ दक्षिणाज्ञानसंदेशः प्राणायामः परंबलं ३९
भगोमऐश्वरोभावोलाभोमद्भक्तिरुत्तमः॥ विद्यात्मनिभिदाबाधोजुगुप्साह्रीरकर्मसु ४० श्रीर्गुणानैरपेक्षाद्याः सु
खंदुःखसुखात्ययः॥ दुःखंकामसुखापेक्षा पंडितोबंधमोक्षवित् ४१ मूर्खोदेहाद्यहंबुद्धिः पंथामन्निगमः स्मृतः॥ उ
त्पथश्चित्तविक्षेपः स्वर्गः सत्वगुणोदयः ४२

येशे। तस्यापिमत्यत्यागरूपत्वेन त्यागादभेदप्रतीतेः कर्मस्वसंगमः अनास
क्तिः शौचं त्यागस्तुसंन्यासइतितयोर्भेदइत्यर्थः ३८ नृणांइष्टंधनंधर्मः नपश्वादिसाधारणं। भगवत्तमः परमेश्वरोहमेवयज्ञः मनुष्या
यज्ञोनुष्ठेयः नाक्रतुयज्ञइत्यर्थः यज्ञार्थदानंदक्षिणा साचज्ञानोपदेशः नहिरण्यादिदानं तेनाशिष्यज्ञरूपोविष्णुः प्राप्यतेदुर्दमनेब
ले। तथामनोदमनहेतुत्वात् प्राणायामइति ३९ लाभंव्याविरव्यासुः प्रथमंभगंनतोभेदेनव्याचष्टे। लोकेलब्धोरमेदप्रसिद्धेः। भगोभा
ग्य। तत्रममैश्वर्यभावोमरीयपैश्वर्यादिवाद्गुण्यमित्यर्थः उत्तमोलाभस्तुमद्भक्तिः नपुत्रादिः विद्यात्मनिप्रतीतस्यभेदस्यबाधः नज्ञान
मात्रं अकर्मसुजुगुप्साह्रीर्यत्वदर्शनेह्रीः नलज्जामात्रं ४० गुणानैरपेक्ष्यं शोभनं नकिरीटादि दुःखसुखयोरत्ययः अतिक्रमः अन्नतुसुखा
नंसुखनभोगः विषयभोगापेक्षैवदुःखनापितराहादिबंधान्मोक्षंद्र्यवायोवेत्तिसपंडितः नविद्वन्मात्रं ४१ अहंबुद्धिरित्युपलक्षणंरे
हगेहादिष्वहंममेत्यभिमानवानूमूर्खइत्यर्थः मंनिगमः मामितरांगमयतिप्रापयतियोनिवृत्तिमार्गः सनुपंथाः सन्मार्गः नकंटकादिरहित्यः
चित्तविक्षेपः प्रवृत्तिमार्गः सउत्पथः कुमार्गः ननुवामाद्यकुलः सत्वगुणस्योदयः उद्रेकः स्वर्गः

तमसत्त्वाहउद्रेकः स नरकः नता मित्रादिः गुरुरेव बंधुर्नभ्रात्रादिः स चाहमेव यथाह जगद्गुरुः एक एव परो बंधुर्विषमे समुपस्थिते। गुरुः स
कलधर्मात्मा यश्चाकिंचनो गोहरिरिति स साधनं भोगाय तन्न गृहं। तत्त्वमानुष्यं मानुषदेहः शरीरमेव न हर्म्यादि। गुणैः संपन्नः आढ्य उ
च्यते न धनी ४३ असंतुष्टो यः स दरिद्रः न निःस्वः जो जितेंद्रियः स कृपणः न त्वर्थलोभी नदीनः विषयेष्वनासक्तधीर्यः स ईशः स्वतंत्रः न राजादि
गुणसंगः गुणेष्वासक्तोयस्य सः विपर्ययः अनीशः एवं शमादिविपर्ययो लक्षणार्थं ४४ उपसंहरति एत इति साधुमोक्षोपयोगितो
प
यापलक्षसर्वं गुणदोषयोर्विविकायो भवेन दृष्टभिन्नितयोः संक्षेपतो लक्षणमाह किं बहुना वर्णितेन गुणदोषयोर्लक्षणमेतावदेवाऽन्

नरकस्तम उन्नाहो बंधुर्गुरुरहं सखे॥ गृहं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते ४३ दरिद्रो यस्त्वसंतुष्टः कृपणो यो
जितेंद्रियः॥ गुणेष्वसक्तधीरीशो गुणसंगो विपर्ययः ४४ एत उद्धव ते प्रश्नाः सर्वे साधु निरूपिताः॥ किं वर्णितेन
बहुना लक्षणं गुणदोषयोः ४५ गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः ४५ ॥ ॥ इति श्रीभागवते महापु
राणे एकादशस्कंधे एकोनविंशोऽध्यायः॥ ॥१९॥ ॥ ॥ श्रीउद्धव उवाच॥ विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते॥
अवेक्षतेऽरविंदाक्ष गुण दोषं च कर्मणां १ वर्णाश्रमविकल्पं च प्रतिलोमानुलोमजं॥ द्रव्यदेशवयःकालान् स्वर्गं नरकमे
व च २ श्रीराम

गुणदोषदृशिर्दोषः गुणस्तु तदुभयदर्शनवर्जितः स्वभाव इति ४५ ॥ ॥ ॥ इत्येकादशे विंशतितमोऽध्यायः॥ ॥१९॥ ॥
तदाह गुणदोषयोर्दृशिर्दर्शनं दोषः गुणस्तु तदुभयदर्शनवर्जितः॥ गुणदोषव्यवस्थार्थमधिकारिविभागतः॥ गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः॥
विंशे योगत्रयं प्रोक्तं भक्तिज्ञानक्रियात्मकं॥ गुणदोषव्यवस्थार्थमधिकारिविभागतः॥ गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः॥
इत्युक्तं तदाक्षिपति विधिश्चेति पंचभिः विधिश्च प्रतिषेधश्चेति ईश्वरस्य तव आज्ञा निगमरूपो वेदः स च विधेयानां प्रतिषेध्यानां च
कर्मणां गुणदोषं च पुण्यपापफलरूपमवेक्षते १ उत्तमाधमभावेन तदधिकारिणां वर्णानामाश्रमाणां च विकल्पं भेदं च मुख्यादो
षरूपमवेक्षते। प्रतिलोमानुलोमजं च गुणदोषं तथैवावेक्षते। प्रतिलोमजाः उत्तमवर्णासु स्त्रीषु हीनवर्णेभ्यः पुरुषेभ्यो जाताः सू
तवैदेहकादयः अनुलोमजाः उत्तमवर्णेभ्यः पुरुषेभ्यो हीनवर्णासु स्त्रीषु जातास्तान् मूर्धावसिक्ताम्बष्ठादयः तेषां च भसत्तेन्तु वि
ज्ञेयाः प्रतिलोमानुलोमजा इति गुणदोषौ। द्रव्यादीन् कर्माहिता नहेतान् स्वर्गनरकं च तत्फलतया गुणदोषरूपमेवावेक्षते एत
च्चोत्तराध्याये प्रपंचयिष्यते २ श्रीरामायनमः

व

तथापि प्रस्तुतोक्तमायातं अत आह गुणदोषेति। गुणदोषदृशिर्दोष इति गुणदोषयोः निराकृतत्वात् गुणदोषभिदादृष्टिमन्तरेणानां
विना निषेधविधिलक्षणकर्मकाण्डे तव वचः कथं तन्न बुद्धते तरेण नृणां निःश्रेयसं कथं स्यात् तत्रापि श्रोतव्यो मन्तव्य इत्यादि सा
धनविषये। नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तदित्यादि निषेधस्य वावत्वयकृत्वादिति भावः। यद्वा गुणदोषभिदादृष्टिम
न्तरेण निषेधविधिलक्षणं तव वचो विनेति सामानाधिकरण्यमेवास्तु। यद्वा गुणदोषभिदादृष्टिमन्तरेण निषेधविधिलक्षणम
पि वचः कथं नु तत्त्वमस्यादिवाक्यवत् निःश्रेयसपरं स्यात् सर्वस्य वेदस्य तत्परत्वाभावादित्यर्थः २ ननु पितरो देवा ऋषयः सर्वे
षाः प्रत्यक्षतो दृष्टा मनुष्येभ्यः कथं विद्ध्येति नेत्याह पित्रादीनां सर्वेषां तव त्वद्वाक्यरूपो वेद एव तु श्रेयः श्रेष्ठं चक्षुः प्रमापकं। ६ अन

गुणदोषभिदादृष्टिमन्तरेण वचस्तव ॥ निःश्रेयसं कथं नृणां निषेधविधिलक्षणम् २ पितृदेवमनुष्याणां वेद
श्चक्षुस्तवेश्वर ॥ श्रेयस्त्वनुपलब्धेऽर्थे साध्यसाधनयोरपि ४ गुणदोषभिदादृष्टिर्निगमात्ते न हि स्व
तः ॥ निगमेनापवादश्च भिदाया इति ह भ्रमः ५ श्रीभगवानुवाच। योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधि
त्सया ॥ ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ६ निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु ॥ तेष्वनिर्विण्ण

पलब्धेऽर्थे मोक्षे स्वर्गादौ वा तथा साध्यसाधनयोः इदमस्य साध्यं इदमस्य साधनमित्यत्रापि। तदेवं गुणदोषदृष्ट्यभावे निःश्रेयसं
न घटते ४ किं च शास्त्रेणैव विहिता भेददृष्टिर्न स्वतः एवं च विषये शास्त्रं कथं निवर्तयेदित्याह नेति निगमात्त्वत्तो वेदात्मरूपाद्धेतोरेव न हि
स्वतः यस्मादर्थप्राप्तत्वेन निवर्तेत तदस्फुरं भ्रमो भवति ते निवर्तयेति शेषः ५ विषयाभेदेऽप्यधिकारिभेदेनाविरोधं वक्तुं प्रथमं योगत्रयमा
ह योगा इति योगा उपायाः श्रेयस्कर्मदेवताकेदे प्रोक्ताः कर्मचनिश्रा मे श्रेयोविधित्सया मोक्षसाधनेच्छया अन्यस्तु उपायो नास्तीति का
म्यकर्मादिके व्यावर्तयति। तत्र यथा यो त्रयाणां व्यवस्था स्फुटीकरिष्यतीति यदेतान्नित्यादीनां अत एव तत्साधनभूतकर्मन्यासिनां सा न योगः सिद्धि
। ६ ॥ तेष्वधिकारिभेदमाह निर्विण्णानामिति द्वाभ्यां इह एषां मध्ये कर्मसु निर्विण्णानां दुःखबुद्ध्या तत्फलेषु विरक्तानां ×

कर्मयोगस्तु कामिनां

इत्युत्तरेणान्वयः अनिर्विण्णचित्तानां दुःखबुद्धिरहितानां अत कामिनां तत्फलेष्वविरक्तानामित्यर्थः ९ श्रीरामाय नमः

यदृच्छयाकेनापिभाग्योदयेन ॥ तत्रकाम्यकर्मसुप्रवर्तमानस्यसर्वात्मनाविधिप्रतिषेधाधिकारइत्युत्तराध्यायेवक्ष्यतिनिष्का
मकर्मयोगाधिकारिणस्तुयथाशक्तिसर्वज्ञानभक्तियोगाधिकारात्प्रागेव। तदधिकृतयोस्तुस्वल्पःताभ्यांसिद्धानांतुनकिंचि
दिति। ८ सावधिकर्मयोगमाह तावदिति नर्यभिः कर्माणिनित्यनैमित्तिकानियावतायावद्वा ९ कर्मयोगिनोज्ञानभक्तिभ्याम
कारोहप्रकारमाह स्वधर्मस्थइतिअनाशीःकामःअफलकामःअन्यत्तन्निषिद्धंनरकयानंहिदुष्टैवविहितानिकर्माण्यनिषिद्धाव
रणाद्वा। अतःस्वधर्मस्थत्वान्निषिद्धवर्जनाच्चनरकंनयातिअफलकामत्वान्नस्वर्गमपीत्यर्थः १० किंतुअस्मिंल्लो[illegible]

[illegible] यदृच्छयामत्कथादौजा
तश्रद्धस्तुयःपुमान्॥ननिर्विण्णोनातिसक्तोभक्तियोगोस्यसिद्धिदः ८ तावत्कर्माणिकुर्वीतननिर्विद्येतया
वता॥मत्कथाश्रवणादौवाश्रद्धायावन्नजायते ९ स्वधर्मस्थोयजन्यज्ञैरनाशीःकामउद्धव॥नयातिस्वर्ग
नरकौयद्यन्यन्नसमाचरेत् १० अस्मिंल्लोकेवर्तमानःस्वधर्मस्थोनघःशुचिः॥ज्ञानंविशुद्धमाप्नोतिमद्भक्तिंवा
यदृच्छया ११ स्वर्गिणोप्येतमिच्छंतिलोकंनिरयिणस्तथा॥साधकंज्ञानभक्तिभ्यामुभयंतदसाधकं १२ ननरः
स्वर्गतिंकांक्षेन्नारकींवाविचक्षणः॥नेमंलोकंचकांक्षेतदेहावेशात्प्रमाद्यति १३

केअस्मिन्नेवदेहे अनघःनिषिद्धत्यागीअतःशुचिःनिवृत्तरागादिमलःयदृच्छयेतिकेवलज्ञानादपिभक्तेर्दुर्लभतांद्योतयति ११
अनेनप्रकारेणज्ञानभक्तिसाधनत्वान्नरदेहंस्तौति।स्वर्गिणोपीति।निरयिणइतिदृष्टांतत्वेनोक्तं।ज्ञानभक्तिभ्यांज्ञानभक्त्योर्वे
तदुभयंस्वर्गिनारकिशरीरं १२ अतोनरःस्वर्गतिंनकांक्षेत्नारकिमितिदृष्टांतःयद्वास्वर्गनरकसाधनकर्माणिनकुर्यादित्य
र्थः।अस्मात्स्विष्टत्वात्पुनरपिमनुष्योभवेयमित्यपिनकांक्षेत।यतोदेहावेशात्तद्देहासक्त्यास्वार्थेप्रमाद्यतिअवधानरहितोभवति १३

अपि तु एतद्देहं साधकमिति विद्वान् तत्त्वार्थसिद्धिः यथा मर्त्यं ज्ञात्वा अप्रमत्तः अनलसः सन् मृत्योः पूर्वमेव मोक्षाय घटेत यत्नं
कुर्यात् १४ अप्रमत्तो मुक्तसंगः सुखं प्राप्नोतीत्यत्र दृष्टान्तः छिद्यमानमिति। यमैर्यमवज्जिद्यैः पुरुषैः कृत्तं नीडं यस्मिन् तं स्वकेतं
त्यक्त्वा आश्रयं अलंपटः अनासक्तः १५ दार्ष्टान्तिकमाह अहोरात्रैः छिद्यमानमायुर्बुद्ध्वा भयेन वेपथुः कंपो यस्य सः १६ एवमप्र
यतमानं प्रमत्तमिति। नरदेहस्य चैनाव प्राप्यत्वं तत्साधनं यस्य द्वा आद्यं निनत्तरे त्सआत्महा। तत्र हेतवः आद्यं सर्वफलानां मूलं एतत्
दुष्प्राप्यं जितकर्मभिः सर्वप्राप्तेः किं चासुदुर्लभं उद्यमकोटिभिरपि प्राप्तुमशक्यं। तथापि सुसुलभं यदृच्छालब्धत्वात् सुकल्पं

एतद्विद्वानुद मृत्योरभवाय घटेत सः॥ अप्रमत्त इदं ज्ञात्वा मर्त्यमप्यर्थसिद्धिदं १४ छिद्यमानं यमैरेतैः कृत
नीडं वनस्पतिं॥ खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलंपटः १५ अहोरात्रैश्छिद्यमानं बुद्ध्वायुर्भयवेपथुः॥
मुक्तसंगः परं बुद्ध्वा निरीह उपशाम्यति १६ नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं॥ मयानुकू
लेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महा १७ यदारंभेषु निर्विण्णो विरक्तः संयतेन्द्रियः॥ अभ्यासेना
त्मनो योगी धारयेदचलं मनः १८ धार्यमाणं मनो यर्हि भ्राम्यदाश्वनवस्थितं॥ अतन्द्रितोऽनुरोधेन मार्गेण आत्मवशं
नयेत् १९ मनोगतिं न विसृजेज्जितप्राणो जितेन्द्रियः॥ सत्त्वसंपन्नया बुद्ध्या मन आत्मवशं नयेत् २०

परतरं किं च गुरुः सेवितमात्र एव कर्णधारो नेता यस्य तं मया च अस्मदनुमात्रेणानुकूलमारुतेन प्रेरितं १७ पूर्वेनावरविरक्तस्य वैराग्यद्वारा
योगाभ्यासि साधकं कर्मयोगमुक्त्वेदानीं सम्यग्विरक्तस्य ज्ञानयोगं तस्य च ज्ञानप्राप्तेः पूर्वं किंचित्कृत्यं वर्जनीयं चाह सार्धैर्नवभिः यदा तु
आरंभेषु कर्मसु निर्विण्णः दुःखदर्शनेनोद्विग्नः तत्फलेषु विरक्तश्च तदा संयतेन्द्रियः सन् आत्मनोऽभ्यासेन आत्मविषयवृत्तिसंतत्या अचलं
यथा भवति तथा मनो धारयेत् १८ तत्र प्रथममेवात्यंतधारणासंभवात् तत्स्वभावानुसारेण वशीकरणमाह यर्हि आशु भ्राम्यत्सदि
अनवस्थितं भवति तदा अनुरोधेनाकं विरयस्याप्रणद्वारेण १९ ननु तर्हि यथापूर्वमेवस्यात्तत्राह मनोगतिं नाविसृजेत् नापेक्षे

न किंतु अप्रमत्तः सन् लभसे इत्यर्थः २० श्रीरामायनमः॥

भा॰प॰

६१

अनुरोधमार्गं सदृष्टांतमाह एवमिति एष अनुवृत्तिमार्गेण मनसः संग्रहः परमो योगः तत्साधनत्वात् उपचारेणमुक्तिः । यथा अदांतस्य द
मनीयस्य अर्वतः अश्वस्य हृदयज्ञत्वं स्वाभिप्रायेण गमिष्यामि इच्छन् अपेक्षमाणः अश्वधारकः प्रथमं किंचित्तद्गतिमनुवर्तते तदा
न रश्मिनाततेधृत्वैव गछति न तु पेक्षते तद्वदित्यर्थः २१ एवमाबद्धशीलस्य मनसोऽत्यंतनैश्चल्योपायानाह । सांख्येनेति त्रिभिः
सांख्येन तत्त्वविवेकेन सर्वभावानां महदादिदेहांतानां अनुलोमतः प्रकृत्यादिक्रमेण भवं प्रतिलोमतः पृथिव्यादिक्रमेणाप्य
यं च अन्वनुध्यायेत् प्रसीदति निश्चलं भवति २२ ननु पापस्य हस्तेरणापि मनो विषयाकारतां न त्यजति किं भयो भये उपदेशो
नेति तत्राह निर्विण्णेति तत्स्वाश्रममात्मापि पितृतेष्वव धिष्ठितात्मदर्शनात्तद विवेकात्पन्नसंसारनिर्विण्णस्य अतो विरक्तस्य

एष वै परमो योगो मनसः संग्रहः स्मृतः ॥ हृदयज्ञत्वमन्विच्छन् दम्यस्येवार्वतो मुहुः २१ सांख्येन सर्वभावानां प्रति
लोमानुलोमतः ॥ भवाप्ययावनुध्यायेन्मनो यावत्प्रसीदति २२ निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः ॥
मनस्त्यजति दौरात्म्यं चिंतितस्यानुचिंतया २३ यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया ॥ ममार्चोपासना
भिर्वा नान्यैर्योग्यं स्मरेन्मनः २४ यदि कुर्यात्प्रमादेन योगी कर्म विगर्हितं ॥ योगेनैव दहेदंहो नान्यत्तत्र कदाचन

ततश्च उक्तवेदिनः गुरूपदिष्टार्थावलोकस्य ततो गुरूपदिष्टस्यैव चिंतितस्य पुनःपुनरनुचिंतया दौरात्म्यं देहाद्यभिमानं त्यज
ति २३ तत्र हेतुः किं यमादिभिर्योगमार्गैः आन्वीक्षिक्या यद्वा तत्त्वार्थ शोधनेन ममार्चनध्यानादिभिर्वा नान्यैः नास्य प्रश
स्यत्वात्तैर्दर्शयति एते रूपाये योग्यं परमात्मानं मनः स्मरेत् नान्यैः अतो न्यं न कुर्यादित्यर्थः २४ ननु पापा य तो प्रा
यश्चित्तं कार्यमेव तत्राह यदीति । योगेन ज्ञानाभ्यासेनैव एतद् भक्तस्यापि नामकीर्तनाद्युपलक्षणार्थं नान्यत् कृच्छ्रादि २५ ॥

राम
६१

ननु नित्यनैमित्तिकं कर्म सत्त्वशोधकत्वाद्गुणः हिंसादिकं त्वशुद्धिहेतुत्वाद्दोषः। तत्रैवानुवर्तनं कत्वात्कृच्छ्रादिप्रायश्चित्तं तु गुण इति विधि

प्रतिषेधाभ्यां गुरुत्वान्नाप्रायश्चित्तं विना योगेनैव कथं पापं दहेत् तत्राह स्वे स्व इति सार्धेन स एव गुणः नेतरः तदुपपादयति। यस्मा

द्विधिप्रतिषेधाभ्यामनेन गुणदोषविधानेन कर्मणां नियमः संकोचः कृतः कुतस्त्यत आह। जात्या उत्पत्त्यैवाशुद्धानां स च प्रा

प्तानां संगानां त्याजनेच्छया अयं भावः पुरुषस्याशुद्धिर्नाम न प्रवृत्तेरन्यास्ति स्वाभाविकप्रवृत्त्यैव तस्य मलिनत्वात्। न चैव सहसा स

र्वतो निवृत्तिः कर्तुं शक्यते अत इदं न कर्तव्यं इदमेव कर्तव्यमिति स्वाभाविकप्रवृत्तिसंकोचद्वारेण निवृत्तिरेव क्रियते। यथा च न

प्रवृत्तिपरो वेदस्तथोत्तराध्याये वक्ष्यामः उत्पत्त्यैव हि कामेष्वित्यादिना। अतो योगिनः स्वाभाविकप्रवृत्त्यभावात् न प्रायश्चित्तादि

विधिगोचरतेति २६ भक्त्यधिकारिणो भक्तियोगमाह जातश्रद्ध इति त्रिभिः मत्कथासु जातश्रद्धः अतएवान्येषु कर्मसु उद्विग्नः

स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः॥ कर्मणां जात्यशुद्धानामनेन नियमः कृतः २६ गुणदोषविधानेन संगा

नां त्याजनेच्छया॥ जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु वेद दुःखात्मकान्कामान्परित्यागेऽप्यनीश्वरः॥ ततो भ २८

२९ जेत मां प्रीतः श्रद्धालुर्दृढनिश्चयः २७ जुषमाणश्च तान्कामान्दुःखोदर्कांश्च गर्हयन्॥ प्रोक्तेन भक्तियोगेन भजतो मासकृ

२८ न्मुनेः २८ कामा हृदय्या नश्यन्ति सर्वे मयि हृदि स्थिते॥ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ३० क्षीयन्ते चास्य कर्मा

३० ननु तत्फलेषु विरक्तः तत्राह वेदेति यद्यपि णि मयि दृष्टेऽखिलात्मनि॥ तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः॥ न ज्ञानं न च वैराग्यं प्रायः

वेद तथापि परित्यागेऽनीश्वरः अशक्तः एवंभूतोऽयं श्रद्धालुः भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयः सन् ततः तदनन्तरं मां प्रीत्या भ

जेत २७ विषयांस्तु सेवमानोऽपि तेषु प्रीतिं न कुर्यादित्याह गर्हयन्निति २८ कथं भजेत किं वा ततो भवति तत्राह प्रोक्तेनेति द्वाभ्यां अभ्या

मत्कथायामेव श्रवणस्मरणकीर्तनमित्यादिना तेन प्रोक्तेन मां असकृत् नित्यं भजतः हृदय्याः हृदि स्थिताः कामाः नश्यन्ति २९ हृदयमेव

ग्रन्थिरहंकारः तन्नाशकारणश्च सर्वसंशयाः असंभावनादयः कर्माण्यनारब्धफलानि संसारहेतुभूतानि ३० तदेवं व्यवस्थायाधिकारत्र

यमुक्तं। तत्र च भक्तेरन्यनिरपेक्षत्वात्सर्वस्य बलत्वाद्भक्तियोग एव श्रेष्ठ इत्युपसंहरति तस्मादिति त्रिभिः मदात्मनः मयि आत्मा चित्तं यस्य

तस्य श्रेयःसाधनं ३१

ननु नित्यनैमित्तिके कर्मसत्वशोधकत्वाद्गुणः हिंसादिकं त्वशुद्धिहेतुत्वाद्दोषः। तत्र तत्र वर्णानुवर्तकत्वात्कृच्छ्रादिप्रायश्चित्तं तु गुण इति विधि
प्रतिषेधाभ्यामुक्तत्वात्प्रायश्चित्तं विना योगेनैव कथं पापदहनं तत्राह स्वे स्वे इति सार्धेन स एव गुणः नेतरः तदुपपादयति। यस्मा
द्विधिप्रतिषेधाभ्यामनेन गुणदोषविधानेन कर्मणां नियमः संकोचः कृतः कुत इत्यत आह। जात्या उत्पत्त्यैवाशुद्धानां स च प्रा
प्तानां संगानां त्याजनेच्छया अयं भावः पुरुषस्याशुद्धिर्नाम न प्रवृत्तेरन्यास्ति स्वाभाविकप्रवृत्त्यैव तस्य मलिनत्वात्। न च सहसा स
र्वतो निवृत्तिः कर्तुं शक्यते अत इदं न कर्तव्यं इदमेव कर्तव्यमिति स्वाभाविकप्रवृत्तिसंकोचद्वारेण निवृत्तिरेव क्रियते। यदा च न
प्रवृत्तिपरो वेदस्तथोत्तराध्याये वक्ष्यामः उत्पत्त्यैव हि कामेष्वित्यादिना अतो योगिनः स्वाभाविकप्रवृत्त्यभावान्न प्रायश्चित्तादि
विधिगोचरतेति २६ भक्त्यधिकारिणो भक्तियोगमाह जातश्रद्ध इति नवभिः मत्कथासु जातश्रद्धः अनएवान्येषु कर्मसु दुःखः

स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः॥ कर्मणां जात्यशुद्धानामनेन नियमः कृतः २६ गुणदोषविधानेन संगा
२९ नां त्याजनेच्छया॥ जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु वेद दुःखात्मकान्कामान्परित्यागेऽप्यनीश्वरः॥ ततो भ २८
जेत मां प्रीतः श्रद्धालुर्दृढनिश्चयः २७ जुषमाणश्च तान्कामान्दुःखोदर्कांश्च गर्हयन्॥ प्रोक्तेन भक्तियोगेन भजतो मासकृ
२८ न्मुनेः २९ कामा हृदय्या नश्यन्ति सर्वे मयि हृदि स्थिते॥ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ३० क्षीयन्ते चास्य कर्मा
णि मयि दृष्टेऽखिलात्मनि॥ तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः॥ न ज्ञानं न च वैराग्यं प्रायः

२० ननु तत्फलेषु विरक्तः तदाह वेदेति यद्यपि
वेद तथापि परित्यागेऽनीश्वरः अशक्तः एवंभूतोऽयं श्रद्धालुः भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयः सन् ततः तदनन्तरं मां प्रीत्या भ
जेत २७ विषयांस्तु सेवमानोऽपि तेषु प्रीतिं न कुर्यादित्याह गर्हयन्निति २८ कथं भजेत किं वा ततो भवति तदाह प्रोक्तेनेति द्वाभ्यां श्रव
मत्कथायामे श्रद्धेत्यमृतकथा श्रवणमित्यादिना तेन उक्तेन मां असकृन्नित्यं भजतः हृदय्याः हृद्गताः कामाः नश्यन्ति २९ हृदयमेव
ग्रन्थिरहंकारः तत्सर्वकार्य सर्वसंशयाः असंभावनादयः कर्माण्यनारब्धफलानि संसारहेतुभूतानि ३० तदेवं व्यवस्थयाधिकारत्र
यमुक्तं। तत्र च भक्तेरन्यनिरपेक्षत्वादस्य स्वतन्त्रत्वाद्भक्तियोग एव श्रेष्ठ इत्युपसंहरति तस्मादिति त्रिभिः मदात्मनः मयि आत्मा चित्तं यस्य
तस्य श्रेयःसाधनं ३१

भा॰प॰

६२ तत्रहेतुःयत्कर्मभिरित्यादि।३।इतरैरपितीर्थयात्राव्रतादिभिःश्रेयःसाधनैर्यद्यद्भाव्यंसत्वशुद्ध्यादितत्सर्वं ३२ तत्सर्वंअंजसाअ
नायासेनैव।स्वर्गमपवर्गंमद्धामवैकुंठंलभतएव।वांछातुनास्तीत्युक्तं।यदिवांछतीति ३३ तत्रहेतुमाह नकिंचिदिति।धी
राःधीमंतःयतोममएकांतिनःमय्येवप्रीतियुक्ताः।अतोमयादत्तमपिनगृह्णंति किंवक्तव्यंनवांछंतीत्यर्थः।अपुनर्भवंआ
त्यंतिकमपिकैवल्यं ३४ तदुपपादयति नैरपेक्ष्यमेव परमुत्कृष्टं।अनल्पकंमहत् निःश्रेयसंफलं तत्साधनंचप्राहुः मेभ
क्तिःनिराशिषःप्रार्थनाशून्यस्यनिरपेक्षस्यप्रार्थनाकारणभूतापेक्षारहितस्यपुंसोभवेत्।यद्वानिरपेक्षस्ययाभक्तिःसा मे

यत्कर्मभिर्यत्तपसाज्ञानवैराग्यतश्चयत्॥योगेनदानधर्मेणश्रेयोभिरितरैरपि ३२ सर्वंमद्भक्तियोगेन
मद्भक्तोलभतेंजसा॥स्वर्गापवर्गंमद्धामकथंचिद्यदिवांछति ३३ नकिंचित्साधवोधीराभक्ताह्येकांतिनोमम॥
वांछंत्यपिमयादत्तंकैवल्यमपुनर्भवं ३४ नैरपेक्ष्यंपरंप्राहुर्निःश्रेयसमनल्पकं॥तस्मान्निराशिषोभक्ति
र्निरपेक्षस्यमेभवेत् ३५ नमय्येकांतभक्तानांगुणदोषोद्भवागुणाः॥साधूनांसमचित्तानांबुद्धेःपरमुपेयु
षां ३६ एवमेतान्मयादिष्टाननुतिष्ठंतिमेपथः॥क्षेमंविंदंतिमत्स्थानंयद्ब्रह्मपरमंविदुः ३७ ॥ ॥
॥ ॥इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविंशतितमोऽध्यायः॥ ॥ ॥छ॥श्रीरामाय॥ ॥ ॥

निराशिषोभवेदित्यर्थः ३५ अनेनवप्रकारेणसिद्धानांनगुणदोषाद्युत्थविरोधपरिहारमुपसंहरतिनमयीति।गुणदोषैर्वि
हितप्रतिषिद्धैरुद्भवायेषांतेगुणाःपुण्यपापादयःसाधूनांनिरस्तरागादीनांअतःसमचित्तानांअतएवबुद्धेःपरमीश्वरंप्रा राम
प्तानां ३६ काम्यकर्मनिष्ठांनिरिष्यन्नेतान्मुक्तिमार्गानुपसंहरति।एवमिति।मेपथःमत्प्राप्त्युपायान्अनुतिष्ठंतितेक्षेमंकालमा ६२
यादिरहितंममलोकंविंदंति।यत्परमंब्रह्मतद्विदुः ३७ ॥ ॥ ॥इतिश्रीभा॰म॰ए॰विंशतितमोध्यायः॥ ॥छ॥ ॥छ॥ ॥

॥जयति स्वपरानंदः परानंदैककेसरी। यत्पादपल्लवबलेनाभून्नः श्रीधरः सत्कृतिः कृती १ ईक्षं नाम्नि छायासंतः क्षमंतां मम
साहसं॥ मयाहि स्वीयबोधाय कृतमेतन्न सर्वतः २ एकविंशेऽक्रियाज्ञानभक्तिष्वनधिकारिणां। कर्मिणां द्रव्यदेशा
दिगुणदोषाः प्रपंचिताः॥ तदेवं गुणदोषव्यवस्थार्थं योगत्रयमुक्तं। तत्र ब्रह्मज्ञानभक्तिसिद्धानां न किंचिद्गुणदोषौ
साधकानां तु प्रथमतो निवृत्तकर्मनिष्ठानां [illegible] यथाशक्ति नित्यनैमित्तिकं कर्म सत्वशोधकत्वाद्गुणः नि
[illegible] तदकरणं विनिषिद्धकरणं च तन्मलीमसकरणत्वाद्दोषः। तन्निवर्तकत्वात्प्रायश्चित्तं
गुणो विशुद्धसत्वानां तु ज्ञानिनिष्ठानां ज्ञानाभ्यास एव सिद्धिहेतुत्वाद्गुणः। भक्तिनिष्ठानां पुनः श्रवणकीर्तना त
श्रीभगवानुवाच॥ य एतान्मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान्। क्षुद्रान्कामांश्चलैः प्राणैर्जुषंतः संसरं
ति ते १ स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः। विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः २ श्रीराम य
द्भक्तिरेव गुणः। तद्विरुद्धं सर्वमुभयेषां दोष इत्युक्तं। इदानीं ये तु न सिद्धा नापि साधकाः किंतु केवलं काम्यकर्म
प्रधानाः तेषां सकलगुणदोषान्प्रपंचयिष्यन्नादौ तानतिबहिर्मुखान्निंदति। य एतानिति। मत्पथः मद्दुक
मार्गान् क्षुद्रान्तुच्छान्। चलैः अस्थिरैः प्राणैर्देहवायुसिरिंद्रियैर्वा जुषंतः सेवमाना भवंति ते संसरंति निखिलगु
णदोषभाक्त्वेन नानायोनीः प्राप्नुवंतीत्यर्थः १ ननु तेषां कर्मसिः कुतः गुणदोषसाजः कैश्चिदिति कुतो वैषम्यं न ह्यग्नि
ना केचित्पत्तिके चिदेति संभवति। तत्राह। स्वे स्वे इति। अधिकारभेदेन कल्पितौ गुणदोषौ न वस्तुनिष्ठाविति भावः २

भा॰ए॰
६३

तदाह शुध्यशुधीति। विविक्तिः स्वार्थं योग्यमयोग्यं वेति संदेहद्वारा स्वाभाविकप्रवृत्तिप्रतिबंधार्थमित्यर्थः त ३
त्र शुध्यशुध्यी योग्यत्वायोग्यत्वे ॥ गुणदोषौ तन्निमित्तौ पादेयत्वानुपादेयत्वे शुभाशुभौ तन्निमित्तावर्थानर्थौ तत्र
शुध्यशुध्यी धर्मार्थं शुधेन धर्मः अशुधेनाधर्म इति गुणदोषौ व्यवहारार्थं अशुद्धावपि राजादीनां व्यवहारदर्शना
युपादेयं नाप्यदिति शुभाशुभौ यात्रार्थं देवातव्याप स्वशरीरनिर्वाहमात्रोपादानेनेषां अधिकोपादानेन तु पापमिति
मयाऽस्त्वादिस्वरूपेण धर्मरूपां धुरं सारं धर्मजउजनामित्यर्थः। ४ शुध्यशुध्यी प्रपंचयिष्यन् दोकसेन तदर्त्तिनिवेश्य

शुध्याशुधी विधीयते समानेष्वपि वस्तुषु। द्रव्यस्य विविक्तिः स्वार्थं गुणदोषौ शुभाशुभौ २ धर्मार्थं व्यव
हारार्थं यात्रार्थमिति चानघ। दर्शितोऽयं मया चारो धर्ममुद्वहतां धुरं। ४ भूम्यंबुग्न्यनिलाकाशा भूतानां
पंचधातवः। आब्रह्मस्थावरादीनां शारीरा आत्मसंयुताः ५ वेदेन नामरूपाणि विषमाणि समेष्वपि।
धातुषूद्धव कल्प्यंत एतेषां स्वार्थसिद्धये ॥ ६ देशकालादिभावानां वस्तूनां मम सत्तम। गुणदोषौ विधीय
तेनियमार्थं हि कर्मणां ७

माहरदिति समानेष्वपि वस्तुष्विति यदुक्तं तस्य पंचयति। भूमीति त्रिभिः। भूतानां प्राणिनां धारयंतीति
धातवः कारणानि शारीराः शरीरारंभकाः। देहतः साम्यमुक्तं जीवतोऽप्याह आत्मसंयुता इति ५ धातुषु देहेषु ना
मरूपाणि वर्णाश्रमादीनि। कल्पनायाः प्रयोजनमाह। एतेषां प्राणिनां स्वार्थसिद्धये इति नियमेन स्वधर्मादि ये
पुरुषार्थसिद्धये ६ न केवलं देहेष्वेव अपितु देशकालादिभावानामपि। आदिशब्देनानुपादेयानां फलनिमित्ताधि राम
कारिणां ग्रहणं। वस्तूनां उपादेयानां व्रीह्यादीनामपि मम मया नियमार्थं संकोचार्थमित्यर्थः ७ श्रीरामजयराम श्री ६३
र्थ

एवंगुणदोषविवेकं परिशोध्यतयोः शुध्यशुधिमूलत्वात् शुध्यशुधी प्रपंचयति अरुणसार इत्यष्टभिः देशो
नामध्ये रुरुहरिणरहितोऽशुचिः तत्रापि अरण्य आश्रमपत्तनेक्षेत्रेभ्यो अत्यंतमशुचिः कृष्णसारो पिलशेनम्र
गनसारः अश्लोयः सोपि असौवीरः कीकटसुवीराः सत्पुरुषाः तद्युक्तसौवीरः कीकटोपि शुचिः तद्युक्तासर्वपुण्य
तमोदेशः सत्पात्रं यत्र लभ्यत इति। तदुक्तं तीर्थे कीकटः अंगवंगकलिंगादिः असंस्कारसोमार्जनादिभ्रष्टम्लेछ
बहुलो वा ईरिणं ऊषरं एकवद्भावः तत्र अशुचित्वं दन्यः शुचिरित्यर्थः दुर्लभं भवति ८ कालस्य शुध्यशुधी दर्शय
ति। कर्मत्त्वय इति द्रिव्यतः द्रव्यसंपत्या स्वतो वा सर्वाण्हादि दिर्घः कर्मण्यः कर्मार्हः सकालस्तस्मिन् कर्म गिगुणवान् यत

अरुणसारो देशानामशुचिः अरण्ये शुचिर्भवेत्। कृष्णसारोप्यसौवीर कीकटासंस्कृतेरिणं ८ कर्म
णयोग्यः यावान् कालो द्रव्यतः स्वत एव वा। यत्नोनिवर्तते कर्म स दोषाः कर्मकः स्मृतः ९ द्रव्यस्य शुध्य
शुधीवद्द्रव्येण वचनेन वा। संस्कारेणाथ कालेन महता ल्पतया थवा १० श्रीरामजयराम श्रीराम

यस्मिन् द्रव्यालाभेन वा राष्ट्रविप्लवादिना वा कर्म निवर्तते यश्चस्स तकालो दोषः शाहादिलक्षणो कर्मकः कर्मानर्हः स्व
तः स कालो दोष अशुध इत्यर्थः ९ वस्तुशोध्येषां नानाद्रव्याणां शुध्यशुधी दर्शयति द्रव्यस्येति चतुर्भिः द्रव्येण
तोयादिना अशुधिः स्त्र्यादिना च शुधिः वचनेन शुधमशुधं वेति संदेहे शुधमित्येवं रूपेण ब्राह्मणवचनेन शुधिः
विपरीते नाशुधिः संस्कारेण प्रोक्षणादिना पुष्पादेः शुधिः अवघ्राणादिना च शुधिः कालेन दशाहादिना नव
दकादेः शुधिः विपरीते नाशुधिः काले मेघोदकं ग्राह्यं वर्ज्यं तु त्र्यहमेव हि। अकाले दशरात्रं स्यात्ततः शुधिर्वि
धीयते पर्युषितान्नादेः शुधिः। अंत्यजाद्युपहतानां तडागादुदकानां महता ल्पलाभ्यां शुध्यशुधी १० श्रीराम

भा॰ष॰
६४

शक्त्याशक्त्योर्यथा रोगादिष्वतत्कालवादेः शक्त्या स्वल्पशुद्धिः अशक्त्या अतिशुद्धिः बुद्ध्या पुत्रजन्मादौ दशाहादूर्ध्वं ज्ञानेन शु
द्धिः अंतर्ज्ञानेन। अशुद्धिः समृद्ध्या जीर्णमलवस्त्रादेः समृद्धस्य अल्पशुद्धिः दरिद्रस्य अतिशुद्धिः तत्रापि विशेषमाह यदिति।
एतच्च द्रव्यवचनाद्यात् द्रव्याशुद्धिद्वारा आत्मने यदघं कुर्वंति। तच्चावस्थानुसारत एव यथायथावद्धं कुर्वंति न सर्वतः।
तथा हि निर्भय एव देशे कुर्वंति न तु चोराद्याकुले तथा रोगादिव्याप्तिरहितयुवाद्यवस्थायामेव कुर्वंति न बाल्यरोगाद्यव
स्थायामिति। तथा वस्तुतिः देशकालतथा मानद्रव्यद्रव्यप्रयोजनं उपपत्तिमवस्थां च दृष्ट्वा दोषं प्रकल्पयेदिति
१२ द्रव्यादिभिर्द्रव्यस्य शुद्धिरित्युक्तं तत्र वचनादि शुद्धिरेकरूपैव द्रव्यतस्तु शुद्धिर्बहुरूपेति तं प्रपंचयति। धान्ये

शक्त्याशक्त्याथवा बुद्ध्या समृद्ध्या च यदात्मने। अघं कुर्वंति हि यथा देशावस्थानुसारतः ११ धान्यदार्व
स्थितंतूनां रसतैजसचर्मणां। कालवाय्वग्निमृत्तोयैः पार्थिवानां युतायुतैः। १२ अमेध्यलिप्तं यद्येन गंध
लेपं व्यपोहति। भजते प्रकृतिं तस्य तच्छौचं तावदिष्यते १३

नि। दारु लौकिकं यद्दूनमस्थि च। आस्थिगजदंतादि। रसाः तैललवणादयः तैजसाः सुवर्णादयस्तेषां पार्थिवानां स्वर
ध्याकूर्द्धमघटेष्टकादीनां यथासंभवं कालादिभिः शुद्धिः। तत्रापि काकास्यन्नाद्युपघाततारतम्येन देशकालावस्थाद्य
नुसारेण च एतैरन्यैश्च युतायुतैर्मिलितैः केवलैश्च कालस्य पुनर्ग्रहणं युतत्वप्रदर्शनार्थं १२ अस्पृश्यस्पर्शे शुद्धि
मुक्त्वा लेपविषयेप्याह। यद्व्रापीट पात्रवस्त्रादि येन तक्षणक्षाराम्लोदकादिना गंधं च लेपं च व्यपोहति त्यजति
स्वगतं च मलं त्यजति। प्रकृतिस्थमेव रूपं भजते। तस्य तच्छौचं शौचं। यावत्तावत्तक्षणादिना व्यपोहति तावत्प्रमा
णं स्वरूपनश्यति तो वा तत्कर्तव्यमिष्यते १३ श्री

राम
६४

एवंता वन्द्रव्य शुद्धिरुक्ता ॥ इदानीं कर्तृशुद्धिमाह स्नानेति । अवस्थाकौमारादिर्वीर्यं शक्तिः संस्कार उपन
यनादिः कर्मसंध्योपासना दीक्षादिलक्षणं । आत्मनः साहमस्य कर्तुः एतैः स्नानादिभिर्यथायथं त
त्कार्यानुसरणी शुद्धिः । इयं च शुद्धिर्न व्यवहारार्था । किंतु विहित तत्कर्मार्थं स्यादित्याह शुध्यतीति । द्विज इत्युपलक्षणं त्र
ह्मादिरपि । १४ मन्त्रशुद्धिमाह । सदुरुमुखाद्यथावत्परिज्ञानं मन्त्रस्य शुद्धिः । कर्मशुद्धिमाह ईश्वरार्पणं कर्मणः
शुद्धिः । धर्मोद्यर्थं शुध्यशुध्योः प्रपञ्चः प्रदर्श्योपसंहरति धर्म इति देशकालद्रव्यकर्तृमन्त्रकर्मभिः षड्भिः शुद्धै
र्धर्मः संपद्यते । एतेषां यो विपर्ययः सोऽधर्मस्तद्धेतुरित्यर्थः । १५ अयं च गुणदोषविभागो नवास्तव इत्याह क्वचिदि

स्नानदानतपोवस्थावीर्यसंस्कारकर्मभिः । मत्स्मृत्या चात्मनः शौचं शुद्धः कर्माचरेद्द्विजः १४ मं
त्रस्य च परिज्ञानं कर्मशुद्धिर्मदर्पणं । धर्मः संपद्यते षड्भिरधर्मस्तु विपर्ययः । १५ क्वचिद्गुणोऽपि
दोषः स्याद्दोषोऽपि विधिना गुणः । गुणदोषार्थनियमस्तद्भिदामेव बाधते १६ समानकर्माचर
णं पतितानां न पातकं । औत्पत्तिको गुणः सङ्गो न शयानः पतत्यधः १७ श्रीरामजयरामजयजयराम

दिति । आपदि प्रतिग्रहो गुणो व्यनापदि निषिद्धत्वाद्दोषः परधर्मश्च परस्य गुणोऽपि स्वस्य दोषः दोषोऽपि कुटुंब्या
गादिर्विरक्तादेर्न दोषः अपितु विधिबलेन गुणः । एवं योऽयं गुणदोषयोः क्वचिन्नार्थनियमः गुणदोषार्थं वा युनियं
त्वा मः । नियामकशास्त्रं संततयोर्भेदमेव बाधते १६ दोषस्य क्वचिद्दोषाभावे गुणत्वे वोदाहरणं दर्शयति समानस्य तस्यैव क
र्मणः सुरापानादेराचरणं अपतितानां पतनहेतुरपि ज्ञात्या कर्मणा वा पतितानां पुनः पातकं आधिकारत्वेन शक्तस्य बतिस
र्वमेव पतितत्वात् अतोऽत्र दोषस्यापि दोषत्वं नास्तीत्यर्थः । तथा संगोऽपि यो यते दोषः स गृहस्थस्यौत्पत्तिकः स्वर्णस्त्रीकृतो न दोषः

अपितु गुणः कृतो भार्यासु पेयादि निषिद्धानां तत्र भयत्र दृष्टांतः
सर्वमेवाधः शयानो यथा न पतनीति १७

भा॰ए॰

६५ ते

टीका

अतोगुणदोषनियमविधीनांप्रवृत्तिसंकोचद्वारानिवृत्तावेवतात्पर्यमित्यभिप्रेत्याह।यतोयतइति१८ यथाश्रुतप्र

वृत्तिपरतांवेदस्यनिराकर्तुंप्रवृत्तिमार्गस्यानर्थहेतुतांदर्शयति।विषयेष्वितिचतुर्भिः।प्रथमंविषयेगुणाध्यासोनिर पु

मणीयताबुद्धिस्ततस्तेषुसंगः आसक्तिः ततस्तेषुविषयेषु येनप्रतिहन्यतेकामः तेनसहक्रमादेवकलिः कलहोविवा

दः१९ दुर्विषहः क्रोधः तमः संमोहः तेनक्रोधेनचेतनाकार्यस्मृतिः द्रुतंशीघ्रं२० शून्यायकल्पतेअसत्तुल्यो[illegible]भवतीत्य

र्थः स्वार्थविभ्रंशः पुरुषार्थहानिः मूर्छितस्यमृततुल्यस्य२१ ततुल्यत्वंप्रपंचयति।विषयेतिव्यर्थंवृक्षजीविकयेवयो

यतोयतोनिवर्त्तेतविमुच्येततस्ततः।एषधर्मोनृणांक्षेमःशोकमोहभयापहः१८ विषयेषुगुणाध्या

सात्पुंसःसंगस्ततोभवेत्।संगात्तत्रभवेत्कामःकामादेवकलिर्नृणां१९ कलेर्दुर्विषहःक्रोधस्तमस्त

मनुवर्तते।तमसाग्रस्यतेपुंसश्चेतनाव्यापिनीद्रुतं२० तयाविरहितःसाधोजंतुःशून्यायकल्पते॥

स्म ततोस्यस्वार्थविभ्रंशोमूर्छितस्यमृतस्यच२१ विषयाभिनिवेशेननात्मानंवेदनापरं।वृक्षजीविकयाजी

वन्व्यर्थंभस्त्रेवयःश्वसन्२२ फलश्रुतिरियंनृणांनश्रेयोरोचनंपरं।श्रेयोविवक्षयाप्रोक्तंयथाभैषज्यरोचनं२३

जीवन्वर्ततेसमूर्छिततुल्यः अतएवयोभस्त्रेवश्वसन्वर्ततेसमृततुल्यः।अतःस्वार्थनाशइत्यर्थः२२ ननुप्रवृत्तस्य

स्वर्गादिफलश्रवणात्कुतःस्वार्थविभ्रंशः तत्राहइयंफलश्रुतिः नश्रेयःपरमपुरुषार्थपरानभवतीत्यर्थः।किंतुबहिर्मुखा

नांनृणांमोक्षविवक्षया अवांतरफलैःकर्मसुरुच्युत्पादनमात्रंबहिर्मुखस्यतावदेवमार्गप्रवृत्तिर्भवतुइतिभावः।यथाभै राम

षज्येऔषधेरोचनंरुच्युत्पादनंतथाहि।पिबनिंबंप्रदास्यामिखलुतेखंडलड्डुकान्।पित्रैवमुक्तःपिबतिनफलंतावदेवतु२३ ६५

ननु कर्मकाण्डे मोक्षस्य नामापि न श्रूयते । कुत एवं व्याख्यायते । यथाश्रुतस्यापि घटनादित्याह । उत्पत्त्येति द्वाभ्यां । उत्पत्त्या
स्वभावत एव कामेषु पश्वादिषु प्राणेषु आयुरिन्द्रिय [illegible] बलवीर्यादिषु स्वजनेषु पुत्रादिषु अनर्थहेतुषु परि
णामे केवलं दुःखहेतुषु २४ अतस्तान्स्वार्थं परमसुखमविदुषः अतो न तानग्रहात्त्वता नु वेदाय बुध पिधत्ते इति तद्
वज्रेयदनीति विश्वसितान्नित्यर्थः तानेवं भूतान् वृजिनाध्वनि भ्रमवर्त्मनि देवादियोनिषु भ्राम्यतः ततः पुनः तमः वृक्षादियो
निं विशतः पशुकाम इति । आयुरिन्द्रियादिकाम इति व पुत्रकाम इति वा । कथं पुनस्तेष्वेव कामेषु स्वयं बुधो वेदो युञ्ज्यात् । प्रवर्त

उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु च । आसक्तमनसो मर्त्या आत्मनोऽनर्थहेतुषु २४ न तानविदुषः स्वार्थं भ्राम्य
तो वृजिनाध्वनि । कथं युञ्ज्यात्पुनस्तेषु तांस्तमो विशतो बुधः २५ एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः । फलश्रु
तिं कुसुमितां न वेदज्ञा वदन्ति हि २६ कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः । अग्निमुग्धा धूमतान्ताः स्वं लोकं
न विदन्ति ते २७ श्री

येत् । तथा सत्य नामः स्यादिति भावः २५ कथं तर्हि कर्ममीमांसकाः फलपरतां वदन्ति तत्राह । एवमिति । व्यवसितं वेदस्याभि
प्रायं । कुसुमितां अवान्तरफलश्रेण्या नयारमणीयां परमफलश्रुतिं वदन्ति । कुतस्ते कुबुद्धयस्तत्राह हि यस्मात् वेदज्ञा व्यासाद
यस्तथा न वदन्तीति २६ कुबुद्धितां प्रपञ्चयति । कामिन इत्यधिः । कामित्वात् कृपणाः ततो लुब्धाः व्याकुलाः अत पुष्पे
भि ष्ववान्तरफलेषु परमफलबुद्धयः । अत एव अग्निमुग्धाः अग्निसाध्यकर्मभिर्विक्षेपेन नष्टविवेकाः । ततश्च धूमतान्ताः धूमता
धूममार्गो तेयषां ते स्वं लोकं आत्मतत्त्वं न पश्यन्ति । कश्चिद्वा अस्माल्लोकात्प्रेत्य यज्ञात्मा न वेद अयमहमस्मीति कश्चि
त्स्वं लोकं न प्रतिप्रजानाति अग्निमुग्धो हैव धूमतान्तः इति २७ श्रीरामजयरामजयजयराम ॥ सदाशिवाय नमः श्री

भा·ए·

६६

कर्मसोस्वलोकः तमाहनेति। हृदिस्थमात्मानंमामस्वंलोकं। ननुहृदिस्थमहंकारस्यदंजानंत्येव। सत्यंपरमात्मानंतुन
जानंतीत्याह। यइदंयच्चातिस्थितं जगन्नास्तिकुतः यत्तइदंजगज्जातंतंकुतोनजानंति हियस्मादुक्थंकर्मैवशस्त्रंखेशं
स्यंरूपणीयंपशुहिंसासाधनंवायेषांते। अतःकेवलंअसुतृपः प्राणतर्पणपराः नीहारतमः तेनव्याप्तानिचक्षूंषि
येषांतेयथापार्श्वस्थितमपिनजानंतितद्वत्। तथाचश्रुतिः नतंविदाथयइमाजजानान्यद्युष्माकमंतरंबभूव। नीहारेणप्रा
२८ वृताजल्प्याचासुतृपउक्थशासश्चरंतीति तदत्तात्पर्यंयथाज्ञानान्नजानंतीत्याह तेपरोक्षमस्फुटंमेमतमविज्ञाय यद्देवादीन्यजंतइत्यु
त्तरेणान्वयः स्वमतमेवाह। हिंसायांमांसभक्षणार्थंतत्फलार्थंवायदिरागःस्यात्तर्हियज्ञएवेत्यपन्नुज्ञातद्वारापरिसंख्ययेनतात्पर्यं

नतेमामंगजानंतिहृदिस्थंयइदंयतः उक्थशस्त्राह्यसुतृपोयथानीहारचक्षुषः २८ तेमेमतमविज्ञायपरोक्षंवि
षयात्मकाः हिंसायांयदिरागःस्याद्यज्ञएवनचोदना २९ हिंसाविहाराह्यालब्धैःपशुभिःस्वसुखेच्छयायजंते
देवतायज्ञैःपितृभूतपतीन्खलाः ३० स्वप्नोपमममुंलोकमसंतंश्रवणप्रियं आशिषोहृदिसंकल्प्यत्यजंत्यर्थान्य
थावणिक् ३१ रजःसत्वतमोनिष्ठारजःसत्वतमोजुषः उपासतइंद्रमुख्यान्देवादीन्नतथैवमां ३२ श्रीराम

कलेनचोदनेत्येवंरूपंयथाविनित्यनैमित्तिकयोः कामविशेषानुबंधोनास्ति। तथापिकर्मणापितृलोकइतिश्रुतेः सामान्यतःपि
तृलोकःकामनास्त्येवेति अतःकरणान्तरंश्रियामानवर्धित्तिकाचःतदुक्तं। नाकामस्यक्रियाकाचिद्दृश्यतेनेहकर्हिचित्। यद्यद्धिकुरुतेजंतुस्तत्त
त्कामस्यचेष्टितमिति २९ अतस्तावदेवहिंसायाविहारःक्रीडायेषांते ३० किंच। तेनिमंदबुद्धयइत्याह। स्वप्नोपममिति। अमुंपरलोकं
के आशिषश्चास्मिल्लोके संकल्प्यनतुनिश्चित्यविधिवाक्यान्यपि स्वर्गादिअर्थान्कर्मसुविनियोजयंति। यथाकश्चिद्वणिक्कुडुसलरसमुद्रादि
लब्धनेनबहुधनार्जनेच्छयासिद्धंधनंत्यजन्नुभयभ्रष्टएवभवतितद्वदित्यर्थः। ३१ अतोरजःसत्वतमोजुषस्तद्गुणानुरूपानिंद्रादीनि
वोपासतेनतुमांयथायथावादीनामपिमैंश्वर्यंत्वदुपासनमेवतद्वत्। तथापियथावत्नोपासतेभेददर्शित्वादित्यर्थः ३२ श्रीराम

२

२ निष्ठास्तरजःसत्वतमो

राम

६६

हृदिसंकल्प्येत्युक्तं तमेव संकल्पं दर्शयति। इष्ट्वेति। तस्य भोगस्यांते महाशाला महागृहस्थाः। ३३ ततः
किमित्यत आह। एवमिति। अतो मम श्रवणवार्ता वा नास्तीत्येवं संसारिणो भवंतीति भावः ३४ तदेवं प्रवृ
त्तिपरत्वं निराकृत्य प्रकृतं निवृत्तिपरत्वमेवोपसंहरति। वेदा इति। कर्मब्रह्मदेवताकांडविषया इमे वे
दा ब्रह्मात्मविषयाः ब्रह्मैवात्मा न संसारीत्येतत्पराः तत्परत्वाप्रतीतौ च फलश्रुतिरियं नृणां श्रेयोरो

इष्ट्वेह देवता यज्ञैर्गत्वा रंस्यामहे दिवि। तस्यांत इह भूयास्म महाशाला महाकुलाः ३३ एवंपु
ष्पितया वाचा व्याक्षिप्तमनसां नृणां। मानिनां चातिस्तब्धानां मद्वार्तापि न रोचते ३४ वेदा
ब्रह्मात्मविषयास्त्रिकांडविषया इमे। परोक्षवादा ऋषयः परोक्षं मम च प्रियं ३५ श्रीराम

चनं परं। श्रेयो विवक्षया प्रोक्तं यथा भैषज्यरोचनमित्युक्तमेव कारणमनुस्मारयति परोक्षेति। ऋषयो मंत्राः।
तद्द्रष्टारो वा परोक्षवादाः अतींद्रियार्थप्रतिपादनपराः तत्तु परोक्षं ब्रह्म अत्यंतं मम प्रियं यथा तत्किमिति। य
तः परोक्षमेव मम च प्रियं। अयं भावः शुद्धांतःकरणैरेव तद्ब्रह्मत्वं नान्यैरनधिकारिभिः यथा कर्मत्यागेन
त्वंनाप्रसंगादिति ३५ श्रीराम जयराम जय जयराम वेंकटेशाय नमः वासुदेवाय नमः रामचंद्राय नमः

भा॰ए॰

६७ ननु वेदज्ञा अपि जैमिन्यादयः कर्मेति तथा न वर्णयंति मां विना तत्त्वतो वेदं तदर्थं वा न कोपि वेदेत्याशयेनाह। शब्दब्रह्मे-
ति। यतः स्वरूपतोर्थतश्च दुर्विज्ञेयं। तच्च सूक्ष्मं स्थूलं चेति द्विविधं। तत्र सूक्ष्मं तावत्स्वरूपतो दुर्विज्ञेयमित्याह। प्रा-
णेंद्रियमनोमयं प्रथमं प्राणमयं पराख्यं। ततो मनोमयं पश्यंत्याख्यं ततः इंद्रियमयं मध्यमाख्यं तस्य वाग्व्यंजक-
त्वेन वागिंद्रियप्रधानत्वात्। किंच अनंतपारं समष्टिप्राणादिमयस्य निर्विशेषस्य च तस्य कालतो देशतश्चापरिच्छे-
दात्। अर्थतोपि दुर्ज्ञेयत्वमाह। गंभीरं निगूढार्थं। अतो दुर्विगाह्यं न प्रतिवक्तुमर्हं। तथा च श्रुतिः चत्वारि वाक्परिमिता
पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंतीति। अयमर्थः।

शब्दब्रह्म सुदुर्बोधं प्राणेंद्रियमनोमयं। अनंतपारं गंभीरं दुर्विगाह्यं समुद्रवत् ३६ मयोपबृंहितं
भूम्ना ब्रह्मणानंतशक्तिना। भूतेषु घोषरूपेण बिसेषूर्णेव लक्ष्यते ३७ श्रीरामाय नमः श्रीराम

वाचः शब्दब्रह्मणः परिमितानि गणितानि तानि पद्यंते ज्ञायंते परं तत्त्वमेभिरिति पदानि रूपाणि चत्वारि। तानि चत्वार्यपि
ये मनीषिणो तद्दृष्टयः ते विदुर्नान्ये। यतो गुहायां देहमध्ये त्रीणि निहितानि नेंगयंति स्वरूपेण न प्रकाशयंति यत्तु केवलं वाचः
तुरीयं चतुर्थं भागं वैखरीरूपं मनुष्याः प्राणिनो वदंति। तमपि वदंत्येव न तु तत्त्वतो जानंति ३६ तत्र मनीषिभिरवगंतव्यं सूक्ष्म-
रूपं दर्शयति। मयेति। मयांतर्यामिणा परिबृंहितं अधिष्ठितं अनंतत्वे तस्य परिच्छेदमाह। भूम्नेति। अधिष्ठातृत्वे युक्तिमाह। ब्रह्मणा- राम
हा ब्रह्मणेति। अविकृतस्यापि नियंतृत्वं घटयति। अनंतशक्तिनेति। भूतेषु सर्वप्राणिषु घोषरूपेण अधिष्ठितं नादरू- ६७
पेणा लक्ष्यते मनीषिभिः। अंतः सूक्ष्मत्वेन दृष्टांतः। बिसे ऊर्णातंतुरिवेति ३७ श्रीरामजयराम जय जयराम श्री

ततो वैश्वर्यारव्यापाद्द हस्याचायउस्मनि प्रकारं सदृष्टांतमाह यथेति त्रिभिः हृदयाख्याकाशात् मुखात् मुखद्वारात् उद्वम
ते बहिः प्रकटयति दार्ष्टांतिके दर्शयति आकाशादिति प्राणः तदुपाधिर्हिरण्यगर्भरूपः प्रभुर्भगवान् तेन रूपेण ३८
छंदोमयो वेदमूर्तिः स्वतस्त्वमृतमयः घोषवान् नादरूपाद्दानवान् मनसा निमित्तेन निमित्ततामेव दर्शयति स्पर्श
रूपिणा वर्णान्रूपयति संकल्पयतीति स्पर्शरूपिणा स्पर्शग्रहणमुपलक्षणं हृदयाकाशाद्बृहतीं सृजतीति तृतीयश्लोकेनान्व
यः ३९ बृहतीशब्दार्थं व्याख्यानाय विशेषणानि प्राणोपाधेराकाशान्मूलाधारछिद्रात् घोषवान् मनसा साधनेन वृ

यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात्। आकाशाद्घोषवान्प्राणो मनसा स्पर्शरूपिणा ३८ छं
दोमयोमृतमयः सहस्रपदवीं प्रभुः ओंकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषितां ३९ विचित्रभाषा
विततां छंदोभिश्चतुरुत्तरैः। अनंतपारां बृहतीं सृजत्याक्षिपते स्वयं ४० श्रीरामजयरामजयजयराम

ती वेदलक्षणां सृजति पुनराक्षिपते स्वयमिति। वृत्तीयश्लोकेनान्वयः भगवानेवं तेन रूपेण छंदोमयो वेदमूर्तिः स्वतस्त्व
मृतमयः ओंकारात् उरः कंठ सहस्रपदवीं बहुमार्गां तदेवाह अनेकपुरुषार्थसाधनवतीं ओंकारात् उरः कंठादिसं
गेन व्यंजितैः स्पर्शादिभिर्भूषितां ॐ कारस्यात्र हृदउतः सूक्ष्मोभिप्रेतः न तु अकारादिवर्णरूपः तस्य व्यंग्यकोटिलात् तत्र स्प
र्शाः कादिपंचवर्गाः स्वरा अकारादयः षोडश ऊष्माणः शषसहाः अंतस्था यरलवाः विचित्राः लौर्वैदिकलौकिकभाषाभि
र्वितता यथोत्तरं चतुरक्षराणि उत्तराणि अधिकानि येषां तैः छंदोभिरुपलक्षिता एवमनंतपारां सृजति स्व
यमेवाक्षिपते उपसंहरति ४० श्रीरामजयरामजयजयराम वासुदेवाय नमः श्रीवेदव्यासाय नमः सदाशिवश्री

तेषु कतिचिद् छंदांसि दर्शयन्ति। गायत्रीति। तत्र चतुर्विंशत्यक्षरा गायत्री। ततश्चतुरक्षरवृध्योष्णिगादिछंदां
६८ विज्ञामिति सिअष्टाक्षरवृद्धिक्कु एवं सर्वाणि चतुरुत्तराणि छंदांसि अत्यष्टिः अतिजगती अति विराडित्यर्थः। एतैः छं
दोभिरुपलक्षितां मद्वैखरीं वाचं व्यक्तां बृहत्यपि साकल्येन स्वरूपतो दुर्ज्ञेयेत्युक्तं ४१ अर्थतोपि दुर्ज्ञेयत्व
माह। किमिति। कर्मकांडे विधिवाक्यैः किं विधत्ते देवताकांडे मंत्रवाक्यैः किमाचष्टे प्रकाशयति। ज्ञानकांडे वा किमनू
द्य विकल्पयेत् निषेधार्थमित्येवमस्या हृदयं तात्पर्यं मत्तो मत्तोन्यः कश्चिदपि न वेद ४२ ननु तर्हि त्वं मत्स्यः पाकं कथयेति
अन्मिति कथ्यति मामेव यज्ञरूपं विधत्ते। मामेव तत्तद्देवतारूपमभिधत्ते न मत्तः पृथक् यद्वाकाशादिप्रपंचजातं तस्मात् एत

गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च। त्रिष्टुब्जगत्यतिछंदो ह्यत्यष्ट्यतिजगद्विराट् ४१ किं विध
त्ते किमाचष्टे किमनूद्य विकल्पयेत् इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ४२ मां विधत्तेभिधत्ते मां वि
कल्प्यापोह्यते ह्यहं। एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदां। मायामात्रमनूद्यांते प्रतिषि
ध्य प्रसीदति ४३ इति श्रीभागवते महापुराणे एकादशस्कंधे एकविंशोध्यायः॥ ॥छ॥ ॥

स्मादात्मन आकाशः संभूत इत्यादिना विकल्प्यापोह्यते निराक्रियते तेन द्व्यहमेव न मत्तः पृथगस्ति [illegible] कुतः इत्यपेक्षायां स
र्वस्यार्थं संक्षेपतः कथयति। एतावानेव सर्वेषां वेदानामर्थः। तमेवाह। शब्दो वेदः मां परमार्थरूपमाश्रित्य [illegible] मायामा दां राम
त्रमित्यनूद्य नेह नानास्तीति वदन्ते प्रतिषिध्य प्रसीदति। निवृत्तव्यापारो भवति। अयं भावः। यथा मृदुर्दर्योः रसः स एवं न ६८
द्भिः तत्तत्तासु नाना कांडशाखास्वर्पित एव प्रणवस्यायमर्थः परमेश्वरः स एव तद्विस्तारः तत्ता नाना सर्वे वेदकांडशाखा नाभि
पि संगच्छते नान्यत्र इति। नित्यमुक्तः स्वतः सर्ववित् सर्ववेदार्थवित्र स्वपरज्ञानदातायस्तं वंदे गुरुमीश्वरं ४३ इति एकादशे एकविंशः॥

द्वाविंशे तत्त्वसंख्यानामविशेषविधोच्यते। पुंप्रकृत्योर्विवेकश्चानुक्रमस्सृष्ट्यादिवात तदेवं वेदानां प्रवृत्तिपरत्वं निरा
कृत्य मोक्षपरत्वं निर्णीतं। संप्रति मोक्षपरत्वेपि तदर्थं तत्त्वविवादः। तथा हि। केचित्तत्त्वसंख्यासु विवदंते तत्रापि वाक्यार्थ
सदसत्वे आत्मतत्त्वेप्येकत्वनानात्वादिषु। तत्र किं सत्यमिति जिज्ञासया पृच्छति कतीति। ऋषिभिरागमेषु बहुधा संख्या
तानि तेषु कति युक्तानीत्यर्थः। भगवतानुवादस्त्वेकं बहुधा संख्यानं प्रपंचयति। नवेति त्रिभिः। त्वं तावदष्टाविंशति
तत्त्वान्याह तानि न वयं शुश्रुम श्रुतवंतः १ एतावत्त्वं नो भाव एतावत्त्वं नानात्वमित्यर्थः यद्विवक्षया यत्प्रयोजनमभि

श्रीउद्धव उवाच। कति तत्त्वानि विश्वेश संख्यातान्यृषिभिः प्रभो। नवैकादश पंच त्रीण्यात्थ त्वमिह शुश्रुम १
केचित्षड्विंशतिं प्राहुरपरे पंचविंशतिं। सप्तैके नव षट् केचिच्चत्वार्येकादशापरे २ केचित्सप्तदश प्राहुः षोड
शैके त्रयोदश। एतावत्त्वं हि संख्यानामृषयो यद्विवक्षया। गायंति पृथगायुष्मन्निदं नो वक्तुमर्हसि ३
श्रीभगवानुवाच। युक्तं च संति सर्वत्र भाषंते ब्राह्मणा यथा। मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटं
२ ४ नैतदेवं यथात्थ त्वं यदहं वच्मि तत्तथा। एवं विवदतां हेतुं शक्तयो मे दुरत्ययाः ५ श्रीगणेशाय नमः

मित्येव गायंति। आयुष्मन्निति सम्बोधनं विवक्षाभेदेन सर्वं युक्तमेव मायया च किं नाम न युक्तमित्याह। युक्तमिति। यथा ब्राह्म
णाः भाषंते तथा केवलं न वस्तुतया संति सर्वत्रांतर्भूतानि सर्वाणि तत्त्वानि किंच। मायामिति। असत्यमपि मायाश्रयत्वा
द्घटत एवेत्यर्थः। उद्गृह्य स्वीकृत्य। न हि मरीचिजलपरिमाणादिविवादे किंचिद्घटितमिव भवति ४ ननु यदि सर्वमपि
युक्तं कुतो विवादः। यदि च मायैवालंबनं। कुतो हेतुं प्रति विवादः। तत्राह। नैतदिति। हेतुं प्रति विवदमानानां मदी
या दुरतिक्रमाः शक्तयः सत्त्वाद्या अंतःकरणवृत्तिविशेषरूपेण परिणता एव हेतुरित्यर्थः ५ श्रीरामजयजयराम श्री

तासां विद्याद हेतुत्वमुपपादयन्ति यासामिति। यासां व्यतिकरात् क्षोभात् वदतां पदं विषयः विकल्पो भेद आसीदा
अंतःकरणवृत्ति विकल्पो वा तन्मूलभूतः। एतदेव व्यतिरेकेण द्रढयति। शमदमयोर्हेत्वोस्तस्मिन्प्राप्ते विकल्पोऽप्येति
लीयते। तं च विकल्पमनु वादः शाम्यतीति ६ संतिसर्वत्रेतियदुक्तं तत्प्रपंचयति। परस्परेति द्वाभ्यां। अन्यो
न्यस्मिन्ननुप्रवेशात्। वक्तुर्यथा विवक्षितं तथा एकं कारणं अपरं कार्यं कार्यकारणभावेन प्रसंख्यानं भवति। य
अ द्वा अल्पसंख्या अपरोऽधिकसंख्या तयोर्भावः पौर्वापर्यं तेन प्रसंख्यानं गणनमिति ७ अनुप्रवेशं दर्शयन्ति

यासां व्यतिकरादासीद्विकल्पो वदतां पदं। प्राप्ते शमदमेऽप्येति वादस्तमनु शाम्यति ६ परस्परानुप्रवे
शात्तत्त्वानां पुरुषर्षभ। पौर्वापर्यप्रसंख्यानं यथा वक्तुर्विवक्षितं ७ एकस्मिन्नपि दृश्यंते प्रविष्टानी
तराणि च। पूर्वस्मिन्वा परस्मिन्वा तत्त्वे तत्त्वानि सर्वशः ८ पौर्वापर्यमतोऽमीषां प्रसंख्यानमभीप्स
तां। यथा विविक्तं यद्वक्त्रं गृह्णीमो युक्तिसंभवात् ९ अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवेदनं। स्वतो
न संभवादन्यस्तत्त्वज्ञो ज्ञानदो भवेत् १० श्रीराम

एकस्मिन्नपीति। पूर्वस्मिन्कारणतत्त्वे तत्तत्कार्यतत्त्वानि सूक्ष्मरूपेण प्रविष्टानि मृदि घटवत्। अपरस्मिन्कार्यतत्त्वे का
रणतत्त्वान्यनुगतत्वेन प्रविष्टानि घटे मृद्वत् ८ अविरोधमुपसंहरन्ति। अतः अमीषां तत्त्वानां पौर्वापर्यं तत् कारण
कार्यत्वे प्रसंख्यानं न्यूनाधिकसंख्या अभीप्सितानां वादिनां मध्ये यथा यथा विवक्षया यद्वक्त्रं यस्य मुखं प्रवृत्तं तत्तत्सर्वं
विविक्तं निश्चितं वयं गृह्णीम उक्तन्यायेन सर्वत्र युक्तेः संभवात् ९ ननु कार्यकारणतत्त्वानामेवं पृथक्विवक्षयास्तु राम
नाम संख्याभेदः जीवेश्वरयोस्तु कथं तद्विवक्षायां पञ्चविंशतिपक्षो प्रवर्तेत अत आह। अनादी ६९
ति स्वतो न संभवति अन्यतस्तु संभवात् स्वतः सर्वज्ञः परमेश्वरोऽन्योऽस्ति वक्तव्य इति षड्विंशतिपक्षाभिप्रायः १०
भेद

कथंतर्हि पंचविंशतिपक्षः तत्राह। पुरुषेति। वैलक्षण्यं विभेदः अण्वपि नास्ति द्वयोरपि चिद्रूपत्वात्। अतस्तयोरन्यतम
न्यतककल्पनाऽपार्था व्यर्था। एवं पंचविंशतिपक्षप्रसिद्धिरित्यर्थः। नत्वेवमपीश्वरस्य सांख्यज्ञानस्य पृथक्त्वात्कोऽप द
ह सद्वयमपि न घटते। अत आह। ज्ञानं चेति। सत्वगुणपरिणतित्वात्तदंतर्भूतमित्यर्थः ११ ननु ज्ञानं जीवधर्मः कथं प्रकृते
र्गुणः स्यात्। अत आह। प्रकृतिरिति। गुणसाम्यं हि प्रकृतिः अतस्तद्विशेषरूपा गुणास्तस्या एव न त्वात्मनो जीवस्य अ
र्न्वात्मनस्य स्थित्यादिहेतुः तत्तद्गुणाश्रयत्वानुपपत्तेः १२ अतः सत्वस्य परिणामो ज्ञानं प्रकृतेर्गुण इति सत्वेनैवान्वयः
ननु तन्निवर्त्यं कर्म वाऽज्ञानं च तत्वांतरं स्यात्। न रजः कर्म रजसो वृत्तिः अज्ञानं च तमसः अतः कर्माज्ञानयोर्जस्त र

पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि। तदन्यकल्पनापार्था ज्ञानं च प्रकृतेर्गुणः ११ प्रकृति
र्गुणसाम्यं वै प्रकृतेर्नात्मनो गुणाः। सत्वं रजस्तम इति स्थित्युत्पत्त्यंतहेतवः १२ सत्वं ज्ञानं रजः
कर्म तमोऽज्ञानमिहोच्यते। गुणव्यतिकरः कालः स्वभावः सूत्रमेव च १३ पुरुषः प्रकृतिर्व्यक्तम
हंकारो नभोऽनिलः। ज्योतिरापः क्षितिरिति तत्वान्युक्तानि मे नव १४ श्रीरामजयराम जयराम

मो द्वारा प्रकृतावेवांतर्भाव इति भावः। तथापि कालस्वभावयोस्तत्वांतरता स्यात् न गुणानां व्यतिकरो यस्मात् सई
श्वर एव कालो नाम स्वभावो नाम सूत्रं महत्तत्वमेव। तस्य सर्वशक्तिमत्वात्तदेव ज्ञानादीनां यथायथं मतभीवात्
ह पक्षद्वयेऽपि तत्वसंख्याः एतत्पक्षांतरमपि ज्ञेयं १३ स्वमते तु गुणानामागमापायित्वात् प्रकृतेर्भेदो विवक्षितः
अतो गुणास्त्रीणि तत्वानि अपराणि पंचविंशतितत्वानि पूर्वोक्तपक्षद्वयसाधारणानि दर्शयति पुरुष इति ष
सार्धद्वाभ्यां। व्यक्तं महत्तत्वं। नभ आदीनि तन्मात्राणि मे मया। १४ श्रीरामजयराम जयजयराम श्रीसदाशिव

भा०ए०
१०
द्वा

एकादशत्वं दर्शयति।श्रोत्रमिति।दर्शनं चक्षुः।ज्ञानशक्तयः ज्ञानेंद्रियाणि पंच।वागादिपाय्वंतानि द्वंद्वैक्येनोक्ता
नि बलात् स्त्रियांघ्रिश्चेति।कर्माणि कर्मेंद्रियाणि पंच उभयं उभयात्मकं मनः अंगहेउद्धव एवमेतान्येकादश त्रीं १५
पंचैवं दर्शयति शब्द इति।शब्दादीनि विषयतया पूरिणा तानि पंच महाभूतानि।गत्युक्त्यादिभिस्तत्राधिक्यपक्षत्र
येपि स्यादित्याह।गतीति।गतिश्चोक्तिश्च उत्सर्गश्च शिल्पं च तानि कर्मायतनानां कर्मेंद्रियाणां सिद्धयः फला
नि न तत्त्वांतराणीत्यर्थः १६ तदेवमत्र येतत्त्व संख्याभेदं निरूप्य पंचविंशपक्षमागायतीति यस्तु पक्षं तन्मततत्त्वासर्गं दं

श्रोत्रं त्वग्दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः।वाक्पाण्युपस्थपाय्वंघ्रिः कर्माण्यंगोभयं मनः १५
शब्दस्पर्शो रसो गंधो रूपं चेत्यर्थजातयः।गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः १६ स
ति र्गादौ प्रकृतिर्ह्यस्य कार्यकारणरूपिणी।सत्वादिभिर्गुणैर्धत्ते पुरुषोव्यक्त ईक्षते १७ व्यक्तादयो
विकुर्वाणा धातवः पुरुषेक्षया।लब्धवीर्याः सृजंत्यंडं संहताः प्रकृतेर्बलात् १८ श्रीराम

र्शयति।सर्गादाविति।कार्याणि षोडशविकाराः कारणानि महदादीनि सप्त तद्रूपिणी सती प्रकृतिः अस्य वि
श्वस्य सर्गादौ गुणैः सत्त्वादिभिरवस्थां धत्ते उपादानकारणरूपत्वात् पुरुषस्तु अव्यक्तः अपरिणामी नि
मित्तभूतः केवलमीक्षते।अतः परिणामिन्याः प्रकृतेः पुरुषोपि भवतीति १७ तदैवारब्धस्य कार्यस्य तत्त्वदं राम
र्शनमभिप्रेत्याह।व्यक्तादय इति व्यक्तादयो महदादयः।प्रकृतेरुसन्नायेधातवस्ते विकुर्वाणाः पुरुषे १०
क्षणलब्धवीर्याः संहताः अंडं सृजंति।प्रकृतेर्बलात् तन्माश्रित्येत्यर्थः १८ श्रीराम जयराम जय जयराम

एवंस्वमतंउपसंहृत्य मतांतरेष्वपि सामान्यतो निरूपितां घटनां विशेषतः सतात्पर्यां दर्शयति । सप्तैवेति । ज्ञानं जानातीति द्रष्टा
जीवः उभयोर्द्रष्टृदृश्ययोराधारः आत्मा वेतिसप्त । तत्र प्रकृत्यादीनां कारणत्वेन खादिष्वंतर्भावः उत्तरेषामंतर्भावार्थमाह । ततः
तेभ्यः सप्तभ्यः देहेंद्रियासवः १९ कार्याणि जायंते षडिति मतेपि भौतिकस्य भूतांतर्भावं जीवस्यच परमात्मांतर्भावमाह । तैर्यु
क्त इति २० अन्नं पृथ्वी आत्मनो जातानि आत्मना सहचत्वारि तत्त्वानि अंतर्भावार्थमाह । तैरिति । अवयविनः कार्यस्य २१ भूतानि
तन्मात्राणि चइंद्रियाणि च पंच पंच मनं । एकेन मनसा सह आत्मा सप्तदशः २२ आत्मैव संकल्पयन्मन उच्यते । त्रयोदशपक्षे भूतानि

स सैव धातव इति तत्रार्थाः पंचखादयः । ज्ञानमात्मोभयाधारस्ततो देहेंद्रियासवः १९ षडित्यत्रापि भूतानि
पंच षष्ठः परः पुमान् । तैर्युक्त आत्मसंभूतैः सृष्ट्वेदं समुपाविशत् । २० चत्वार्येवेति तत्रापि तेज आपोन्नमात्म
नः । जातानि तैरिदं जातं जन्मावयविनः खलु । २१ संख्याने सप्तदशके भूतमात्रेंद्रियाणि च । पंच पंचैकमन
सा आत्मा सप्तदशः स्मृतः । २२ तद्वत्षोडशसंख्याने आत्मैव मन उच्यते । भूतेंद्रियाणि पंचैव मन आत्मा
त्रयोदश । २३ एकादशत्व आत्मासौ महाभूतेंद्रियाणि च । अष्टप्रकृतयश्चैव पुरुषश्च नवेत्यथ २४ ॥

तन्मात्रैरेकीकृतानि पंचैव भूतेंद्रियाणि च तत्तत्कार्यकाणि पंचैव मनश्चैकमिंद्रियाधिष्ठाता आत्मा चेति द्विविधः एवं त्रयोदश ।
पंचविंशतिपक्षे महदादयोऽष्टौ पंचखादयः एकादशेंद्रियाणि आत्मा चेति । षड्विंशतिपक्षे कालः परमात्मा वा अधिकः
पंचभूतानि पंचेंद्रियाणि । २३ एकादशपक्षे पंचभूतानि पंचेंद्रियाणि जीवश्च मनसोऽहंकारात्मा तत्रांतर्भावेनैतान्येव एकादशान
वपक्षे अष्टप्रकृतयः पुरुषश्च विकाराणामंतर्भावः [illegible] २४ श्रीरामजयराम जय जयराम वेंकटेशायनमः ॥

भा॰पु॰

७१

उपसंहरति

इतीति। इति। एभिः प्रकारैः प्रकृतिपुरुषभेदज्ञापनायेत्यर्थः २४ तत्र पृच्छति। प्रकृतिरिति। आत्मनो जडाजड स्वभावेन विलक्षणो अन्योन्यापाश्रयात्। परस्परपरिहारेण प्रतीतेरित्यर्थः २५ तदेव व्यनक्ति। प्रकृतौ तस्या येदिह प्रकृतिश्चात्मविकेन विना तस्या अप्रतीतेः। अहमित्यभेदप्रतीतेर्न देहात्मनोर्भेदो लक्ष्यत इत्यर्थः हृदि वर्तमानं संशयं। नयेन युक्त्या ते पुण्डरीकाक्ष कार्त्स्न्येन येषां तेः २६ अर्हसी युक्तं। तत्र हेतुमाह। हियस्मात्। त्वत्तः तव सादादेव अत्र ज्ञाने प्रमोषः भ्रंशः। अस्य तेजः शक्तिः मायावी ननु च स्वप्रकाशात्मनः कथं ज्ञानप्रमोषज्ञानदाने ते स्या

इति नानाप्रसंख्यानं तत्त्वानामृषिभिः कृतं। सर्वं न्याय्यं युक्तिमत्त्वाद्विदुषां किमशोभनं २४ उद्धव उवाच। प्रकृतिः पुरुषश्चोभौ यद्यप्यात्मविलक्षणौ। अन्योन्यापाश्रयात्कृष्ण दृश्यते न भिदा तयोः २५ प्रकृतौ लक्ष्यते ह्यात्मा प्रकृतिश्च तथात्मनि। एवं मे पुण्डरीकाक्ष महान्तं संशयं हृदि। छेत्तुमर्हसि सर्वज्ञ वचोभिर्नयनैपुणैः २६ त्वत्तो ज्ञानं हि जीवानां प्रमोषस्तेऽत्र शक्तितः। त्वमेव ह्यात्ममायाया गतिं वेत्थ न चापरः २७ श्रीभगवानुवाच। प्रकृतिः पुरुषश्चेति विकल्पः पुरुषर्षभ। एष वैकारिकः सर्गो गुणव्यतिकरात्मकः २८ ममाङ्ग माया गुणमय्यनेकधा विकल्पबुद्धीश्च गुणैर्विधत्ते। वैकारिकस्त्रिविधोऽध्यात्ममेकम

धा अथाधिदैवमधिभूतमन्यत् २९

समोषे वा ममशक्तिः प्रयोजनं। तत्राह। त्वमेवेति २७ विकारा विकारास्त्यां नानात्वेन अवेक्ष्यता सापेक्षनिरपेक्षाभ्यां प्रकारा

प्रका॰श्या भ्यां वास्तवभेदं चकुमाह। प्रकृतिः पुरुषश्चेति विकल्पोऽसत्त्वभेद एव वस्तुतः इत्यपेक्षायां प्रकृतिरात्मा लोके देहादिसंघात स्या विकारिता न वहू शोयति। एष इति द्वाभ्यां। एष सर्गः सृज्यत इति सर्गो देहादिसंघातः वैकारिकः विकारवान् अत्र हेतुः गुणव्यतिकरात्मकः गुणक्षोभात्मकः २८ नानात्वमाह ममेति। विकल्पा भेदं तद्बुद्धीश्च अनेकधा हे अपं

वपति वैकारिकः अनेकविकारवानपि स्थूलेन मार्गेण तावति विधः त्रैविध्यमेवाह [illegible] अध्यात्ममिति एकैकरूपं २९

राम

७१

नानिरूपाणि दर्शयति। दृक् अध्यात्मं रूपं आधिभूतं। अत्र रंध्रे चक्षुर्गोलके प्रविष्टं आर्कं वपुः अंशो ऽधिदैवमिति। सा
पेक्षप्रकाशतामाह। परस्परमिति। चक्षुषा रूपं ज्ञायते तदन्यथानुपपत्त्या चक्षुस्तत्सद्भूतस्य न्यथानुपपत्त्या तदधि
ष्ठातृदेवता। ततः चक्षुषः प्रवृत्तिस्ततो रूपज्ञानमित्येवमेतत्त्रयं परस्परं सिध्यति। अत्र रंध्र इति विशेषणव्याव
र्त्यमाह दृष्टांतोपयोगितया। यस्तु रवेः अंशो ऽर्को वर्तते मंडलात्मा स नु स्वतः सिध्यति चक्षुर्विषयत्वेऽपि प्रति
योग्यपेक्षाभावमात्रेण स्वतन्त्र इत्युक्तं इदानीमात्मनो विकारित्वाभावेन भेदमाह। यत्त्विति यस्मादात्मा एषामध्या

दृग्रूपमार्कं वपुरत्र रंध्रे परस्परं सिध्यति यः स्वतः खे। आत्मा यदेषामपरोऽप आद्यः स्वयानुभूत्या
खिलसिद्धसिद्धिः ३० एवं त्वगादि श्रवणादि चक्षुर्जिह्वादि नासादि च चित्तयुक्तं ३१ [illegible] १२
योऽसौ गुणक्षोभकृतो विकल्पः प्रधानमूलान्महतः प्रसूतः। अहं त्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामस ऐन्द्रियश्च

आत्मा नाम आद्यः कारणं अत एव एकरूपः अभिन्नः अतस्मादेतेभ्यो परोऽतिरिक्तः स्वप्रकाशत्वादपि स्यात् स्वयानुभूत्या स्वतः सिद्धप्रकाशो
कः ऽखिलानां सिद्धीनां परस्परप्रकाशकानामपि प्रकाशः सर्वधामपि सामान्यतः। भिन्नप्रकाश विषयत्वाद् अत एव तस्य स्व
॥३०॥ रे प्रकाशत्वं सिद्धं चक्षुषि दर्शितं त्रैविध्यमिन्द्रियान्तरेष्वप्यतिदिशति एवमिति यथा चक्षुः एवं त्वगादीत्यर्थः त्वक् स्पर्शो वायुरिति। श्रव
णं शब्दो दिश इति। जिह्वा रसो वरुण इति। नासा गन्धोऽश्विनाविति चित्तं चिन्त्यं मनः करणांतरमपि तत्र चित्तं चेतयितव्यं वासुदेव इति
मनो मंतव्यं चन्द्र इति। बुद्धिर्बोधव्यं ब्रह्मेति। अहंकारो अहंकर्तव्यं रुद्र इत्येवं त्रिविधं इत्यर्थः ३१ ननु स पुनरपि बंधमोक्षार्थमेवात्मनो त्रिवि
धप्रपंचव्याप्तिः केन प्राप्तिः कुतः स्यात् अहंकारनिवृत्त्यात् कुतः त्रिविधविकल्पविनिर्णयेऽव तस्य अप्यनाह। योऽसौ अहं अहंकारः
तमेवाह गुणक्षोभकृतो करोतीति तथा ततः परमेश्वरात् कालात् हेतुनिमित्तात् प्रधानं मूलं उपादानं यस्य तस्मात् महतः प्रसूतो विकल्पः सत्रिवृ

ध ५५२

त्रिविधमोहमयस्य हेतुर्त्रिर… वहा वैकारिक इति ३२
विकल्पस्य

भा॰पु॰

७२

सकृत्तो निवर्तते। आत्माज्ञानविलसितत्वाद् तद्ज्ञानेनेत्याशयेनाह। आत्मापरिज्ञानमय इति। ननु कथं मोहमयत्वं वि
कल्पस्याहंकारस्य वा केषांचित्सत्यताङ्गीकारात्तत्राह धियावाद इति। अयं भिदार्थनिष्ठो विवादोऽप्यात्मापरिज्ञानमय इत्य
न्वयः। यद्वा विवादः सर्वोऽपि भिदार्थनिष्ठ एव न तु वस्तुमात्रनिष्ठः अतः परस्परयुक्तिभिरेव भेदस्य निराकृतत्वान्मोह
मयत्वं सिद्धमिति ननु यद्यहंकारो विकल्पश्च नास्ति अलं तर्हि तन्निरासप्रयासेन तत्राह। व्यर्थोऽपि अर्थरहितोऽपि स्वरूप
भ्रष्टानां मत्तो बहिर्मुखानां नैवोपरमेत् अप्रत्युत तत्कृतैः कर्मभिरुच्चावचदेहेषु संसरतीति ३३ तत्र पृच्छति त्वत्त इति त्या

आत्मापरिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदार्थनिष्ठः। व्यर्थोऽपि नैवोपरमेत पुंसां मत्तः परावृ
त्तधियां स्वलोकात् ३३ उद्धव उवाच। त्वत्तः परावृत्तधियः स्वकृतैः कर्मभिः प्रभो। उच्चावचान्यथा देहान्गृह्ण
न्ति विसृजन्ति च ३४ तन्ममाख्याहि गोविन्द दुर्विभाव्यमनात्मभिः। न ह्येतत्प्रायशो लोके विद्वांसः सन्ति
वंचिताः ३५ श्रीभगवानुवाच। मनः कर्ममयं नृणामिन्द्रियैः पंचभिर्युतं। लोकाल्लोकं प्रयात्यन्य आत्मा
तदनुवर्तते। ३६ ध्यायन्मनोऽनुविषयान्दृष्टान्वानुश्रुतानथ। उद्यत्सीदत्कर्मतंत्रं स्मृतिस्तदनु शाम्यति ३७

पक्षस्यात्मनो देहाद्देहान्तरगमनं अकर्तुः कर्माणि नित्यस्य च जन्ममरणादीनि कथमिति भावः। एतद्विद्वांसो न सन्ति हि य ३४
स्मात्त्वन्मायया वंचिताः मोहिताः ३४ ३५ लिंगशरीराध्यासेन सर्वं घटत इत्युत्तरमाह। मन इति प्रधानत्वेन पंचभिरिन्द्रियै
र्युक्तं नृणामुपलक्षणमर्थः देहाद्देहान्तरं प्रति याति ततोऽन्य एवात्मा तन्मनोऽनुवर्तते अहंकारेणानुगच्छति ३६ ननु मनसा राम
पि पूर्वदेहवियोगो देहान्तरयोगश्च कथं भवतीति विवक्षायां स्मृतिवियोगयोगाभ्यामिति वक्तुं तयोः कारणमाह ध्यायदिति। ७२
कर्मतन्त्रं सदा कर्माधीनं पश्चात्पितादिना दृष्टान् अनुश्रुतान् वेदाकाशान् अनुध्यायदुद्यत् अथानन्तरं ध्यायमानेषु घत आविर्भ
वत्पूर्वविषयेषु वसीदत् लीयमानं भवति तदनन्तरं तस्य स्मृतिः पूर्वापरानुसंधानं नश्यति ३७ श्रीगणेशायनमः

ततः किं अत आह। विषयेति। कर्मोपस्थापितदेवादिदेहेष्वत्यंताभिनिवेशेन आत्मानं पूर्वदेहे पुनर्नोन स्मरेत्तद्
तिर्यक्त्वे वा यातनादेहाभिनिवेशेन भयशोकादेः देवादिदेहाभिनिवेशेन वा हर्षविषादहेतोः पूर्वदेहे अत्यंतविस्मृतिः अहं
कारनिवृत्तिः तदभिमानिनो जंतोर्जीवस्य मृत्युरुच्यते न तु देहवन्नाशः। जन्म तु विषयस्य आत्मतया स्वीकृतिं अभिमानं प्रा
हुः न तु देहवदुत्पत्तिः। नवपुत्रादिदेहवत् ख्यात्यतिशयमात्रेण किंतु सर्वभावेन अभेदेन। अभिमानमात्रप्राप्तमिति मरणे दृ
ष्टांतद्वयं। प्रथमस्य प्रथममनोरथश्चेत्यर्थः ३९ दृष्टांतो विरुध्यातिस्वप्नमिति तत्र वर्तमानस्वप्नादौ पूर्वमिवेति अपूर्वमेवेति वा

विषयाभिनिवेशेन नात्मानं यत्स्मरेत्पुनः।। जंतोर्वै कस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः ३८ जन्मत्वात्मतया पुं
सः सर्वभावेन भूरिद। विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथः ३९ स्वप्नं मनोरथं चेत्थं प्राक्तनं न स्मरत्यसौ।।
तत्र पूर्वमिवात्मानमपूर्वं चानुपश्यति ४० इंद्रियायनसृष्ट्येदं त्रैविध्यं भाति वस्तुनि।। बहिरंतर्भिदाहेतुर्जनो
सज्जनकृद्यथा ४१ नित्यदा ह्यंग भूतानि भवंति न भवंति च।। कालेनालक्ष्यवेगेन सूक्ष्मत्वात्तन्न दृश्यते ४२

न्वयः। पूर्वसिद्धमप्यात्मानमपूर्वमद्य जातमिव पश्यतीत्यर्थः ४० उपसंहरति इंद्रियाणामयं मनः तस्य देहांतराभिनिवेशेन मं
यासृष्टिः उत्पत्तिस्तया वस्तुनि आत्मनि तदभिमानेनेदं त्रैविध्यं उत्तममध्यमनीचत्वं असदेव भातीत्यन्वयः। एकोऽपि सन् आत्मा वाह्या
भ्यंतरभेदहेतुश्च भवति। बाह्यविषयान् आंतरान् सुखादींश्च पश्यतीत्यर्थः। यथा जनो जीवस्य प्रबहून् असतो जनान् देहाद्भु
र्नृ पश्यन् बहुरूपो भाति तद्वत्। यद्वा इदं त्रैविध्यं अध्यात्मादिरूपं पश्यति असज्जनकृत्। दुष्टपुत्रोत्पादकः। जनः पिता स्वयं सामो
पि पुत्राभिमानस्तदरिमित्रादिषु यथा भेदहेतुर्भवति तद्वदिति अन्यत्तु समानं ४१ तदेवं लोकप्रसिद्धौ जन्ममरणे सुनिरूप्यस्य
क्षणावैधावैराग्याय निरूपयति। नित्यदा प्रतिक्षणं भूतानि शरीराणि उत्पद्यंते नश्यंति च कालस्यातिसूक्ष्मत्वात्तानि भवनमसो
भवनं वा निवर्तकस्थितिर्नोपलक्ष्यते ४२ श्रीराम

दृष्टाव

सतोर्जन्ममरणयोर्ज्ञाने कारणमेतद्भवेत् सत्यमेव तयोः कुतस्त्यात्रं भ्यानुमानेन साधयति। अर्चिषां परिमा
णादिभिः स्रोतसां गत्यादिभिः फलानां रूपादिभिर्यथावस्थाविशेषाः कृताः कालेनेति पूर्वस्यानुषंगः। आदि
त्य शब्देन नित्येनावर्त्तमानकालादीनामुपादानं। विमतं प्रतिक्षणात्पतिविनाशवत् अवस्थाभेदवत्त्वात् दीपज्वा
द्व लादिवदित्यनुमानं ४३ कथं तर्हि प्रत्यभिज्ञा तेदेवसादृश्याबलंबिनीत्याह सोयमिति। सादृश्याद्दीपिषा
मेव यथा सोयं दीप इति प्रत्यभिज्ञा यथा च स्रोतसां प्रवाहजलानामेव तदिदं जलमिति तथा सोयं पुमानिति

यथार्चिषां स्रोतसां च फलानां वा वनस्पतेः। तथैव सर्वभूतानां वयोवस्थादयः कृताः ४३ सोयं दीपो
र्चिषां यद्वत् स्रोतसां तदिदं जलं। सोयं पुमानिति नृणां मृषा गीर्धीर्मृषायुषां ४४ मा स्वस्य कर्मबीजेन
जायते सोप्ययं पुमान्। म्रियते वामरो भ्रांत्या यथाग्निर्दारुसंयुतः ४५ निषेकगर्भजन्मानि बाल्य
कौमारयौवनं। वयोमध्यं जरा मृत्युरित्यवस्थास्तनोर्नव ४६ श्रीरामजयरामजयजयराम श्री

धा गीर्धीश्च मृषा नृणां बहुजन्मशरीरिणां मृषा व्यर्थमायुर्येषां अविवेकिनां तेषां भवति ४४ ननु कथं देहाद्यात्मवतः पुं
सः कर्मजन्ममरणानि संति नान्यस्येति व्यवस्था नहि घटे तद्घटस्य पुरुषभेदेन सत्यमसत्यं वेति न। अन्नस्यापि वस्तुन
स्तद्दशावदित्याह। मा स्वस्येति नात्मनः कर्मणा बीजभूतेन सोपि अन्नोपि पुमान् जायते म्रियते च। किंतु अयं भ्रांत्या
अजन्मापि जायते तद्वद् अमरोपि म्रियते तद्वद्यथा महाभूततेजोरूपोग्निरात्मत्वात् अचस्थितोपि दारुयोगवियोगाभ्यां
जन्मनाशौ प्राप्नोतीति तद्वत् ४५ शिष्यबोधाय ता वयोवस्थाः प्रपंचयति। निषेको जठरे प्रवेशः। गर्भस्तन्मध्ये रुधिर

देहसंबन्धात्तज्जन्ममरणादीनीत्युपपादितमर्थमुपसंहरति। एताद्दृत्तिहिस्फुटं जन्मयस्य देहस्य तत्तनुः अवस्था गु
णसंगाद्वस्तुस्य विवेकात्क्वचित्परमेश्वरानुगृहीतः कश्चिज्जहाति अवस्थावतो देहस्य दृष्टानावस्थावानिति वि
वेकज्ञानेन ४७ ननु तदात्मनोऽपि लक्षितस्तेन जन्ममरणादावनु देहो न दृश्यते तत्राह। आत्मन इति पितृदेहस्योर्ध्वदेहिकं
कृ कुर्वतां पुत्रदर्शनात् पुत्रो देहस्य जातकर्माणि जन्मदर्शनात् आत्मनः स्वदेहस्योत्पत्तिनाशयोरनुमेयौ। एवं च द्व
यं कुर्वतां पदर्शनान् पुत्रो देहस्य जातकर्माणि जन्मदर्शनात् ... भवाप्ययधर्मको न भवति ४८ एतदेव दृष्टान्तेन त्
लेसतिभवाप्ययवतां वस्तूनां देहानामभिज्ञो द्रष्टा द्वयलक्षणः

एतामनोरमयी ह्यस्यैवाज्ञानवास्तव्यः गुणसंगादुपादत्ते क्वचित्क्वचिज्जहाति च ४७ आत्मनः पितृपुत्रा
भ्यामनुमेयौ भवाप्ययौ। न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः ४८ तरोर्बीजविपाकाभ्यां यो विद्वाञ्ज
न्मसंयमौ। तरोर्विलक्षणो द्रष्टा एवं द्रष्टा तनोः पृथक् ४९ प्रकृतेरेवमात्मानमविविच्याबुधः पुमान्। तत्त्वेन
स्पर्शसंमूढः संसारं प्रतिपद्यते ५० सत्त्वसंगादृषीन्देवान्रजसासुरमानुषान्। तमसा भूततिर्यक्त्वं भ्रा
मितो याति कर्मभिः ५१ नृत्यतो गायतः पश्यन्यथैवानुकरोति तान्। एवं बुद्धिगुणान्पश्यन्नीहोऽप्यनुकार्यते ५२

स्पष्टयति। तरोरिति तरुर्यद्वेनोत्पन्नमात्रोपलक्षणं फलं पाकं तस्य ज्ञाता देहीत्यर्थः यद्वा तरोर्बीजान्यः परिणामो विपाकः
बीजाज्जन्मविपाकात्संयमं नाशं वा विद्वान् तरुसाक्षी सविद्वान् पितरादिलक्षणो द्रष्टा एवं तनोर्द्रष्टा तनोः पृथक् ४९ अ
विवेकेन संसारं प्रपद्यत इत्याह प्रकृतेरिति पंचभिः तत्त्वेन तत्त्वतोऽविविच्य तत्स्पर्शेषु संमूढः सतिव ५० गुणभेदेन त्रि विषयेषु
विधं तत्रापि तत्तारतम्येनैकैकत्र हि विविधसंसारमाह। सत्त्वेति ५१ न चकर्तुरात्मनः कृतकर्मभिर्भ्रमणं तत्राह नृत्यतो गायता
जनाम्नपन अनुकरोति तत्तत्रस्वस्तालादिगति शृंगारकरुणादिवसंबमनस्यनुवर्तयतीत्यर्थः अनुकार्यतेगुणैर्बलादित्यर्थः ५२

अनेन दृष्टांतेन दृश्यधर्मा द्रष्टरि स्फुरतीति दर्शितं उपाधिधर्माध्योपहितेव भासंतद्दृश्य च दृष्टांतमाह । यथांभसे
ति । तीरस्था तरवोपि चलंत इव दृश्यंते । जले प्रतिबिंबितानां चलनादिवेति विषयया हेतुणा मनसा परिकल्पिता एव
तेषु विषये धुलालसया ध्यायतो गुणानवस्तुनः संसृतिर्भवतो नानावस्तुनो निबंधन एव संसारस्य स्वप्ने प्रसृत्याह हेतुगुणाद्या एवमा
संतरस्य च दृष्टांतमाह । चक्षुषेति । ५२ स्वोपनस्यपि मिथ्यात्वे दृष्टांतद्वयमाह । यथेति । यथा एतान् प्रसिद्धा मनोर

यथांभसा प्रचलता तरवोपि चला इव । चक्षुषा भ्राम्यमाणेन दृश्यते भ्रमतीव भूः ५३ यथा मनोर
थधियो विषयानुभवो मृषा । स्वप्नदृष्टाश्च दाशार्ह तथा संसार आत्मनः ५४ अर्थे ह्यविद्यमानेपि संसृ
तिर्न निवर्तते । ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा ५५ तस्मादुद्धव मा भुंक्ष्व विषयानसदिंद्रियैः ।
आत्माग्रहणनिर्भातं पश्य वैकल्पिकं भ्रमं ५६ क्षिप्तोवमानितोसद्भिः प्रलब्धोसूयितोथवा । ताडितः संनि
रुद्धो वा वृत्त्या वा परिहापितः । ५७ निष्ठितो मूत्रितो वाज्ञैर्बहुधैवं प्रकंपितः । श्रेयस्कामः कृच्छ्रगत आत्मना
त्मानमुद्धरेत् ५८

थधियः स्वप्नदृष्टाश्च विषयानुभवा यथा मृषा एवमात्मनोपि विषयानुभवः संसारो मृषा । ५४ ननु यदि मृषा तर्हि
किं निवृत्तिरिति भ्रमेयात्राह । अर्थे हीति । अस्यात्मनः ५५ अतो तत्त्वोपायमेनोन कर्तव्य इत्याह । तस्मादिति । ५६ दुःखप्रतीकारा
य मनापि परिस्य ज्यपरमेश्वर निष्ठेनैव भाव्यमित्याह । क्षिप्त इति द्वाभ्यां क्षिप्त आक्षिप्तः नुन्न इति वा । प्रलब्ध उपहसितः ५७
निष्ठितः निष्ठीवनविषयीकृतः मूत्रितः मूत्रव्याप्तीकृतः प्रकंपितः परमेश्वर निष्ठतया न्यायाविलापितः कृच्छ्रगतः कष्टं प्राप्तोपि ५८
एवं तदुक्तं यथा बुध्येयं तथा नः सर्वत्र अस्ति वद । तद्धर्मनिरतानां तेविदुषामपि असद्भिः कृतमतिक्रमं अपराधं सुदुःसहं मन्ये इत्यन्वयः ५९
६ उद्धव उवाच । यथैवमनुबुध्येयं वदनो वदतां वर ॥ सुदुःसहमिमं मन्य आत्मन्यसदतिक्रमं ५९

[illegible] अयथावत्सुसह मन्यताच नयः ५०
एवं सु[illegible]प्रभु[illegible]व्यवस्थानं सर्व[illegible]लभि[illegible]तान्तेन बहु[illegible]
प्रकृतिस्वभावः। ६० निरस्य सर्वसंदेहं [illegible] दुर्ज्ञानं प्रत्याशितं रहस्यं तं ज्ञानमिश्वरमीश्वरं ६० इतीश्रीभागवते महा
पुराणे एकादशस्कंधे द्वाविंशतितमोध्यायः॥ ॥त्रयोविंशतितमे [illegible] दुर्जनोपाय ईर्यते। भिक्षुगीताप्रकारेण मनसः संयमो
धिया। १ दुर्जनोपकृतोन्नं दुःसहोपि महीयसां॥ अन[illegible]तुभिरध्यायैः सहनोपायवर्णनं। २ तत्रतावदस्मिन्नध्याये भिक्षु
गीतया मनोविजयः। ३ तस्मिन् प्रकृति पुरुषविवेकः। तदुत्तरस्मिन्नुपायांतरैर्विजयः ततः परस्मिन्नैलगीतैर्विषयसंगत्यागेन
[illegible] ५१ विदुषामपिवि
[illegible]ज्ञानं [illegible] इतीश्रीभागवते महापुराणे एकादशस्कंधे द्वाविंशतितमोध्यायः। ॥७॥श्री
आत्मन्प्रकृतिर्विलीयसे ६० इतीश्रीभागवते महापुराणे एकादशस्कंधे द्वाविंशतितमोध्यायः। ॥७॥श्री
बादरायणिरुवाच। स एवमाशंसित उद्धवेन भागवतमुख्येन दाशार्हमुख्यः॥ सभाजयन्भृत्यवचो मुकुंदस्तमाब
भाषे श्रवणीयवीर्यः। १ श्रीभगवानुवाच। बार्हस्पत्य स नास्त्यत्र साधुर्वै दुर्जनेरितैः। दुरुक्तैर्भिन्नमात्मानं यः समा
धातुमीश्वरः २ न तथा तप्यते विद्धः पुमान्बाणैस्तु मर्मगैः। यथा तुदंति मर्मस्था ह्यसतां परुषेषवः ३ कथयंति
महत्पुण्यमितिहासमिहोद्धव॥ तमहं वर्णयिष्यामि निबोध सुसमाहितः ४ केनचिद्भिक्षुणा गीतं परिभूतेन दु
र्जनैः। स्मरता धृतियुक्तेन विपाकं निजकर्मणां ५
सत्संग इति क्रमेणोपायान्भगवता वर्णयति। आशंसितः प्रार्थितः भृत्यस्य वचः सत्कुर्वन् तं प्रति आबभाषे। तत्र तावद्दुर्जनकृत १
तल्लद्धवं संभ्रमयतिद्वाभ्यां। हे बार्हस्पत्य बृहस्पतेः शिष्य अत्र लोके स[illegible]धुर्नास्ति यो दुर्जनोक्तैः भिन्नं क्षुभितं मनः शमयितुमी
श्वरः स्यात् २ ३ कुतः इत्यत आह। विद्धःइत्यर्थः मर्मस्थाः मर्मस्वव नित्यं स्थिताः परुषाः कुरूपाः इषवः तुदंति व्यथयंति तथा दुर्जनेरु बाणा
न तुदंति। अतस्तैः अस्तथा न तप्यते इत्यर्थः। तथापि मया वक्ष्यमाणैरुपायैः सर्वं सोढुं शक्यमित्यभिप्रायेणेतिहासं प्रस्तौति। गि
३ महद्यथा भवति तथा पुण्यमितिहासं गाथां कथयंति ४ ५ श्रीराम[illegible]राम जय जय राम। श्रीवासुदेवायनमः श्रीशिवराम

भा॰ए॰

७५

स तु भिक्षुः पूर्वं धनाढ्यः कृष्याद्यर्जितस्य धनस्य नाशेन संतप्यमानो निर्विण्णः सन् प्रव्रज्य भिक्षामटन् दुर्जनैरुपद्रु
तः प्रस्तुतां पयोगिनीं गाथामगायदिति वक्तुं तस्य चरितमाह अवंतिष्वित्यादिना। अवंतिषु मालवेषु वार्ता कृषिवाणि ति
ज्यादिरूपा वृत्तिर्यस्य कदर्यस्तु स्मृतावुक्तः आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयन् देवतातिथिभृत्यांश्च स कदर्य इति
स्मृत इति ६ तस्य ये ज्ञातयो बांधवाः अतिथयो ध्वनीनाश्च तेन नार्चिता इत्यर्थः। शून्यावसथे धर्मकर्महीने गृहे देहे वा ७ ८

उपः अवंतिषु द्विजः कश्चिदासीदाढ्यतमः श्रिया। वार्तावृत्तिः कदर्यस्तु कामी लुब्धोतिकोपनः ६ ज्ञातयोतिथ
यस्तस्य वाङ्मात्रेणापि नार्चिताः। शून्यावसथ आत्मापि काले कामैरनर्चितः ७ दुःशीलस्य कदर्यस्य
द्रुह्यंते पुत्रबांधवाः दारा दुहितरो भृत्या विषण्णा नाचरन्प्रियं ८ तस्यैवं यक्षवित्तस्य च्युतस्योभयलो
कतः धर्मकामविहीनस्य चुक्रुधुः पंचभागिनः ९ तदवध्यानविस्रस्तपुण्यस्कंधस्य भूरिद अर्थोप्य
गच्छन्निधनं बह्वायासपरिश्रमः १० ज्ञातयो जगृहुः किंचित्किंचिद्दस्यव उद्धव दैवतः कालतः किंचिद्ब्रह्मबं न
धोर्नृपार्थिवात् ११ स एवं द्रविणे नष्टे धर्मकामविवर्जितः उपेक्षितश्च स्वजनैश्चिंतामाप दुरत्ययां १२ श्री प
तस्यैवं ध्यायतो दीर्घं नष्टरायस्तपस्विनः। खिद्यतो बाष्पकंठस्य निर्वेदः सुमहानभूत् १३ श्रीराम

यक्षाणां वित्तमिव केवलं रक्षणीयं वित्तं यस्य पंचभागिनः पंचयज्ञदेवताः ९ तेषामवध्यानमनादरः तेन विस्रस्तो
विशीर्णः। पुण्यस्कंधः अर्थलाभहेतुः स्कंधो यस्य तस्य बह्वायासैः कृष्यादिभिः केवलं श्रमो यस्मिन् संक्लेशेन नि १० राम
धनमगच्छत् तदाह ज्ञातय इति ११ दस्यवः दाहादिना। कालतः निखातं धान्यादि नृणां पार्थिवानां वह्वहे स्यंत ७५
स्मात् ११ १२ नष्टरायः नष्टा रा अर्था यस्य स नष्टरायः तस्य। तपस्विनः संतप्तस्य १३ श्रीरामजयरामजयजयराम

मेमयाआत्मादेहः वृथैवात्मानुतापनं प्रपंचयति। नधर्मायेत्यादिना। यस्यार्थायासस्तेनमया १४ नरका
१६ यचसत्यर्थधर्मानुभावात् १५ श्वित्रः श्वेतकुष्ठं निरूप्यमाणोर्थोनर्थहेतुरेवेत्याह त्रिभिः अर्थस्येति सिध्यप्य
र्थेतस्योत्कर्षे वर्धने। नाशोपभोगयोर्द्वंद्वैक्यं नाशोपभोगे वित्यर्थः साधनोत्कर्षयोरायासः ततस्त्रासः चिंता

स्याहेदमहो कष्टं यथात्मा मेनुतापितः। नधर्माय नकामाय यस्यार्थायास ईदृशः १४ प्रायेणार्थाः क
दर्याणां नसुखाय कदाचन इहचात्मोपतापाय मृतस्य नरकाय च १५ यशो यशस्विनां शुद्धं श्लाघ्या
ये गुणिनां गुणाः लोभः स्वल्पोपि तान्हंति श्वित्रो रूपमिवेप्सितं १६ अर्थस्य साधने सिद्धउत्कर्षे रक्ष
णे व्यये। नाशोपभोग आयासस्त्रासः चिंता भ्रमो नृणां १७ स्तेयं हिंसानृतं दंभः कामः क्रोधः स्मयो
मदः। भेदो वैरमविश्वासः संस्पर्द्धा व्यसनानि च १८ एते पंचदशानर्था ह्यर्थमूला मता नृणां तस्मादन
र्थमर्थाख्यं श्रेयोर्थी दूरतस्त्यजेत् १९ भिद्यंते भ्रातरो दाराः पितरः सुहृदस्तथा एकास्निग्धाः काकिणि
ना सद्यः सर्वेरयः कृताः २० अर्थेनाल्पीयसा ह्येते संरब्धा दीप्तमन्यवः त्यजंत्याशु स्पृधो घ्नंति सहसोत्सृज्य सौ
हृदं २१ लब्ध्वा जन्मामरप्रार्थ्यं मानुष्यं तद्द्विजाग्र्यतां तदनादृत्य ये स्वार्थं घ्नंति यांत्यशुभां गतिं २२

नेवेत्रोजमहति १७ किंबहुना अर्था एवानर्था इत्याह त्रयः पंचदशानर्थाः प्रासेर्थेस्मिं दया व्यसनैः सह नव व्यसनानि स्त्रीद्यूतम
द्यमिति यथायोग्यं १८ एकास्निग्धाः संप्रत्ययन्तिः कायांत्रियंते स्वर्गार्थं यजंति। एकास्निग्धाः रते एकप्राणाः ते
षट् आस्निग्धाः अतिप्रियाः अस्यर्थं कुतः काकिणीना पुंसां मार्षविंशति लघ्वी टिंका किणी तया २० संरब्धाः क्षुभिताः
स्पृधः स्पर्धमानाः २१ इहतावदर्थनिष्ठानामेतेनर्थाः परलोके स्वनर्थ एव तेषामित्याह। लब्ध्वेति द्विभिः मानुष्यं जन्म

मा ४ का २

अमरप्रार्थ्यतां दर्शयन्नाह। स्वर्गेति। लोकं देहं। अनुषज्जेत आसक्तिं कुर्यात् २३ न्यपयोमनुष्यस्य तत्रभरणप त्रयार्दैन
ताः देवपितृभूतानां तरेषु ज्ञातयः सगोत्राः बांधवा विवाहादिना संबधाः तान् अन्यांश्च भागिनः भागार्हान् आत्मा
नं च असंविभज्य अन्नादिभिरसंतर्प्य २४ एवं विमृश्य अनुतप्यमान आह व्यर्थयार्थेहया प्रमत्तस्य मम वित्तादि
गलमितिशेषः येन वित्तादिना कुशला विवेकिनः सिध्यंति मुच्यंते जरठः वृद्धः २५ अन्यमपि संद्रष्टांत्राव

स्वर्गापवर्गयोर्द्वारं प्राप्य लोकमिमं पुमान् द्रविणे कोनुसज्जेत मर्त्योनर्थस्य धामनि २३ देवर्षि
पितृभूतानि ज्ञातीन्बंधूंश्च भागिनः असंविभज्य चात्मानं यक्षवित्तः पतत्यधः २४ व्यर्थयार्थेहयावि
त्तं प्रमत्तस्य वयो बलं कुशला येन सिध्यंति जरठः किंनु साधये २५ कस्मात्संक्लिश्यते विद्वान्व्यर्थया
र्थेहयासकृत् कस्यचिन्मायया नूनं लोकोयं सुविमोहितः २६ किं धनैर्धनदैर्वा किं कामैर्वा कामदैरुत मृत्युना
स्य ग्रमानस्य कर्मभिर्वोत जन्मदैः २७ नूनं मे भगवांस्तुष्टः सर्वदेवमयो हरिः येन नीतो दशामेतां निर्वेदश्चात्म
नः प्लवः २८ सोहं कालावशेषेण शोषयिष्येंगमात्मनः अप्रमत्तोखिलस्वार्थे यदि स्यात्सिद्ध आत्मनि २९
तत्र मामनुमोदेरन्देवास्त्रिभुवनेश्वराः मुहूर्तेन ब्रह्मलोकं खट्वांगः समसाधयत् ३० श्रीभगवानुवाच

ति। कस्मादेवमनर्थं विद्वानपि संक्लिश्यति। कारणं संभावयति। कस्यचिदिति २६ ननु नायं मोहितः क्लिश्यति किंतु धनादि
भिर्भोगादिसिद्धिस्तयाह। किं धनैरिति। उत पुनरपि २७ इदानीं संपन्नविवेकः सहर्षमाह। नूनमिति त्रिभिः। येन श्री
हरिणा आत्मनः प्लवरूपो निर्वेदश्च सर्वतिसहर्षमेतेन प्रीतो जातः इति। २८ अंगं शोषयिष्ये न्यसाय विषयालंबने व्यामिय
दिस्पात्कालावशेषः स्वर्गं शीघ्रमन्येव सिद्धः खलु भवतु अखिलस्वार्थे धर्मादिसाधने अप्रमत्तः सन् २९ अनुमोदरन् अनुगृ

घ३ घ२

अभिप्रेत्य निश्चित्य अश्राव्यं स्यः अवंति देशभावः। हृदयग्रंथीन् अहंकारममकारान् ३१ असंगः आसक्तिरहित्यः अ
लक्षितः श्रेष्ठमथोतयन् ३२ प्रवयसं वृद्धं अवधूतं मालिनं। पर्यभवन् अवमेनिरे। हे तद्रूपधीत्तनिभिः। तिरस्का
रैः। ३३ परिभावानेव दर्शयति। केचिदिति सप्तभिः। सोऽभगवन्न् हरणं तिरदर्शितानि संतितानि प्रदायव पुनश्चाददुः ३४

श्रीभगवानुवाच। इत्यभिप्रेत्य मनसा ह्यावंत्यो द्विजसत्तमः। उन्मुच्य हृदयग्रंथीं शांतो भिक्षुरभून्मुनिः ३१
स चचार महीमेतां संयतात्मेंद्रियानिलः। भिक्षार्थं नगरग्रामानसंगोऽलक्षितो विशत् ३२ तं वै प्रवयसं भि
क्षुमवधूतमसज्जनाः। दृष्ट्वा पर्यभवन्भद्र बह्वीभिः परिभूतिभिः। ३३ केचित्त्रिवेणुं जगृहुरेके पात्रं कमं
डलुं। पीठं चैके क्षसूत्रं च कंथां चीराणि केचन। प्रदाय च पुनस्तानि दर्शितान्याददुर्मुनेः ३४ अन्नं च भैक्ष
संपन्नं भुंजानस्य सरित्तटे। मूत्रयंति च पापिष्ठाः ष्ठीवंत्यस्य च मूर्धनि ३५ यतवाचं वाचयंति ताडयं
ति न वक्ति चेत्। तर्जयंत्यपरे वाग्भिः स्तेनोऽयमिति वादिनः ३६ बध्नंति रज्ज्वा तं केचिद्बध्यतां बध्यतामिति।
क्षिपंत्येके वजानंत एष धर्मध्वजः शठः। क्षीणवित्त इमां वृत्तिमग्रहीत्स्वजनोज्झितः ३७ अहो एष महासा
रो धृतिमान् गिरिराडिव। मौनेन साधयत्यर्थं बकवद्दृढनिश्चयः ३८ इत्येके विहसंत्येनमेके दुर्वातयंति च।
तं बबंधुर्निरुरुधुर्यथा क्रीडनकं द्विजं ३९ एवं स भौतिकं दुःखं दैविकं दैहिकं च यत्। भोक्तव्यमात्मनो दिष्टं
प्राप्तं प्राप्तमबुध्यत ४०

अन्ये मूत्रयंति। मूर्ध्नि ष्ठीवंति श्लेष्माणं प्रक्षिपंति ३५ ३६। क्षिपंति निंदंति। निंदामेवाह। एष धर्मध्वजः त्रिदंडलिं
ठीवी गोपः शठो लोकवंचकः ३६ नदेवाहः क्षीणवित्त इति ३७ महासारः अतिबली ३८ दुर्वातयंति तद्दुष्पर्यधोवायुं मुंचंति बब
धुः बलेः निरुरुधुः। कारायगादिषु द्विजं क्रीडासारिकादि यथा ३९ भौतिकं दुःखं नादिकृतं दैहिकं ज्वरादि निमित्तं दैविकं शी

४० [illegible]

धर्मोस्मान्नयद्भिः परिभूतोपि सात्त्विकीं धृतिमास्थाय स्वधर्म एव स्थित इमां वक्ष्यमाणां गाथामगायत् सात्त्विकीं धृ-
तिं धृत्या यया धारयते मनः प्राणेन्द्रियक्रियाः योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी इति स्मृतेः ४१ ता-
मेवाष्टचत्वारिंशद्भिर्गाथामाह। नायमिति। न यात्मा नापि ग्रहादयः। मनः परं केवलं सुखदुःखयोः कारणं वदन्ति मन-
सा ह्येव पश्यति मनसा शृणोतीत्यादिश्रुतयः ४२ परिवर्तप्रकारमेवाह मन इत्यादि गुणान्गुणवृत्तीः सृजति। ततश्च
तेभ्यो गुणेभ्यः शुक्लानि सात्त्विकानि। कृष्णानि तामसानि। लोहितानि राजसानि। सवर्णाः तत्तत्कर्मानुरूपाः सृत-

परिभूत इमां गाथामगायत नराधमैः। पातयद्भिः स्वधर्मस्थो धृतिमास्थाय सात्त्विकीं ४१ द्विज उवाच॥
नायं जनो मे सुखदुःखहेतुर्न देवतात्मा ग्रहकर्मकालाः। मनः परं कारणमामनन्ति संसारचक्रं परिवर्तयेद्य-
त्। ४२ मनो गुणान्वै सृजते बलीयस्ततश्च कर्माणि विलक्षणानि। शुक्लानि कृष्णान्यथ लोहितानि
तेभ्यः सवर्णाः सृतयो भवन्ति ४३ अनीह आत्मा मनसा समीहता हिरण्मयो मत्सख उद्विचष्टे। मनः
स्वलिंगं परिगृह्य कामान्जुषन्निबद्धो गुणसंगतोसौ ४४ श्रीरामजयरामजयरामजयजयरामश्रीव

यः देवतिर्यङ्नरादिगतयः ४३ तर्हि मनस एव संसारः स्यान्नात्मन इत्याशंक्याह अनीह इति अयमर्थः। अविद्यया
मनोध्यासेनैव मनःसंसृतिर्न तु स्वतः यतस्तत्कृतेस्य शरस्य मानवस्ति। किंतु तद्धतो जीवस्यैवेति। तदेतदाह। मन-
सा समीहमानेन सह नियंतृत्वेन वर्तमानोपि परमात्मा अनीहः तत्क्रियासंगरहितः। यतो हिरण्मयः विद्याशक्तिः प्र-
धानः कुतः यतो मत्सखः ममजीवस्य सखा नियंता। अतः उतद्वैविंवष्टे अतिरोहितज्ञानेन केवलं पश्यतीत्यर्थः असौ
पुनरयं जीवः स्वलिंगं स्वस्मिन्नात्मनि लिंगयति द्योतयति संसारमिति तथा तं मनः परिगृह्य आत्मत्वेन स्वीकृत्य तस्य
मनसो गुणैः कर्मभिः संगतः संबद्धः गुणसंगात्कामान्जुषन्निबध्यत इति ४४ श्रीरामजयरामजयजयरामश्री

५ न किंचिदित्यर्थः

अतो मनोनिग्रहे सर्वं चेत्कृतं स्यात् तं विना तु सर्वं व्यर्थमित्याह दानमिति द्वाभ्यां। स्वधर्मः नित्यनैमित्तिकः। सद्व्रता
न्येकादश्युपवासादीनि। अन्यानि च यावंति कर्माणि। एते सर्वे उपाया मनोनिग्रहलक्षणः अंतो निष्ठा फलं येषां
स ते तथा। ननु श्रुतांगत्वे तेषां प्रसिद्धं। तत्राह मनःसमाधिर्निग्रह एव परो योगः ज्ञानं ४५ अतो यस्य मनः समाहितं
भवति। तस्य किं कृत्यमस्ति। वदेति परं प्रत्युपदिष्टा। किंच यस्य मनो नाहा असंयतं विक्षिप्तं चेत्तस्य दाविलत्स्यत्क्वालस्यादि
नालीयमनं वेद्द वेत्। तर्हि एभिर्दानादिभिः किमपरं प्रयोजनं स्यात् ४६ ननु चित्तेंद्रियजयः प्रयोजनं स्यान्नेत्याह

दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्माणि च सद्व्रतानि। सर्वे मनोनिग्रहलक्षणांताः परो हि योगो मनसः
समाधिः। ४५ समाहितं यस्य मनः प्रशांतं दानादिभिः किं वद तस्य कृत्यं। असंयतं यस्य मनो विन
श्यद्दानादिभिश्चेदपरं किमेभिः ४६ मनोवशेन्ये ह्यभवंस्म देवा मनश्च नान्यस्य वशं समेति। भीष्मो
हि देवः सहसः सहीयान्युंज्याद्वशे तं स हि देवदेवः ४७ तं दुर्जयं शत्रुमसह्यवेगमरुंतुदं तन्न विजि
त्य केचित्। कुर्वंत्यसद्विग्रहमत्र मर्त्यैर्मित्राण्युदासीनरिपून्विमूढाः ४८ श्रीरामजयराम शिव

मनोवशे भवंति। देवाः इंद्रियाणि तदधिष्ठातारो वा। भीष्मः भयंकरो मनो लक्षणो देवः। कुतः। सहसः बलाद
पि बलिनोपि वा सहीयान् बलीयान्। अतस्तं यो वशवर्तिनं कुर्यात् स एव देवदेवः सर्वेंद्रियजेता भवति नान्यः। तथा च श्रुतिः
मनसा वशे सर्वमिदं बभूव नान्यस्य मनो वशमन्वियाय। भीष्मो हि देवः सहसः सहीयानिति ४७ अतः असह्यारोग
दयावेगो यस्य तं। अत एव अरुंतुदं अरुर्मर्म तत्तुदति व्यथयतीत्यरुंतुदः तं तन्न जेति केचित् न जित्वेत्यर्थः अजितात्तत्र
नत्वेके विमूढाः केचिदसद्विग्रहं कुर्वंति तिच्चवान् कुलप्रतिकूलादीन् अन्यान्मित्रादींश्च कुर्वंतीति मूढा इत्यर्थः ४८
नू

ततश्चानेन प्रकारेण संसारे भ्रमंतीत्याह देहमिति। मनोमात्रं परिकल्पितमिमं स्वदेहमिति पुत्रादिदेहं च ममेति
स्वीकृत्य तमसि संसारे ४९ तदेवं मनस एव सुखदुःखकारणत्वमुपपाद्येदानीं जनादीनां षण्णां कारणत्वं प्रपंचय
ति जन इति षड्भिः। अत्र च अस्मिन्नपि पक्षे आत्मनः किं न किंचित् सुखदुःखकर्मतां तत्कर्तृत्वं चेत्यर्थः। कुत इत्यत आ
ह। हि निश्चितं सोऽयं भौमयोर्विकारयोर्देहयोस्तत् न त्वात्मनः। अमर्त्ये स्वस्मिन्निव परस्य च हन्तृत्वादि मत्वा कोपः कर्तुं नोपपद्यते। तथा
पि दुःखमात्मपर्यवसायीत्येवं निर्वेदः। एवमपि परमात्मन उभयत्रापि एकत्वात् कोपविषयोऽस्तीति स दृष्टान्तेन दर्शयति।

देहं मनोमात्रमिमं गृहीत्वा ममाहमित्यन्धधियो मनुष्याः। एषोऽहमन्योऽयमिति भ्रमेण दुरंतपारे तमसि
भ्रमंति ४९ जनस्तु हेतुः सुखदुःखयोश्चेत् किमात्मनश्चात्र हि भौमयोस्तत्। जिह्वां क्वचित्संदशति स्वदद्भिस्त
द्वेदनायां कतमाय कुप्येत् ५० दुःखस्य हेतुर्यदि देवतास्तु किमात्मनस्तत्र विकारयोस्तत्। यदंगमंगेन
निहन्यते क्वचित् क्रुध्येत कस्मै पुरुषः स्वदेहे ५१ आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजस्व
भावः। न ह्यात्मनोऽन्यद्यदि तन्मृषा स्यात् क्रुध्येत कस्मान्न सुखं न दुःखं ५२ श्रीराम जयराम जय जयराम।

जिह्वामिति ५०। यदि देवता। अस्तु नाम। तत्रापि पक्षे आत्मनः किं यतो विकारयोर्विक्रियमाणयोर्देवतयोस्तत्। हस्तेन मुखे निहते
तेन वा हस्ते दष्टे तदभिमानिनोर्वह्नीन्द्रयोरेव तत्। न तु विक्रियस्य। न ह्यकार्यस्य चात्मनः। देवतानां च सर्वदेहेषु एकत्वात् कोपविषयोऽस्ती
ति सदेहदृष्टान्तमाह। यदंगं यदा अंगं देवताधिष्ठानं हस्तं मुखादि। अत एव सर्वत्र देवताधिष्ठानरूपमुभिकारं दंतोदाहरणं ५१
आत्मनः सुखदुःखाद्याकारः परिणामः। अतः स एव हेतुर्यदि स्यात्तत्र तस्मिन्पक्षे अन्यतः किं न किंचिदन्यतो भवति यस्मै कुप्येदित्य
र्थः। यतो निज एव स्वभावः। न चात्मनस्तथा परिणामोऽन्यनिमित्तो भवति। अतो नास्ति कोपविषय इति त्वाह। न हीति आत्म
व्यतिरिक्तं नास्त्येव। यदि स्यात् अस्तीति प्रतीयते तर्हि तन्मृषैव। अतः कस्माद्धेतोः क्रुध्येत। यतो नास्ति निमित्तं न च सुखं दुःखं चेत्यर्थः।

ग्रहपक्षेप्यजस्यात्मनः किं। यतो जन्यत इति जनो देहस्तस्यैव जन्मलग्नापेक्षया द्वादशाष्टमादिराशिस्थास्ते सुखदुःखयोर्निमि
त्तं भवंति। किंच अंतरिक्षस्थैर्ग्रहैस्तत्रस्थस्य ग्रहस्यैव पूर्वादिदृष्ट्यादिभेदैः पीडां वदंति। देवज्ञाः न तु ग्रहकोणादिषु स्थितस्य तद्द्र
ष्टृत्वगोचरस्य पुरुषस्य ग्रहगतै[illegible] खलु पीडा तत्स्पर्शो मन्ये देहे तस्याभिमानाद्भवति। अतः पुरुषः ततोऽयं ग्रहात्तद्देहाच्चान्यः कस्मै कुप्ये
त ५३ कर्महेतुश्चेत्। अस्मिन्नस्य कस्यापगमः। कर्मैव नास्ति कुतस्तद्धेतुकमिति। तदाह। हि यस्मात्तत् [illegible] कर्म एकस्य जडाजडत्वे सति स्यात्क
र्तृत्वादिकारित्वोपपत्तेः। अजडत्वाद्धि हितानुसंधानतः प्रवृत्तिसंभवात्। अवि[illegible]त्र जडे देहे [illegible]तस्तस्य प्रवृत्तिर्न संभवति। पुरुष

ग्रहा निमित्तं सुखदुःखयोश्चेत्किमात्मनोऽजस्य जनस्य ते वै। ग्रहैर्ग्रहस्यैव वदंति पीडां कुप्येत कस्मै पुरुषस्ततोऽन्यः ५३
कर्मास्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तद्धि जडाजडत्वे। देहस्त्वचित्पुरुषोऽयं सुपर्णः कुप्येत कस्मै नहि कर्ममूलं ५४
कालस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तत्र तदात्मकोऽसौ। नाग्नेर्हि तापो न हिमस्य तत्स्यात्कुप्येत कस्मै न परस्य द्वंद्वं ५५
न केनचित्क्वापि कथंचनास्य द्वंद्वोपरागः परतः परस्य। यथाहमः संसृतिरूपिणः स्यादेवं प्रबुद्धो न बिभेति भूतैः ५६

स्तु सुपर्णः शुद्धज्ञानः स्वरूपः अतः कस्मै कुप्येत् अयं ततः सुखदुःखयोर्मूलभूतं कर्मैव नास्तीति ५४ तत्र कालपक्षेपि आत्मनः किं यतो
सावात्मा कालात्मक एव। अंशांशिनोरभेदात्। स च नास्य स्वतः पीडाकरोऽस्ति। अत्र दृष्टांतः नाग्नेर्हि तेजोंशस्य ज्वालादेस्तापो [illegible]नोपाधिभूत
काष्ठादिदाहात्मनाशः स्यादिति दृष्टांतांतरमाह हिमस्य तदंशस्य तदंशस्य तु पारकणस्य नाशकं न स्यादित्यर्थः। किंच। आत्मानं प्रति
वस्तुतः पर एवायं। न च परस्य द्वंद्वं सुखदुःखे संभवतीति ५५ तदेवं षड्भिर्हेतवः प्रतिषिद्धा निरस्ताः यदि कश्चिदेतं तं तरमुक्तवापयेदा
पि वस्तुमहिमावेक्षायां न संभवतीत्याह न केनचिदिति। ननु परोक्षः कथमप्युपपद्यते तत्राह यथेति। संसृतिमविद्यमानामेव कल्पयतीति त
थातस्य अहमः अहंकारस्य यथा स्यात्। न तथा परस्य प्रकृतेः परस्यात्मनो द्वंद्वसंबंधः अहंकारनिमित्तोऽसौ न वास्तव इत्यर्थः। एवं प्रबु
द्धोयः स भूतैः कृतान बिभेति ५६ श्रीरामजयरामजय जयराम श्रीवासुदेवाय नमः श्रीगोपालकृष्णाय नमः वेंकटेशाय नमः श्री

स्त

श्रि

दाहतो नाशो
[illegible]स्तित

अतोहमप्येतयैव परमात्मनिष्ठया तरिष्यामीत्याह एतामिति। सोहमित्यन्वयः नन्वियंनिष्ठैव कथंसंभवेत्तदाहमुकुंदेति ५७ प्रस्ता
वेनसहगाथार्थंसंक्षेपतो दर्शयति द्वाभ्यां नष्टद्रविणानिर्विद्यगतक्लमः प्रव्रज्यगांपर्यटन्नसद्भिर्निराकृतोपिस्वधर्मादकंपितःस
न्नमुनिरमुंगाथामगायदित्यन्वयः ५८ मित्रोदासीनरिपवः सर्वोपिसंसारः अज्ञानतः आत्मनो मनसोविभ्रममात्रंकृतः नतु ता तमसः
तस्मादिति त्त्विक इत्यर्थः ५९ मुक्तंद्वंद्वसहत्वोपायमुपसंहरति ६० मनोनिग्रहमात्रेणैव एतच्छ्रवणादिनिष्ठस्तत्फलंप्राप्नोतीत्याह यइति द्वं
द्वैः सुखदुःखादिभिः भिक्षुणागीतनिष्ठं ब्रह्मात्मक चित्तगतंहरिः। मोहंनिर्भज्य हत्वाति परमानंदरूपतः ६१ इत्येकादशेत्रयोविंशः।

एतांसमास्थायपरात्मनिष्ठामध्यासितांपूर्वतमैर्महर्षिभिः। अहंतरिष्यामिदुरंतपारंतमोमुकुंदांघ्रिनिषेवयैव ५७
श्रीभगवानुवाच। निर्विद्यनष्टद्रविणेगतक्लमः प्रव्रज्यगांपर्यटमानइत्थंनिराकृतोसद्भिरपिस्वधर्मादकंपितोमूंमुनि
राहगाथां ५८ सुखदुःखप्रदोनान्यः पुरुषस्यात्मविभ्रमः। मित्रोदासीनरिपवः संसारस्तमसःकृतः ५९ तस्मात्स
त र्वात्मनातातनिगृहाणमनोधिया। मय्यावेशितयायुक्तएतावान्योगसंग्रहः ६० यएतांभिक्षुणागीतांब्रह्मनिष्ठांसमा
व हितः। धारयंश्छ्रावयंछृण्वन्द्वंद्वैर्नैवाभिभूयते ६१ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेत्रयोविंशोध्यायः श्री
श्रीभगवानुवाच अथतेसंप्रवक्ष्यामिसांख्यंपूर्वविनिश्चितं। यद्विज्ञायपुमान्सद्योजह्याद्वैकल्पिकंभ्रमं १

चतुर्विंशेतुसांख्येन मनोज[illegible]मोहोनिवार्यते। आत्मनः सर्वभावानामागमापायचिंतया। स्वपदद्वंद्वभक्तानामद्वंद्वं
त्वायसंयमं। चित्तस्योक्त्वापुनः कृष्णः सांख्यमत्राहतत्कृते। अद्वितीयात्परमात्मनोमायया प्रकृतिपुरुषद्वारास
र्वंद्वैतमुदेति पुनःतत्रैवलीयत इत्यनुसंधानस्य द्वंद्वभ्रमोनिवर्तत इति वक्तुं सांख्यंप्रस्तौति। अथेति पूर्वैः
कपिलादिभिर्विनिश्चितं। वैकल्पिकंभेदनिमित्तंभ्रमंसुखदुःखादिरूपं १ सांबसदाशिवायनमः

अथोत्पद्धः कालस्थैर्यज्ञानदृष्ट्या तेन दृश्यः कृतो ऽर्थश्चाविकल्पकस्त्वेकमेवब्रह्मण्येव लीनमासीदित्यर्थः। कदेत्यपेक्षा
यामाह अयुगे युगेभ्यः पूर्वं प्रलय इत्यर्थः तथा आदौ पश्चात्कृतयुगं तस्मिंश्च अन्यदापि यदा विवेकनिपुणा जना भ
गो वंति तदापि तेषां भेदास्फूर्तेः २ तदिदं द्वैतं वाङ्मनोगोचरं यथा भवति तथा माया द्रव्यं कलतत्त्वकाशः तद्रूपेण माया
विलास[illegible]रूपेण वा द्विधाभूत् ३ तयोर्द्विधाभूतयोरंशयोर्मध्ये उभयात्मिका कार्यकारणरूपिणी ४ अभवत्

ज्ञानसत्त्वज्ञानमथो अर्थ एकमेवाविकल्पितं यदा विवेकनिपुणा आदौ कृतयुगे युगे २ तन्मा
याफलरूपेण केवलं निर्विकल्पितं वाङ्मनोगोचरं सत् द्विधा समभवद् बृहत् ३ तयोरेकतरो
ह्यर्थः प्रकृतिः सोभयात्मिका ज्ञानं त्वन्यतमो भावः पुरुषः सोभिधीयते ४ तमो रजः सत्त्वमि
ति प्रकृतेरभवन्गुणाः मयाप्रक्षोभ्यमाणायाः पुरुषानुमतेन च ५ तेभ्यः समभवत्सूत्रं श्री
महान्सूत्रेण संयुतः ततो विकुर्वतो जातो योहंकारो विमोहनः ६ रामो जयति

अभिव्यक्ताबभूवुः मया परमेश्वरेण जीवादृष्टप्रयुक्तया क्षोभ्यमाणायाः पुरुषानुमतत्वं। यद्वा स्वस्यैव प्रकृतीक्षणरूपा
५ याः पुरुषावस्थातेदनुमतेन तत्सूत्रं। सर्वशिस्त्वं च क्रियाशक्तिमान् पृथमोविकारः ततो महान् ज्ञानशक्तिः।
तत्त्वयं महाजेव प्रथमोविकारः प्रसिद्धः। तत्राह। सत्त्वज्ञानक्रियागर्भत्वात् सूत्रेण संयुतः नपृथक् एकमेव तत्
क्रियाज्ञानशक्तिभ्यां द्विधोच्यत इत्यर्थः॥ चिदाभासव्याप्तत्वादुभययोर्धिरूप्रतिविमोहन जीवस्य भ्रमहेतु सज्जातः दा

भा·पु

८०

यत्तासांमात्रादीनांकारणंमनःशब्देनदेवानामप्युपलक्षणंचिदचिन्मयःचिदाभासव्याप्तत्वादुभयग्रंथिरूपइति
जीवोपाधित्वंदर्शितं। यद्यपि तस्माद्वाएतस्मादात्मनआकाशःसंभूतइत्यादिश्रुतेरन्नमयंहि सोम्यमनइत्या
दिश्रुतेश्च प्रथमंभूतानिजायंते तेभ्यश्चापंचीकृतेभ्यः प्राणादिक्रमेण समष्ट्यात्मकलिंगशरीरं पंचीकृतेभ्यश्च
स्थूलं उं। तस्मिन्वैराजरूपादंतर्यामिलीलाविग्रहक्षीराब्धिशायीश्रीनारायणः। तन्नाभिपद्मेचवैराजस्यभोग
विग्रहःचतुराननः ततोयथावसरमन्येषांजीवानामाविर्भावइतिप्रक्रिया तथापिचित्ताभिव्यक्ति... इति

वैकारिकस्तैजसश्चतामसश्चयहंत्रिवृत् तन्मात्रेंद्रियमनसांकारणंचिदचिन्मयः ७
अर्थस्तन्मात्रिकाज्जज्ञेतामसादिंद्रियाणिच तैजसाद्देवताआसन्नेकादशवैकृतात् ८
मयासंचोदिताभावाःसर्वेसंहत्यकारिणः अंडमुत्पादयामासुर्ममायतनमुत्तमम् ९

कोहंकारस्तामसोभूतेंद्रियादिव्यवहारस्य तत्त्वैः सौ महदादिक्रमेणसृष्टिरुच्यते तथाचोक्तं। यथाग्नेः क्षुद्राविस्फुलिंगा
दाःसृष्टिर्याचोदितान्यथा। उपायःसोवतारायनास्तिभेदःकथंचनेति। ७ तस्मात्त्रिविधात्त्रिविधप्रपंचोत्प
त्तिंदर्शयति। अर्थइति। तन्मात्रिकात्शब्दादितन्मात्रकारणात्तामसात्तद्द्वारार्थोमहाभूतरूपोजज्ञे च भूता
नामावरणस्वभावत्वात्। इंद्रियाणिदशतैजसात्राजसात्तेषांप्रवृत्तिस्वभावत्वात्। वैकृतात्सात्त्विकात्देवताःदिग्वा
तार्कप्रचेतोश्विवन्हींद्रोपेंद्रमित्रकाःचंद्रश्चेत्येकादश। चन्द्रःब्रह्मनश्च तेषांप्रकाशस्वभावत्वात् ८ ममैवराजातयाभिणः ९

राम
८०

सलिले संस्थितिर्यस्य तत् सलिलसंस्थितं तस्मिन् सलिलसंस्थितौ अंडे श्रीनारायणरूपोऽहं अभवं स्थित इत्यर्थः
विश्वाख्यं लोकात्मकं तत्र चात्मभूः चतुराननरूपभोगविग्रहेण पुनर्वै राज एव तस्मिन्नाविर्भूत इत्यर्थः १० रजसा युक्तो म
दनुग्रहात्तपसा सृष्टवान् भूः अतलादिसहिता भुवः अंतरिक्षलोकः स्वः स्वर्गः महर्लोकादेरप्युपलक्षणं ११ लोकसृष्टिप्रयोजन
माह देवानामिति सार्धेन। ओको निवासः। पदं स्थानं त्रितयात्परं महर्लोकादि भूमेरधः अतलादि १२ एवं व्यवस्थायां कारणमाह
सार्धेन। त्रिलोक्यां पातालादिसहितायां योगादिनां तपस्विनां यथोत्तरं महर्लोकादयः मद्गतिर्वैकुंठलोकः १३ १४ तत्र तु मद्गतिव्य

तस्मिन्नहं समभवमंडे सलिलसंस्थितौ। मम नाभ्यामभूत्पद्मं विश्वाख्यं तत्र चात्मभूः १० सोऽसृजत्तपसा युक्तो रजसा मद
नुग्रहात्। लोकान्सपालान्विश्वात्मा भूर्भुवः स्वरिति त्रिधा। ११ देवानामोक आसीत्स्वर्भूतानां च भुवः पदं। मर्त्यादीनां च भूर्
लोकः सिद्धानां त्रितयात्परं अधोऽसुराणां नागानां भूमेरोकोऽसृजत्प्रभुः त्रिलोक्यां गतयः सर्वाः कर्मणां त्रि १२
गुणात्मनां। योगस्य तपसश्चैव न्यासस्य गतयोऽमलाः। महर्जनस्तपः सत्यं भक्तियोगस्य मद्गतिः १४ मया
कालात्मना धात्रा कर्मयुक्तमिदं जगत्। गुणप्रवाह एतस्मिन्नुन्मज्जति निमज्जति १५ अणुर्बृहत्कृशः स्थूलो यो यो भावः प्रसि
द्ध्यति। सर्वोऽप्युभयसंयुक्तः प्रकृत्या पुरुषेण च १६ यस्तु यस्यादिरंतश्च स वै मध्यं च तस्य सन्। विकारो
व्यवहारार्थो यथा तैजसपार्थिवाः १७

य तिरेके। तदा तैश्चैव व्यास्यात् वैराग्यार्थं मया कालशक्तिना धात्रा परमेश्वरेण कर्मफलप्रदेन हेतुभूतेन गुणप्रवाहे संसारे उन्म
ज्जति आसत्यलोकमुन्नमं गतः प्राप्नोति पुनर्निमज्जति आस्थावरं नीचां गतिं प्राप्नोति १५ सृष्टिं निरूप्य कार्यस्थितिं नीयामप्रति
पत्त्यर्थं तादात्म्यं अनिर्वाच्यकारणेन कार्यस्य व्याप्तिमाह। अणुरिति। उभयेन संयुक्तो व्याप्तः न देवाहं प्रकृत्येति १६ इदानीं का
र्यस्य कारणात्मतां दर्शयति। यस्य कार्यस्य यः आदिः कारणं अंतः लयस्थानं च तस्य मध्यं मध्यावस्थापि स एव वै प्रसिद्धं तत्तु
वर्णादिषु अत एवाव्यभिचारित्वात् सत्यं सन्। इतरत् अलं तर्हि मिथ्यात्वं न कार्यस्य तत्राह विकार इति तैजसाः कटककुंडलादयः पा
व

भा०पु० ८१ स्कं ११ अ २४

नन्वेवं तर्हि कार्यं प्रतिमहदादीनामप्याद्यंतरूपता सत्यत्वं स्यात् । तत्राह । आद्य इति । यद्रूपमुपादाय उपादानकारणतया स्वी
कृत्य पूर्वः कारणरूपो महदादिर्भावः परं ओंकारादिकभावं विकुरुते सृजति यथा पिंडाम्रदमुपादाय घटं निमित्तकर्ता
घटं सृजति । तद्वत्स एव सत्यमिति पूर्वं स्यात् तु पर्यनुयोगे हि मृत्तिकेत्येव सत्यमित्यादि श्रुतिः । तत्राह । आदिरिति । यदस्यादिरंत
श्च यदस्य तेन तदात सत्यमित्यभिधीयते श्रुत्या परमकारणस्यान्येनः सत्यत्वविवक्षयेत्यर्थः १८ ननु तथापि प्रकृतिपुरुष
कालानाम कार्यभूतानां भिन्नत्वात्कथमद्वितीयता । तत्राह प्रकृतिरिति । अस्य सतः कार्यस्योपादानं या प्रकृतिः प्रसिद्धा य
श्च तस्या आधारः पुरुषो यश्च गुणक्षोभेनाभिव्यंजकः कालस्तत्त्रितयं ब्रह्मरूपोहमेव न तु पृथक् प्रकृतेः शक्तित्वात्पुरुषका

यदुपादाय पूर्वस्तु भावो विकुरुते परं । आदिरंतो यदा यस्य तत्सत्यमभिधीयते १८ प्रकृतिर्ह्यस्योपादान
माधारः पुरुषः परः सतोभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वहं १९ सर्गः प्रवर्तते तावत्पौर्वापर्येण नित्यशः । महान्
गुणविसर्गार्थः स्थित्यंतो यावदीक्षणं । २० विराण्मयासाद्यमानो लोककल्पविकल्पकः । पंचत्वाय विशेषाय कल्पते
भुवनैः सह । २१ श्री

लयोरंशत्वारूपत्वात् । १९ एवं तावत्कालत्रयेप्यव्यभिचारित्वात् ब्रह्मैव सत्यमिति वक्तुं तस्य सृष्ट्यादिकारणत्वेनादौ
सतत्त्वमुक्तमथ्येपि तस्यैव सत्त्वमुपपादयति पंचभिर्भूतस्तेन तस्य संहर्त्रीत्येषि ष्वेसर्गप्रवाहरूपायाः स्थितेरवधिमात
सर्ग इति । महान्बहुलः । पौर्वापर्येण । पितृपुत्रादिरूपेण । नित्यशः अविच्छेदेन कियंतं प्रवर्तते । तदाह । गुणेषु देहेषु
विविधतया सृज्यत इति गुणविसर्गो जीवः तदर्थः तद्भोगप्रयोजनः किं पर्यंतं प्रवर्तते । यावत्स्थितेरंतः सोपि कियदव
धिः तत्राह यावदीक्षणं परमेश्वरस्य तावत् २० प्रलयं निरूपयति विराडिति । मया कालात्मनासाद्यमानः व्या
प्यमानः लोकानां महरादीनां कल्पाः सृष्टिप्रलयादिविधाः कल्प्यंते यस्मिन् तौ कल्पविकल्पौ कल्पयतीति तथा सन् तथा कृतो ना
शं पंचत्वाय विशेषाय विभागाय कल्पते योग्यो भवति । पंचानां भूतानामेव स्वरूपेणैवावस्थानं पृथगभावापत्त्या नतु नाश इत्यर्थः २१

न्विर

राम ८१

नत्र तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्यो
तें ऽन्नं अन्नात्पुरुष इति श्रुत्युक्तक्रमप्रातिलोम्येन प्रलयमाह अन्नमिति मर्त्यं शरीरं येनोपचितं तत्तस्मिन्नन्नं तु वर्षाभावेन आदित्यरश्मिभिः शोषि
सति तत्रैव लीयत इत्यर्थः अन्नं धानासु बीजमात्रावशेषं भवतीत्यर्थः धाना भूमौ उत्पत्त्यभावे प्ररोहहीना इत्यर्थः भूमिर्गन्धे संवर्तकादित्यरश्मि
तासं कर्षणात्पुरःसराग्निनादग्धा वसतीत्यर्थः सूक्ष्मरूपं गन्धमात्रावशेषा भवति २२ अप्सु गन्धः ततो वर्षैर्घनैः प्लाव्यमाना अप्सु लीयते। एवमग्रे
यत्र ज्योतिषा शोष्यमाणा रसमात्रावशेषा भवन्ति। ततो रसोऽपि तस्मिन्लीयते ज्योतिश्च वायुना अस्तमितं रूपमात्रं सत्तस्मिन्लीयते। वायुश्च
कालप्रेरितेनाम्बरेण ग्रस्तः स्पर्शमात्रः सन् तस्मिन् २३ अम्बरं च भूतादिनाहङ्कारेण ग्रस्यमानं शब्दतन्मात्रे तदेवं तामसाहङ्कारकार्यस्य

अन्नं प्रलीयते मर्त्यमन्नं धानासु लीयते धाना भूमौ प्रलीयन्ते भूमिर्गन्धे प्रलीयते। २२ अप्सु प्रलीयते गन्ध आपश्च स्वगुणे रसे॥
लीयते ज्योतिषि रसो ज्योती रूपे प्रलीयते। रूपं वायौ स च स्पर्शे लीयते सोऽपि चाम्बरे २३ अम्बरं शब्दतन्मात्र इन्द्रियाणि स्वयोनि
षु योनिर्वैकारिके सौम्य लीयते मनसीश्वरे। शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः २५ स लीयते महान् स्वेषु गुणेषु गुणव
त्तमः। तेऽव्यक्ते संप्रलीयन्ते तत्काले लीयतेऽव्यये २६

शब्दपर्यन्तं लयमुक्त्वा राजससाहङ्कारकार्यस्याप्याह इन्द्रियाणि स्वयोनिष्विति स्वप्रवर्तकदेवतासु। तेषां प्रकृतिस्वभावलात्प्रवृत्तेश्च दे
वताधीनत्वात्तासु लय इति चायुक्तिः। वस्तुतस्तु स्वकारणे राजसाहङ्कारे लयोऽपि प्रत्तः। योनिरिति सुद्धेग्रागतवादेकत्वमविवक्षितं। योनि
र्देवतास्तु मनसि। कुतः ईश्वरे नियन्तरि मनोवश्यो ह्येष सर्वे सदेवादित्युक्तत्वात् इन्द्रियलयोक्त एवात्राप्यभिप्रायः मनश्च देवताभिः
श्री सह वैकारिके अहङ्कारे इत्यर्थः। तामसाहङ्कारकार्याणामवशिष्टस्य शब्दस्य लयमाह। शब्दो भूतादिं तामसाहङ्कारमप्येति तस्मिन्लीयते
इत्यर्थः भूतादिरित्युपलक्षणं। त्रिविधोऽप्यहङ्कारो महति। ज्ञानक्रियाशक्तिमात्ररूपत्वात् तिकयं भूतः प्रभुः समर्थः
सर्वजगन्मोहकत्वात् २५ स च महान् स्वकारणेषु गुणेषु ज्ञानक्रियाशक्तिमत्त्वात् गुणवत्तमः स्वभावविलयगुणमात्ररूपो भव
तीति वा व्यक्ते प्रकृतौ। साम्यावस्थां गच्छन्तीत्यर्थः। तद्व्यक्तं काले कालाधीनत्वात्तेन कालरूपत्वेन तिष्ठति तत् अव्यये उपरते सति २६
श्रीरामजयराम जय जयराम श्रीगोपालकृष्णायनमः वसुदेवायनमः रामचंद्रायनमः श्रीगणेशायनमः वेदव्यासायनमः

एवमन्वीक्षमाणस्य कथं वैकल्पिको भ्रमः ॥ मनसो हृदि तिष्ठेत व्योम्नीवार्कोदये तमः ॥ २८ ॥ एष सांख्यविधिः प्रोक्तः संशयग्रंथिभेदनः ॥ प्रतिलोमानुलोमाभ्यां परावरदृशा मया ॥ २९ ॥ +

मायामयेमायाप्रवर्तके ज्ञानमयेवा अत एव जीवयतीति जीवस्तस्मिन्महापुरुषे । अयं भावः ॥ विश्वस्य पूर्वं महापुरुषे कारणरूपः काले इत्यं ज्ञेन सृज्यश्च अतस्तदात्मना वतिष्ठत इति । तदुक्तं स समे कालं वररं तस्तुजे तत्र आश्रयं प्रधानपुंभ्यां नरदेवसत्यकृदिति । तत्रामेव । यो यं कालस्तस्य तेऽव्यक्त बंधो चेष्टाम हुश्चे ष्टते येन विश्वं निमेषादिर्वत्सरांतो महायांस्तं तेशानं क्षेमधाम प्रपद्ये इति । जीव आत्मनि । प्रकृतेलीनत्वेन प्रतियोग्यभावात्परिपूर्णेन स्वरूपेणावतिष्ठते । आभावा । अस्त्वेव नान्यत्र लीयते यतः केवलो निरवधिः अत्र हेतुः । विकल्पापायाभ्यां विश्वो त्पत्तिलयाभ्यां लक्ष्यते । अधिष्ठानत्वेनावधित्वेन चेति तत्र थासः २७ ॥ इति श्री भा० एकादशे चतुर्विंशः ॥ ॥ ॥

कालो माया जीव आत्मनि मय्यजे । आत्मा केवल आत्मस्थो विकल्पापायलक्षणः २७ इति श्रीभागवते महापुराणे एकादशस्कंधे चतुर्विंशोऽध्यायः ॥ ॥ श्रीभगवानुवाच ॥ गुणानाम संमिश्राणां पुमान्येन यथा भवेत् । तन्मे पुरुषवर्येदमुपधारय शंसतः १ शमो दमस्तितिक्षेक्षा तपः सत्यं दया स्मृतिः । तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः स्वनिर्वृतिः २ श्रीरामजयरामजयजयराम

पंचविंशे स्वनैर्गुण्य प्रतिपत्त्यै निरूप्यते । चित्तप्रभवसत्त्वादि गुणवृत्तिस्त्रिरेकधा । प्रकृति पुरुषविवेकज्ञानवतो विपाकस्तु येतविशेषेण गुण त्रयवृत्ति योजनस्यात् । न तावदेकं द्वौ परम अतस्तज्जयोपायकथनाय गुणवृत्तीर्निरूपणार्थमाह गुणानामिति । स हमिश्राणां त्रयवर्तमानाः संमिश्रान संमिश्रा असंमिश्रास्तेषां विभक्तानां गुणानां मध्ये येन यथा या दृशो भवेत् । तदिदं कथयतो मत्तो निबोध्येत्यर्थः १ तत्र सत्त्वत्तिराह शमइति । ईक्षा विवेकः । तपः स्वधर्मवर्तिसंस्कृति । स्मृतिः पूर्वापरानुसंधानं । तुष्टिर्यथा लाभसंतोषः । त्यागो व्ययशीलत्वं । अस्पृहा वैराग्यं । श्रद्धा आस्तिक्यं । ह्रीः अनुचितकर्मणि लज्जा । दया दानं दयादानगतिरक्षणेष्विति । अरतिः आदिशब्देनार्जवविनयादि । स्वनिर्वृतिः आ

णा

+ अस्य कथनस्य तत्तोपयोगमाह एवमिति । मनसः कथं भेदनिमित्तो भ्रमः स्यात् । आत्मा का कथं हृदि तिष्ठेदिति । २८ । उपसंहरति । एष इति । २९ । अस्यासमिवये नैव दृष्टिस्तिरस्मान्मनः सारव्यमरव्यानस्तस्मै हरये गुरवे नमः । एकादशे चतुर्विंशतमोऽध्यायः ॥

गुणन

चा
तुर्विं: स्कंधे ख

राम
१

रजसो वृत्तीराह। कामो अभिलाषः १ ईहा व्यापारः। मदो दर्पः। तृष्णा लाभेऽसत्यपि असंतोषः। स्तंभो गर्वः आत्रीः धनादिना परिला
षणादेवतादिप्रार्थनं ॥ भिदा अहमन्य इति भेदबुद्धिः। सुखं विषयभोगः। मदोत्साहः। मदेन युधा धाभि निवेशः। यशः प्री
तिः स्तुतिप्रियता। हास्यमुपहासः ॥ वीर्यं प्रभावादि। शूरः बलेनोद्यमः न्यायेनोद्यमः सात्विक एव। तमसो वृत्तीराह। क्रो ३
धवृत्ति। क्रोधः असहिष्णुता। लोभो व्ययपराङ्मुखता। अनृतमयथार्थभाषणं। हिंसा द्रोहः। याच्ञा प्रार्थना। दंभो धर्मध्व
तु जिह्वं क्लमः श्रमः। कलिः कलहः। शोकमोहौ। अत्रैव नं धर्मश्च विषादार्ति दुःखं दैन्यं च। निद्राऽतंद्राशा आशा यदमेतद्विष्यतीत्यन्वी

कामईहा मदस्तृष्णा स्तंभ आशीर्भिदा सुखं। मदोत्साहो यशः प्रीतिर्हास्यं वीर्यं बलोद्यमः ३ क्रोधो लोभोऽनृतं
स्वो तहिंसा याच्ञा दंभः क्लमः कलिः। शोकमोहौ विषादार्ती निद्राशाभीरनुद्यमः ४ सत्त्वस्य रजसश्चैतास्तम
सश्चानुपूर्वशः। वृत्तयो वर्णितप्रायाः सन्निपातमथो शृणु ५ सन्निपातस्त्वहमिति ममेत्युद्धव या मतिः। व्य
वहारः सन्निपातो मनोमात्रेन्द्रियासुभिः ६ धर्मे चार्थे च कामे च यदासौ परिनिष्ठितः। गुणानां सन्निकर्षोऽयं श्र
द्धारतिधनावहः ७ श्रीराम
४ शमाद्याः सत्त्वस्य अनुद्यमो अंतःऽनुपूर्वशः क्रमेण एता श्लोकद्वयोक्ताः वर्णितप्रायाः अन्या अप्यूह्या इति भावः। ५ त्रिगुणा भम्मा
मे नां गुणानां वृत्तयो वर्णिताः मिश्राणामाह। सन्निपात इति त्रिभिः। अहं ममेति च मनता बुद्धेः सर्वत्र त्रिसामानाधिकरण्यदर्शनात् स
न्निपातजत्वं अहंतादिः कामक्रोधी इत्यादि। तथा मम प्रातिरस्ति कामक्रोधवृत्त्यादि दृष्ट्यां। तन्त्वस्त्वर्थः सर्वो व्यवहारश्च सन्निपात
कार्यमित्याह। व्यवहार इति। अत्र हेतुः। मनश्च मात्रा विषयाः इंद्रियाणि प्राणश्च तैः। मन आदीनां सात्विकत्वा मसरा जसत्वाच्चैव
हारः। सन्निपातज इति भावः ६ असौ पुरुषोपदा धर्मादिषु यदि निष्ठितस्तत्र निरताश्रयः। त्रिषु निष्ठारूपः सन्निकर्षः सन्निपात कार्यं
धर्मादीनां सत्त्वतमोरजःकार्यत्वात् विषय तत्सन्निपातजत्वमुक्तं फलतश्च तथात्वमाह। श्रद्धारति धनानि सत्त्वरजस्तमोमयान्याव
हतीति तथा ७ श्रीराम जयराम जयजयराम श्री गोपाललक्ष्मीनारायणायनमः। वासुदेवायनमः। श्रीराम शिवराम सदाशिवराम

धर्मनिष्ठायामेव संनिपातं दर्शयति। प्रवृत्तिलक्षणे इत्यादि। धर्मे यदा पुंसो निष्ठा भवति। तथा पुमान् यदा गृहाश्रमे वा
सक्तिस्तिष्ठेत्। अनुपश्यात् स्वधर्मे च नित्यनैमित्तिके तिष्ठेत्। सापि समितिः संनिपातः। हि यस्मात् काम्यधर्मगृहासक्तिः स्व
धर्मा श्रद्धाः सत्त्वमः स्वतमयादृश्यर्थः ८ तदेवं मिश्रगुणवृत्तीः प्रदर्श्य दानां पुमान् येन यथा च वेदितेति यदुक्तं तद्दर्शयति। पुरु
षमिति त्रिभिः। हिंसा त्वानुमरणादिकं प्रमात्स्य यो भजेत तं तामसं विद्यात्। एवं गुणैरेवं भूतो भवतीति तात्पर्यार्थः। ९ ननु
तथापि गुणवर्त्तीन कर्त्ता विशेषात्केन विशेषेण तं से क्षो जीवम्भ सेवत इति नियमः। यतो मां भजेतेति वारं वारमुच्यते। तत्रा

प्रवृत्तिलक्षणे निष्ठा पुमान् यर्हि गृहाश्रमे। स्वधर्मे चानुतिष्ठेत गुणानां समितिर्हि सा ८ पुरुषं सत्त्वसंयुक्त
मनुमीयात् शमादिभिः। कामादिभी रजोयुक्तं क्रोधाद्यैस्तमसा युतं ९ यदा भजति मां भक्त्या निरपेक्षः स्वकर्म
भिः। तं सत्त्वप्रकृतिं विद्यात् पुरुषं स्त्रियमेव वा १० यदा आशिष आशास्य मां भजेत स्वकर्मभिः तं रजःप्रकृतिं विद्या
हिंसामाशास्य तामसं ११ सत्त्वं रजस्तम इति गुणा जीवस्य नैव मे। चित्तजा यैस्तु भूतानां सज्जमानो निबध्य
ते १२ यदेतरौ जयेत्सत्त्वं भास्वरं विशदं शिवं। तदा सुखेन युज्येत धर्मज्ञानादिभिः पुमान् १३ श्रीरामात्राव

हासत्वाहिति। जीवस्येव न मे कृतः। यतश्चित्तजाः। जीवोपाधौ चित्ते सिद्ध जनितो अतो ये स एव बध्यते। चित्ताः ... तानादे हरूपाश्चा
स्य पाम ध्ये सज्जमानः। अहं तु नासज्जमानो गुणनियन्तृत्वेन स्वप्रकाशत्वेन नित्यमुक्तः। अतो महान् विशेष इति भावः। यद्वा
तानामपं ... तानां ... तत्र विशेष अज्ञमं ... सौम्य मनवृत्तिभूतः। न क्षणाया अतोत्तरा ... ह तस्य जीवस्यैव तिजन्यत्र सम
नं १२ तदेवं मिश्रामिश्रगुणकार्याणि प्रदर्श्य दानीमेकैकगुणोद्रेककार्याणि दर्शयति। यदेति सप्तदशभिः। यदेतरौ गुणौ जये
त् अभिभवेत्। भास्वरं प्रकाशात्मं विशदं स्वच्छं शिवं शान्तं शिवत्वे भास्वरत्वानां यथाक्रमं सुखधर्मज्ञानहेतुत्वं तदा तेर्युज्ये
त। आदिशब्दाच्छमदमादिभिश्च १३ श्रीराम जयराम जय जय राम सदाशिवाय नमः वासुदेवाय नमः गोपालकृष्णाय नमः।

विशदत्व २

८१

तमः सत्वं च कर्मभक्तारजः कर्तृसंगं संगहेतुः। सिद्धाभेदहेतुः। बलं प्रकृतिस्वभावं। अतः संगहेतुत्वात्। यत्रासौ श्रियस्त्वयु
ज्येन तत्र कामः। पुमांस्तवतीत्यर्थः। सिद्धहेतुत्वात्। दुःखेन युज्येत। द्वितीयार्द्धेन तं संवर्तीति श्रुतः। बलत्वात् कर्मणा न युज्येत १४
यदा सत्वं सत्वं कर्मभक्तं तमः कर्तृ जयेत् तत्र विवेकज्ञं त्रात्। लयं आवरणात्मकं जडं अनुधर्मत्वं। अतो मोहतां छोक मोहति
साक्षिः लयत्वात् निद्रयानजडता घटकुंभतया भावेनकेवलमाभायायुज्यते निद्रष्टव्यां। जनप्रकृतिपाठेलयात्मकत्वमेव निद्रायाहेतुः १५
किंवाय दावित्तं प्रसादितस्व छंस्वेव। निर्वृतिः परतिः। तत्तदा मम्दं। मदुपलक्षिरस्थानं सत्वमुद्दिश्य विधि १६ यदा पुनः क्रियया वि

ऽपे यदा जयेत्तमः सत्वं रजः संगं सिद्धं बलं। नदा दुःखेन युज्येत कर्मणा यत्रासौ श्रिया १४ यदा जयेद्रजः सत्वं तमोऽन्
दं लयं जडत्वं। युज्येत तदा मोहतस्यां निद्रया हिंसया रायः १५ यदा चित्तं प्रसीदेत तत्र इंद्रियाणां च निर्वृतिः देहेऽसंयम
नोऽसंगं तत्सत्वे विद्धि मत्परं १६ विकुर्वन् क्रियया वा धीरनिवृत्तिश्च चेतसा। गात्रास्वास्थ्यं मनोभ्रान्तिः रजः एतैर्निशाम
हलो या १७ सीदश्चित्तं विलीयेत चेतसो ग्रहणेऽक्षमं मनो नष्टं तमो [illegible] निस्तमस्तदुपधारय १८ एधमाने गुणे स
त्वे देवानां बलमेधते। असुराणां वर जो सिनमस्युश्च वरक्षसां १९ सत्वं जागरणं विद्याद्रजः स्वप्नमादिशेत्।
प्रस्वापनं तमसा जन्तोस्तुरीयं त्रिषु सततं २० श्रीराम

कुर्वं न्न विकारं प्राप्नुवन्न आचार्यं सर्वत्र आसमंत। हिंसिसा धीर्यस्य सः चेतसा बुद्धीन्द्रियाणां। अनिवृत्तिः गात्राणि कर्मेन्द्रियाणि। [illegible]
विषाम स्वास्थ्यं विकाराधिक्यं मनो भ्रांतं च बलं रजः उक्तं दनि शामय जानीहि १७ यदा सीदन्निरिक्षवत्र चेतसो ग्रहणे विदा
कारपरिणामे अक्षमं संविनं विलीयेत मनोऽपि संकल्पात्मकं नष्टं लीनं। तमो शब्द [illegible] निश्चयादश्मवति। तत्तदा तम उत्कृष्टं
उपधारय विद्धि। १८ किंच। एधमान इति। इंद्रियाण्येव निवृत्ति प्रवृत्ति मोह स्वभावानि देवासुर रक्षांसि तानि सेषं यदा असंगाय [illegible]
दाधिदेविकानां गुणानां मुत्कर्षकार्याण्युक्तानि तिष्ठेयं १९ गुणोत्कर्षे वस्त्वेतद्दर्शयति। सत्वमिति। प्रसंगान्निर्गुणावस्थाम।
तो

गुणोत्कर्षद्वारेण तत्तत्कर्मफलनिष्ठां दर्शयति उपर्युपरीति। ब्राह्मणा वेदार्थानुष्ठानाभियुक्ताः आब्रह्मणः इति
पाठे ब्रह्मलोकमपि प्राप्नुवन्तीत्यर्थः आमुख्यात् वृक्षादिस्थावरान्तमित्याप्य अंतरचारिणः मनुष्या एव भवंति २१ देहादुत्क्रां
तिकालक्षणगुणोत्कर्षफलमाह सत्त्वे इति सत्त्वे सति प्रलीनाः मृताः। रजोलयाः रजसि प्रवृद्धे सति लयो येषां ते। एवं त
मोलया इत्यपि। निर्गुणा इत्यत्र तुल्यपदानुपादानात् जीवन्तोऽपि निर्गुणत्वे मामेव यान्तीत्यर्थः २२ इदानीं गुणोत्क
र्षतत्तमेव तत्तत्[stain]फलसाधनकर्मणो विध्यमाह मदर्पणं मय्यर्पितं तु देवोन कृतं निःफलं केवलं दासभावेनैव कृतं यानि

उपर्युपरि गच्छन्ति सत्त्वेन ब्राह्मणा जनाः। तमसाधोध आमुख्याद्रजसान्तरचारिणः २१ सत्त्वे प्रलीनाः स्व
र्यान्ति नरलोकं रजोलयाः। तमोलयास्तु निरयं यान्ति मामेव निर्गुणाः २२ मदर्पणं निष्फलं वा सात्त्विकं निजकर्म त
त्। राजसं फलसंकल्पं हिंसाप्रायादि तामसं २३ कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकं तु यत्। प्राकृतं तामसं
ज्ञानं मन्निष्ठं निर्गुणं स्मृतं २४ वनं तु सात्त्विको वासो ग्रामो राजस उच्यते। तामसं द्यूतसदनं मन्निकेतं तु नि
र्गुणं। २५ सात्त्विकः कारकोऽसंगी रागांधो राजसः स्मृतः। तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः २६ श्री

जं कर्म नित्यादि तत्सात्त्विकं[stain]। फलसंकल्प्यमनेपरिमितं कृतं हिंसाप्रायं हिंसा दंभेन कृतं हिंसाबहुलं वा। आदिशब्दाद्दंभमात्स
र्यादिकृतं। २३ इदानीं सगुणनिर्गुणभेदेन ज्ञानादीनां चातुर्विध्यमाह कैवल्यं देहादिव्यतिरिक्तात्मविषयं वैकल्पिकं दे
हादिविषयं यत्तद्रजः। राजसं प्राकृतं बालमूकादिज्ञानतुल्यं। मन्निष्ठं परमेश्वरविषयं। २४ वनं विविक्तस्थलं सात्त्विको वासः ग्रा
मगवाब्धिके तन्नं तु साक्षात्तदाविर्भाववत्त्वान्निर्गुणं स्थानं। २५ कारकः कर्ता। असंगी अनासक्तः। रागांधः। अत्याभिनिवेशवान्।
स्मृतिविभ्रष्टः अनुसंधानशून्यः मदपाश्रयः मदेकशरणः सोऽपि निरहंकारत्वान्निर्गुणः २६ श्रीगणेशायनमः रामचंद्रायनम

अधर्मे धर्म इतिया श्रद्धा २७ पथ्यं। हितं। पूतं शुद्धं। अनायस्तं अनायासतः प्राप्तं। आहार्यं भक्ष्यभोज्यादि। इंद्रियाणां
ल प्रेष्ठं कटुम्लं लवणादि। आर्तिदा अशुचि दैन्यकृमं अशुचिं च शब्दात् अग्निवेदितं निर्गुणामित्याभिप्रेतं। २८ आत्मोत्थं सु
खं मदपाश्रयमित्यपि स्वतंत्र तदा अविषयत्वेन ज्ञानवदेव द्रष्टव्यं २९ उक्तं संसारहेतुभूतं त्रैगुण्यमुपसंहरन्निहाभ्यां
द्रव्यं पथ्यपूतादि। देशो वनग्रामादिः। फलं सात्त्विकं सुखमित्यादि। कालः यदा प्रजेतमस्यमभंतत्यु। यदेतरो जये दित्यादिना
योप्याद्युक्तः। ज्ञानं कैवल्यं सात्त्विकं ज्ञानमित्यादि। कर्म मदर्पणमित्यादि। कारकः। सात्त्विकः कारकोसंगी त्यादि। श्रद्धा सात्त्वि
क्या। ध्यात्मिकी त्यादि। अवस्था सहा। जागरणमित्यादि। आकृतिः उपर्युपरि गच्छंतीत्यादिनोक्तादेवत्वादि रूपा। निष्ठा सहे

सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी। तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा २७ पथ्यं पूतमनायस्त
माहार्यं सात्त्विकं स्मृतं। राजसं चेंद्रियप्रेष्ठं तामसं चार्तिदाशुचि २८ सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसं।
तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयं २९ द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः। श्रद्धावस्थाकृति
र्निष्ठा त्रैगुण्यः सर्व एव हि ३० सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः। दृष्टं श्रुतमनुध्यातं बुद्ध्या वा
पुरुषर्षभ ३१ एताः संसृतयः पुंसो गुणकर्मनिबंधनाः। येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः ३२
भक्तियोगेन मन्निष्ठो मद्भावाय ३० प्रपद्यते ३२

प्रतीनाः स्पर्धंतीत्यादिनोक्तस्वर्गादिः। एवं सर्वोप्ययं भावस्त्रैगुण्यस्त्रिगुणात्मकः। नैकैकलक्षण एव। किं तु यावंतः पुरु
षाव्यक्तयोरधिष्ठिताः। अधिष्ठिताः। ते सर्वे भावा गुणमया एव। तं प्रपंचं दृष्टमिति ३१ इदानीमुक्तं त्रैगुण्यस्य संसा
रहेतुत्वमनुवदं स्तन्निर्जयान्मोक्ष इत्याह। एता इति सार्धेन। येन जीवेन निर्जिताः सपथ्यादि विक्षिसेन भक्तियोगेन मन्निष्ठः
सन्मद्भावाय मोक्षाय प्रपद्यते योग्यो भवति ३२ श्रीराम जयराम जय जयराम सदाशिवायनमः श्रीगणेशायनमः।

तस्माद्विविक्तिनामिदमेव युक्तमित्याह। तस्मादिति। ज्ञानविज्ञानयोः संभवो यस्मिंस्तमिमं नरदेहं। ३३ भजनप्रकारमाह। निःसंग इति साधनांतराणि सेवया साहित्यादन्यैवसेवेन पुमान्सत्त्वं विरुद्धयेदिति प्राग्गुक्तयोर्नैरपेक्ष्येणांतरात्मकेन सत्त्वेनैव ३४ एवंबद्धस्तिमां प्राप्नोतीत्याह। संपद्यत इति। जीवजीवं तत्कारणं लिंगशरीरं मोघ्रास्यनपुनः संसार इत्याह। जीवइति। नवहिर्विषयभोगेननांतरः तत्स्मरणेन ३५ गुणाद्य तन्मुरुसं मरयाप्रथामजैः पुण्यकथाकथनादिभिः। धनुत भक्तिरसेन विवेकिनो तस्माद्देहमिमंलब्ध्वा ज्ञानविज्ञानसंभवं। गुणसंगं विनिर्धूय मां भजंतु विचक्षणाः ३३ निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः। रजस्तमश्चाभिजयेत्सत्त्वसंसेवया मुनिः। सत्त्वं चाभिजये युक्तो नैरपेक्ष्येण शांतधीः ३४ संपद्यते गुणैर्मुक्तो जीवो जीवं विहाय मां। जीवो जीवविनिर्मुक्तो गुणैश्चाशयसंभवैः। मयैव ब्रह्मणा पूर्णो न बहिर्नांतरश्चरेत् ३५ इति श्रीभागवते महापुराणे एकादशस्कंधे पंचविंशोऽध्यायः॥ ॥छ॥ श्रीभगवानुवाच॥ मल्लक्षणमिमं कायं लब्ध्वा मद्धर्म आस्थितः। आनंदं परमात्मानमात्मस्थं समुपैति मां १ श्रीराम

नाहं पुनः सुलभं जनुरीदृशोऽपीत्येयोगानिष्टापायविघातो दुष्टसंगतः। साधुसंगेनतन्निष्ठापराकाष्ठेति वर्ण्यते। १ योगिनो योगाविष्टेशः संगतः संभवेदिति। सर्वथा तन्निर्ऋत्यर्थमैलगीतं वितन्यते। २ निःसंगो मां भजेत्। विद्वानप्रमत्तो जितेंद्रियइत्युक्तं। तत्र विपक्षेनर्थं कथयिष्यन् जीवन्मुक्तस्यापि लहिं संगाद्दुर्वारइत्यनर्थस्यादित्याशंक्यो कानुवाद पूर्वकं परिहरति साधी‍ ध्यायामलक्षणं मत्स्वरूपं लक्ष्यते येन तमिमं नरदेहं ल

४ इति एकादशे पंचविंशः ४

राम
८५

नवैवंभूतस्यविषयसंगेनामास्तीत्याह।गुणमय्येति।गुणमयीजीवयोनिः।जीवोपाधिस्तया।विमुक्तः।गुणेषुव
र्तमानोपितैर्नयुज्यतेसंगंनप्राप्नोति।अत्रहेतुः अवस्तुभिः नन्ववस्तुभिरप्यन्येयुज्यमानाःदृश्यंते।तत्राह।अव
स्तुत्वेनदृश्यमानेषुतथापिसंगंवर्जयेदित्याह।संगमिति।असतांलक्षणमाह।शिश्नोदरेतर्पयंतीतिशिश्नोदरतृप
स्तेषांकनिकदाचिदपि।आस्तांतावद्बहुस्नेहोसंगः।किंतुतस्यैकस्याप्यनुगः अनुवर्तीअंधमनुगच्छतियोंधस्त
द्वत्।२ अत्रेतिहासमाह।ऐलः पुरुरवाः सम्राट्चक्रवर्ती।र्यस्यसः उर्वशीविरहान्प्रथमंमुह्यन्पश्चात्कुरुक्षेत्रेतां बृहती कीर्ति

गुणमय्याजीवयोन्याविमुक्तोज्ञाननिष्ठया।गुणेषुमायामात्रेषुदृश्यमानेष्ववस्तुतः २ वर्तमानो
२ पिनपुमान्युज्यतेवस्तुभिर्गुणैः।संगंनकुर्यादसतांशिश्नोदरतृपांक्वचित्।तस्यानुगस्तमस्यंधेपत
त्यंधानुगांधवत्।३ ऐलःसम्राडिमांगाथामगायतबृहच्छ्रवाः।उर्वशीविरहान्मुह्यन्निर्विण्णःशोकसंय
मे ४ त्यक्त्वात्मानंव्रजंतींतांनग्नउन्मत्तवन्नृपः।विलपन्नन्वगाज्जायेघोरेतिष्ठेतिविक्लवः ५ कामान
जु तृप्तोनुजुषन्क्षुल्लकान्वर्षयामिनीः।नवेदयांतीर्नायांतीरुर्वश्याकृष्टचेतनः ६ श्रीरामजयराम

समागम्यगंधर्वदत्तेनाग्निनादेवान्निष्ट्वापुनरुर्वशीलोकंप्राप्यशोकसंयमेशोकापगमेसतितेननिर्विण्णःसन्निमां
गाथामगायत।तेनवमस्कंधानुसारेणद्रष्टव्यं ४ प्राकृतंमोहमस्याह।त्यक्त्वेति घोरेतिष्ठेति।हयेजायेमनसाति
ष्ठघोरेवचांसिमिश्राकृणवावहैनु।नतौमंत्राअनुदितासएतेमयस्करन्परतरेचनाहन्नित्येवंमंत्रैर्विलपन्।५
वैक्लव्येकारणमाह।कामानिति।वर्षाणांयामिनीः रात्रीः।यांतीः अपयांतीः आयंतीः आगामिनीः आकृष्टंचेतनं
यस्यसः ६ श्रीरामजयराम जयजयराम सदाशिवायनमः गोपालकृष्णायनमः श्रीगणेशायनमः गुरुभ्योनमः

तस्य गंधर्वलोकं प्राप्य स्वबहुकालं उर्वशीसंभोगेनानंतरं निर्विण्णस्य गाथ्मा हा कष्टमित्यादिभिः तत्र अष्टभिरनुतापः प्रपंच्यते। अहो
इति। यतो मया इमे अहोरात्ररूपा आयुःखंडा नस्मृताः ७ तदेवाह। नाहमिति। अभिनिर्मुक्तः मयि रममाणे अस्तंगतः अ
भ्युदितोवा सूर्य इति अमुया उर्वश्या वंचितः बत स्वदेहतोऽपि। वर्षपूगाणामपि गतान्यहानि न वेदेति ८ येन संमो
हेन। आत्मा देहः क्रीडामृगवत्। अधीनः ९ ननु प्रणयकुपिताया अनुनयार्थमधीनता युक्तैव सत्यं न तत्र तदस्त्वित्या
ह। सपरिच्छदं राज्यादिसहितं ईश्वरं चक्रवर्तिनं तृणमित्यवेक्ष्य यांतीमपि जन्वगमं अनुगतोऽस्मि १० किंच मम प्रभावा

ऐल उवाच। अहो मे मोहविस्तारः कामकश्मलचेतसः। देव्या गृहीतकंठस्य नायुःखंडा इमे स्मृताः ७ नाहं वेदा
भिनिर्मुक्तः सूर्यो वाभ्युदितोऽमुया। मुषितो वर्षपूगानां बताहानि गतान्युत ८ अहो मे आत्मसंमोहो येनात्मा
योषितां कृतः। क्रीडामृगश्चक्रवर्ती नरदेवशिखामणिः ९ सपरिच्छदमात्मानं हित्वा तृणमिवेश्वरं। यांतीं स्त्रि
यं चान्वगमं नग्न उन्मत्तवद्रुदन् १० कुतस्तस्यानुभावः स्यात्तेज ईशत्वमेव वा। योऽन्वगच्छं स्त्रियं यांतीं खरव
प त्पादताडितः ११ किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा। किं विविक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतं १२ स्वा
र्थस्याकोविदं धिङ् मां मूर्खं पंडितमानिनं। योऽहमीश्वरतां प्राप्य स्त्रीभिर्गोखरवज्जितः १३ सेवतो वर्ष
पूगान्मे उर्वश्या अधरासवं। न तृप्यत्यात्मभूः कामो वह्निराहुतिभिर्यथा १४ श्रीरामजयरामजयजयराम

ममाभिमानो वृथैवेत्याह। कुत इति। तस्य मे तेजो बलं। खरो यथा पादताडितोऽपि खरीमनुगच्छति तद्वत् ११ एवंभूतस्य सर्व
साधनं व्यर्थमित्याह। किमिति। त्यागेन संन्यासेन। विविक्तेन एकांतसेवया। मौनेन वाग्यमेन १२ अनुतप्तः सन्नात्मा
प नं निंदति द्वाभ्यां स्वार्थस्येति। अकोविदं अज्ञातारं गोखरवद्। गोस्विखर [illegible] द्रुवेति १३ अधरासवं सेवमानस्य आ
त्मभूर्मनसिजः पुनः पुनरुद्भवत् १४ श्रीरामजयरामजयजयराम सदा। श्रीवायनमः गोपालकृष्णायनमः गुरुभ्योनमः

१२ तदहं न यद्यस्मान्मोहमेवंभूतः स एवाजितेन्द्रियत्वादपराधीत्यर्थः। १७। ननु तथापि सेवस्व सोऽगं ध्यप्रमादपुरुषौ सीमो कुमूलमित्यत आह तेपिख १२

एवमप्रवृत्तिनिर्वेदो निरूपितः। इदानीं तस्य विवेकमाह दशभिः पुंश्चल्येति। अयं भावः। कर्मभिर्देहवानि हुःदुःखमेव
प्राप्तोऽस्मि। अतः परमेश्वरमेव भजेयमिति १५ परमेश्वरप्रसादं विना दैवैरुपदिष्टादपि वेदवाक्यान्मोहो न नि
वर्तत इत्याह। बोधितस्यापीति देव्या उर्वश्या सूक्तवाक्येन यथार्थवचनेन। पुरूरवो मां प्रपप्तो मा ता वृकासो अशि मृथामा
वास उक्षन्। न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता इत्यनेन १६ एवं पुंश्चल्यापहृतचित्तमित्यादि
ना अस्या अपकारे उक्ते ततः। इदानीं ममैवायमपराध इत्याह किमेतयेति। नः अस्माकं कुर्मिनां एतया किमपकृ
तं न किंचिदपि यथा रज्जुस्वरूपाविदुषो रज्जुर्दृष्टः पुंसः तस्याः सर्पत्वकल्पने [illegible] परिवधे तेऽपि रज्ज्वा किमपकृतं [illegible] यद

न्यो। पुंश्चल्यापहृतं चित्तं को न्वन्यो मोचितुं प्रभुः। आत्मारामेश्वरमृते भगवन्तमधोक्षजम्। १५ बोधितस्यापि देव्या मे
सूक्तवाक्येन दुर्मतेः। मनोगतो महामोहो नापयात्यजितात्मनः। १६ किमेतया नोपकृतं रज्ज्वा वा सर्पचेतसः
रज्जुस्वरूपाविदुषो योऽहं यदजितेन्द्रियः। १७ क्वायं मलीमसः कायो दौर्गन्ध्याद्यात्मकोऽशुचिः।
क्व गुणाः सौमनस्याद्या ह्यध्यासोऽविद्यया कृतः। १८ पित्रोः किं स्वं नु भार्यायाः स्वामिनोऽग्नेः श्वगृध्रयोः। किमात्मनः
किं सुहृदामिति यो नावसीयते। १९ तस्मिन्कलेवरेऽमेध्ये तुच्छनिष्ठे विषज्जते। अहो सुभद्रं सुनसं सुस्मितं च मुखं स्त्रियाः २०

प[illegible] परिकल्पितमेवेत्याह। क्वायमिति। मलीमसः अतिमलिनः सुमनसः कुसुमानामिव गंधः कुमार्यादिः सौ सो।
मनस्यं शोभनमनस्त्वं [illegible] १८ ममत्वमपि तस्मिन्परिकल्पितमेवेत्याह। पित्रोः किं स्वं कायः जनकत्वात्। तुचितत्वं। भा
र्यायाः भोगप्रदत्वात् अत्रानुपयुक्तमप्येतन्माय तुल्यत्वादुक्तं स्वामिनो वा अधीनत्वात् अग्नेर्वा अंते दाह्यत्वात् किंवा
त्वौं किं वा आत्मनः तत्कृतसुखानुभवसाधनत्वात् सुहृदां वा उपकारित्वात् एवं यो न निर्धार्यते १९ तुच्छे निन्दिते [illegible]
लक्षणानि [illegible] अंते यस्य तस्मिन्कायकलेवरे प्रियतमे नग्र[illegible] विषज्जते वाह। अहो इति सुमनसं शोभननासिकं २० श्री

श्वगृध्रयोर्वा भक्ष्यत्वात् २

अतोगुणारोपेणारममाणानामाह त्वङ्मांसेति सम्भावत्वहानं त्वगादिसंहतौ तत्संघाते देहे विण्मूत्रादिसंहतौ रमतां
कृमीणां वा। २१ यद्यप्येवं तत्त्वालिता एवस्त्रियः अथापि नोपसज्जेत असलो कुर्यादिनापि संगं न कुर्यात् अर्थवि
लि त्वं विवेकी। अत्र हेतुः। विषयेति। २२ ननु कथं चिन्नेमानं नयनाद्विरपि मनःक्षोभो दृश्यते तत्राह। सोपि स्वदेहं दृष्ट्वा नादि
विना न भवतीत्याह। अदृष्टादिति। भावो दृष्टपदार्थात् भावो मनःक्षोभः अतः प्राणान् इन्द्रियाणि असंप्रयुञ्जतः

स त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ। विण्मूत्रपूये रमतां कृमीणां कियदन्तरं २१ अथापि नोपसज्जे
त स्त्रीषु स्त्रैणेषु चार्थवित्। विषयेन्द्रियसंयोगान्मनः क्षुभ्यति नान्यथा २२ अदृष्टादश्रुताद्भावान्न भाव
उपजायते। असंप्रयुञ्जतः प्राणान् शाम्यति स्तिमितं मनः २३ तस्मात्संगो न कर्तव्यः स्त्रीषु स्त्रैणेषु चेन्द्रियैः
विदुषां चाप्यविस्रब्धः षड्वर्गः किमु मादृशां २४ श्रीभगवानुवाच॥ एवं प्रगायन्नृपदेव
व देवः स उर्वशीलोकमथो विहाय। आत्मानमात्मन्यवगम्य मां वै उपारमज्ज्ञानविधूतमोहः
२५ ततो दुःसंगमुत्सृज्य सत्सु सज्जेत बुद्धिमान्। संत एवास्य छिंदंति मनोव्यासंगमुक्तिभिः २६
संतोनपेक्षा मच्चित्ताः प्रशांताः समदर्शिनः। निर्ममा निरहंकारा निर्द्वंद्वा निष्परिग्रहाः २७ तेषु
नित्यं महाभाग महाभागेषु मत्कथाः। संभवंति हि ता नृणां जुषतां प्रपुनंत्यघं २८ श्रीराम

नियच्छतः स्तिमितं निश्चलं स्यात् २३ इन्द्रियैः स्त्रीभिः अविस्रब्धः अविश्वसनीयः मादृशां अविवेकिनां २४
फलितमाह त्वक्षायाम्। एवमिति। नृपेषु देवेषु वर्त्तमानः ... तथा २५ उक्तिभिः सहितोपदेशैः स्थिरतां तीर्थदेवा
दिसंगात् अपि संसंगः ... यानिति दर्शयति २६ सतां लक्षणमाह। संत इति। विशेषणानां क्रमस्य यथोक्तं हेतु
हेतुमद्भावः २७ न च तेषूपदेशापेक्षापि तु केवलं तत्संनिधिरेव तारयतीत्याह। तेष्विति सप्तम्याः २८ श्री

श्रवणादिभिरेव मत्पराः श्रद्दधानाश्च संतो भक्तिं विंदंति २९ ३० विभावसुमग्निं सेवमानस्य अप्येति नश्यति।
२ तथा कर्मादिजाड्यं आगामिसंसारभयं तन्मूलमज्ञानं च नश्यतीत्यर्थः ३१ निमज्ज्योन्मज्जतां उन्मज्जनं निमज्जनं च कुर्वतां प
रमायणं परमाश्रयणं परमाश्रयः ३२ किं वा यथा अन्नमेव प्राणिनां जीवनं अहमेव यथा आर्तानां शरणं धर्म एव यथा प्रेत्य प
रलोके वित्तं तथा संत एव अर्वाक् संसारपाताद्बिभ्यतः पुंसः अरणं शरणं ३३ किं वा संतः चक्षूंषि सगुणनिर्गु

ता ये श्टण्वंति गायंति ह्यनुमोदंति चादृताः मत्पराः श्रद्दधानाश्च भक्तिं विंदंति ते मयि २९ भक्तिं लब्धवतः
साधोः किमन्यदवशिष्यते मय्यनंतगुणे ब्रह्मण्यानंदानुभवात्मनि ३० यथोपश्रयमाणस्य भगवं
तं विभावसुं शीतं भयं तमोप्येति साधून्संसेवतस्तथा ३१ निमज्ज्योन्मज्जतां घोरे भवाब्धौ परमायणं।
संतो ब्रह्मविदः शांता नौर्दृढेवाप्सु मज्जतां ३२ अन्नं हि प्राणिनां प्राण आर्तानां शरणं त्वहं। धर्मो वित्तं नृ
णां प्रेत्य संतोर्वाग्बिभ्यतोरणं ३३ संतो दिशंति चक्षूंषि बहिरर्कः समुत्थितः। देवता बांधवाः संतः संत आत्मा
हमेव च ३४ वैतसेनस्ततोप्येवमुर्वश्या लोकनिस्पृहः। मुक्तसंगो महीमेतामात्मारामश्चचार ह ३५
इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे पुरूरवोगीतं नाम षड्विंशतितमोध्यायः॥ ॥

णज्ञानानि अर्कः पुनः सम्यगुत्थितोपि बहिः तदप्येकमेव चक्षुरित्यर्थः ३४ अध्यायार्थमुपसंहरति वैतसेन इति।
सुद्युम्नस्य भावेनेलावने प्रविष्टस्य वा तस्मिन्नेव स्त्रीभावं प्राप्तस्य तस्य स्त्रीभावं प्राप्तस्य पुत्रो वैतसेनः पुरूरवाः एव
मुक्तप्रकारेणोर्वश्या लोके नाकलोकेनापि निस्पृहः ततोपि सत्संगाद्धेतोर्मुक्तसंगः सन्नात्मारामो
भूत्वा यथेष्टं चचारेति ३५ इति श्रीभागवते महापुराणे एकादशस्कंधे षड्विंशतितमोध्यायः। ॥श्रीरामः॥ ॥

श्री

सप्तविंशेक्रियायोगः सद्यः श्चित्तप्रसादकः।सर्वकामाप्तिहेतुःसांगः प्रोक्तः समासतः १ रागाद्याकुलचित्तानांकुतोसंगादिसं
भवः।इतिस्तुत्वार्चनंभद्रमनुस्मृत्यानुपृच्छति २ क्रियायोगमितित्तव दाराधनरूपंयस्मादितिकारण्याधिष्ठानादिप्रश्नः
सर्वकारकाणांनिमित्तस्यापिविशिष्टत्वात्।यथेतिकस्मिन्नाधिष्ठानादौकेनप्रकारेणेतिप्रश्नः।ये भिक्षवः सात्वताभक्ताः
अस्यपुनर्विशेषतः प्रश्नेकारणमाहएतत्तु र्षि।एतत्तवदर्चनंनिःश्रेयसकरंयदिति।अंगिरसःसुतोबृहस्पतिः २ निःसृतंत्वयो

उद्धवउवाच॥क्रियायोगंसमाचक्ष्वभवदाराधनंप्रभो।यस्मात्त्वांयेयथार्चंतिसात्वताःसात्वतर्षभ १ एतद्वदंति
मुनयोमुहुर्निःश्रेयसंनृणां।नारदोभगवान्व्यासआचार्योंगिरसःसुतः २ निःसृतंतेमुखांभोजाद्यदाहभग
वानजः।पुत्रेभ्योभृगुमुख्येभ्योदेव्यैचभगवान्भवः। ३ एतद्वैसर्ववर्णानामाश्रमाणांचसंमतं।श्रेयसामुत्तमंमन्येस्त्री
शूद्राणांचमानद ४ एतत्कमलपत्राक्षकर्मबंधविमोचनं।भक्तायचानुरक्तायब्रूहिविश्वेश्वरेश्वर ५ श्रीभगवा
नुवाच।नह्यंतोनंतपारस्यकर्मकांडस्यचोद्धव।संक्षिप्तंवर्णयिष्यामियथावदनुपूर्वशः ६ वैदिकस्तांत्रिकोमि
श्रइतिमेत्रिविधोमखः।त्रयाणामीप्सितेनैवविधिनामांसमर्चयेत् ७ यदास्वनिगमेनोक्तंद्विजत्वंप्राप्यपूरु
षः।यथायजेतमांभक्त्याश्रद्धयातन्निबोधमे ८ अर्चायांस्थंडिलेग्नौवासूर्येवाप्सुहृदिद्विजः।द्रव्येणभक्तियुक्तोर्चे
त्स्वगुरुंमाममायया ९ श्री

पादितिभित्यर्थः।देव्यैपार्वत्यै ३ सर्ववर्णानांत्रैवर्णिकानां ४ विश्वेश्वरायेतेषामीश्वर ५ कर्मकांडस्यपूजाविधानस्यनास्त्यं
तोग्रंथतः पारंवानुष्ठानतोयस्यतस्यवैदिकएवमंत्रोवैदिकान्येवांगानिचयस्मिन्सपुरुषसूक्तादिःसवैदिकः।एवंतांत्रिको
पिमिश्रोश्रक्षरादिः मखः पूजा ६-७ यदात्रैवर्णिकोयजेततदाविशेषमाहयदागर्भाष्टमेकादशद्वादश[illegible]दिकाले
स्वनिगमेनस्वाधिकारप्रवर्तनेनवेदेनोक्तंद्विजत्वंउपनयनं ८ अर्चायांप्रतिमादौ ९ श्रीरामजयरामजयजयराम शिवा।

स्नाने विशेषमाह। उभयैर्वैदिकैस्तांत्रिकैश्च मंत्रैः १० किं च संध्योपासनादीनि कर्माणि आचोदितानि साकल्येन विहि
तानि यस्य यानि तैः सह मे पूजां कुर्यात्। न तु तानि परित्यजेदित्यर्थः सम्यक् परमेश्वरविषय एव संकल्पो यस्य तथाभू
तः सन् कर्मपावनीं कर्मनिर्हरिणीं ११ अर्चाभेदानाह सार्धेन शैली शिलामयी लौही सुवर्णादिमयी लेप्या मृच्चंदना
दिमयी हृदि पूजायां मनोमयी १२ प्रकर्षेण तिष्ठत्यस्यामिति प्रतिष्ठा प्रतिमैव जीवस्य भगवतो मंदिरं यद्वा प्रतिष्ठायाः का
ले न्यासेन भगवत्सन्निधिर्भवतीति प्रतिमाभेदेन विशेषमाह सार्धेन उद्वासो विसर्जनं १२ अस्थिरायामर्चने विकल्पः

पूर्वं स्नानं प्रकुर्वीत धौतदंतोंगशुद्धये॥ उभयैरपि च स्नानं मंत्रैर्मृद्ग्रहणादिना १० संध्योपास्त्यादिकर्मा
णि वेदेनाचोदितानि मे॥ पूजां तैः कल्पयेत्सम्यक् संकल्पः कर्मपावनीं ११ शैली दारुमयी लौही लेप्या
लेख्या च सैकती॥ मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता १२ चलाचलेति द्विविधा प्रतिष्ठा जीवमंदिरं॥
उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने १३ अस्थिरायां विकल्पः स्यात्स्थंडिले तु भवेद्द्वयं॥ स्नपनं त्ववि
लेप्यायामन्यत्र परिमार्जनं १४ द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायिनः॥ भक्तस्य च यथालब्धैर्हृदि
भावेन चैव हि १५ स्नानालंकरणं प्रेष्ठमर्चायामेव तूद्धव। स्थंडिले तत्त्वविन्यासो वह्नावाज्यप्लुतं हविः १६
सूर्ये चाभ्यर्हणं प्रेष्ठं सलिले सलिलादिभिः॥ श्रद्धयोपहृतं प्रेष्ठं भक्तेन मम वार्यपि १७

शालग्रामे न कुर्यात् सैकतायां कुर्यात् अन्यत्र कुर्याद्वा न वेति अविलेप्यायां मृन्मयलेख्यव्यतिरिक्तायां अन्यत्र विलेप्यायां
लेख्यायां च परिमार्जनमेव। १४ इदानीं सकामनिष्कामभेदेन विशेषमाह द्रव्यैरिति प्रकर्षेण प्रसिद्धैः सुशोभनैः अमायि
नो निष्कामस्य भक्तस्य तु यथालब्धैः पत्रपुष्पादिसर्वथा न लभ्यते तत्र हृदि भावेन भावनया यद्वा हृदि चेन्मद्यागः तत्र भा
वेन मनोमयैर्द्रव्यैरित्यर्थः १५ अधिष्ठानभेदेन प्रधानोपचारमाह सार्धेन स्नानेति तत्त्वविन्यासः पीठस्थानमंगप्रधानदे
वतानां तत्तन्मंत्रैः स्थापनं १६ अभ्यर्हणं उपस्थानार्घ्यादि सलिला
दिभिस्तर्पणादिना पूजनं। सर्वत्र साधारणमाह श्रद्धयेति १७

नक्षासीनः

एवमधिकारारित्य वस्त्वामुक्त्वेदानीं पूजाप्रकारमाह १८ शुचिरिति। संभृताः संभाराः पूजासाधनानि येन सः। प्रागग्रैर्दर्भैः
पूर्वं प्रागेव संभृतसंभारः। सन् आसीनः सन्यस्थाने तत्तत्संभारार्थं वारंवारमुत्तिष्ठेदित्यर्थः। प्राङ्मुखः उदङ्मुखो वा आसीनः। अ
र्चायां तु स्थिरायां संमुखः अर्चाभिमुखः उपविष्टः सन् १९ अनन्तरं गुर्वादिनमस्कारपूर्वकं यथोपदेशं स्वस्मिन् कृतन्यासः
ध कृतो मूलमन्त्रन्यासो यस्यां तां मम अर्चां आमृज्य निर्माल्यापकर्षणादिना शोधयेत्। कलशं पूर्णकुम्भं प्रोक्षणीयं प्रोक्षणार्थो
दकपात्रं उपसाधयेत् चन्दनपुष्पादिभिः संस्कुर्यात्। तदद्भिः प्रोक्षण्यद्भिः देवयजनं देवपूजास्थानं २० पाद्यार्घ्यं त्रीणि

भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते॥ गन्धो धूपः सुमनसो दीपोऽन्नाद्यं च किं पुनः १८ शुचिः संभृतसंभारः
प्राग्दर्भैः कल्पितासनः॥ आसीनः प्रागुदग्वार्चेदर्चायामथ संमुखः १९ कृतन्यासः कृतन्यासां मदर्चां पाणि
नामृजेत्॥ कलशं प्रोक्षणीयं च यथावदुपसाधयेत् २० तदद्भिर्देवयजनं द्रव्याण्यात्मानमेव च २० प्रोक्ष्य
पात्राणि त्रीण्यद्भिस्तैस्तैर्द्रव्यैश्च साधयेत्॥ पाद्यार्घ्याचमनीयार्थं त्रीणि पात्राणि दैशिकः २१ हृदा शीर्ष्णा
थ शिखया गायत्र्या चाभिमन्त्रयेत्॥ पिण्डे वाय्वग्निसंशुद्धे हृत्पद्मस्थां परां मम २२ अण्वीं जीवकलां ध्यायेत्
२२ नादान्ते सिद्धभाविताम्॥ तयात्मभूतया पिण्डे व्याप्ते संपूज्य तन्मयः॥ आवाह्यार्चादिषु स्थाप्य न्यस्ताङ्गं मां प्रपूजयेत्

पात्राणि कलशोदकैः पूरितानि तैस्तैर्द्रव्यैः साधयेत्। तत्र पाद्यादिद्रव्याणि। पाद्ये श्यामाकदूर्वाब्जविष्णुक्रान्तादि (त) २३/ दिव्य
ते गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः। कुशेति क्रमादर्घ्यद्रव्याष्टकमुदीरितं जातीलवंगकक्कोलैर्मतमाचमनीयकमिति २१
तानि त्रीणि पात्राणि यथाक्रमं हृदयादिमन्त्रैर्गायत्र्या च सर्वाण्यभिमन्त्रयेत्। तदनन्तरं पिण्डे देहे वाय्वग्निसंशुद्धे इति कोष्ठगतेन वायु
ना शोषिते आधारगतेनाग्निना दग्धेषु नरललाटस्थचन्द्रमण्डलामृतप्लावेनामृतमये जाते तस्मिन् हृत्पद्मस्थां परां श्रेष्ठां जीवकलां
श्रीनारायणमूर्तिं ध्यायेत्। कथंभूतां नादान्ते सिद्धभाविताम्। प्रणवस्य अकारोकारमकारबिन्दुनादाः पञ्चांशाः तत्र नादान्ते सिद्धैर्ध्या
तां तथा च श्रुतिः यो वेदादौ स्वरः ० रेति २२ तयात्मभूतया स्वेनैव भावेन चिंतितया अमृतमये पिंडे दीपेन प्रभया गृहमिव व्या
प्रोक्तो वेदान्ते प्रतिष्ठितः॥ तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ९ ने

राम ८९

११ स्वर्णधर्मानुवाकेन महापुरुषविद्यया॥ पौरुषेणापि सूक्तेन सामभी राजनादिभिः ३०

कथं पूजयेत्तत्राह पाद्येति द्वाभ्यां। धर्मादिभिर्मम आसने २४ तत्र पद्मं कल्पयित्वा उभाभ्यां वेदतन्त्राभ्यामुभयसिद्धये मम पाद्यादीनुपचारान् प्रकल्पयेदित्यन्वयः। उपस्पर्शः आचमनं। अर्हणमर्घ्यं उभयसिद्धये वेदतन्त्रोक्तभुक्तिमुक्तिप्राप्तये अयमर्थः। धर्मज्ञानवैराग्यैश्वर्याण्यासनपर्यङ्कस्याग्नेयादिविदिक्षु कोणेषु पादाः अधर्मादीनि पूर्वादिदिक्षु गात्राणि। त्रयो गुणाः पट्टिकाः तत्र पूर्वादिक्रमेण शक्तयः विमलोत्कर्षिणी ज्ञाना क्रिया योगा प्रह्वी सत्येशानानुग्रहेति नवशक्तयः। एवं यथोपदेशं धर्मादिभिर्नवभिश्च शक्तिभिरासनं कल्पयित्वेति। कर्णिकायाः केसरैस्तत्र सूर्यादिमण्डलैश्चोज्ज्वलमित्यर्थः २५ आयुधादिपूजामाह सुदर्शनमिति त्रिभिः तत्र न्यस्ता योगपीठस्य आवरणपूजा सूचिता। आसने नैव ज्ञात्वावरणमध्युक्तं ततः सुदर्शनादिमुसलान्तान्यायुधान्यष्टदिक्षु कौस्तुभमाला श्रीवत्सानुरसि २६ नन्दादीन्पार्षदानष्टदिक्षु गरुडं पुरतः २७ दुर्गादीनग्निकोणेषु गुरूंश्च वामतः सुरानिन्द्रादिलोकपालान् पूर्वादिदिक्षु। एवमेतान्देवस्याभिमुखान् प्रोक्षणादिभिरर्घादिभिः पूजयेदित्यर्थः २८ पाद्यादीनुपचारान् प्रकल्पयेदित्युक्तं तानेव गुणविधिभिः प्रपञ्चयति चन्दनेति षड्भिः २९ मन्त्रानाह स्वर्णधर्मानुवाकः। सुवर्णघर्मं परिवेदरायमित्यादि महापुरुषविद्या जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन। सुब्रह्मण्य नमस्तेऽस्तु महापुरुष पूर्वजेति पौरुषसूक्तं सहस्रशीर्षेत्यादि राजनादीनि सामानि इदं ह्येनरोनेमधिना हवं तदस्य स्याम् भिगी तानि आरत्त्यादेनरोहि

पाद्योपस्पर्शार्हणादीनुपचारान् प्रकल्पयेत्॥ धर्मादिभिश्च नवभिः कल्पयित्वासनं मम २४ पद्ममष्टदलं तत्र कर्णिकाकेसरोज्ज्वलं। उभाभ्यां वेदतन्त्राभ्यां मह्यं तूभयसिद्धये २५ सुदर्शनं पाञ्चजन्यं गदासीषुधनुर्हलान्॥ मुसलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत् २६ नन्दं सुनन्दं गरुडं प्रचण्डं चण्डमेव च॥ महाबलं बलं चैव कुमुदं कुमुदेक्षणं २७ दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून् सुरान्॥ स्वे स्वे स्थाने त्वभिमुखान् पूजयेत्प्रोक्षणादिभिः २८ चन्दनोशीरकर्पूरकुङ्कुमागुरुवासितैः॥ सलिलैः स्नापयेन्मन्त्रैर्नित्यदा विभवे सति २९ वस्त्रोपवीताभरणपत्रस्रग्गन्धलेपनैः॥ अलङ्कुर्वीत सप्रेम मद्भक्तो मां यथोचितं ३१

णादीनि ३० वस्त्राद्युपचारेष्वलङ्कारलक्षणं गुणविधानं वक्त्रेति। पत्राणि कपोलवक्षःस्थलादिषु लिखिताः पत्रभङ्गाः मद्भक्तस्स प्रेम यथा भवति तथा ३१

का

हविषा घृतेन अभिघृता निसंसिक्ता निरारूणि शुक्लसमिधः प्रास्य प्रक्षिप्य आघारौ तत्संज्ञकौ यागौ एवमाज्यभागौ च दत्वा
तदर्थम् आहुती हुत्वेत्यर्थः । तत्राघारौ प्रजापतये स्वाहा इन्द्राय स्वाहेति वोत्तरदक्षिणपरिधिसंधिमभ्याग्निमध्यादापरि
ध्यंतं घृतक्षारणरूपौ आज्यभागौ अग्नये स्वाहा सोमाय स्वाहेत्येवं होमरूपौ ३९ मूलमंत्रेण अष्टाक्षरेण तथा षोडशार्चो य
स्मिन् तेन पुरुषसूक्तेन वा । अवदानतः प्रत्यवदानाहुतिग्रहणेनेत्यर्थः पुरुषसूक्तेनाराधनपक्षे स एव मूलमंत्रः तेनैव प्रत्य
वदानतो होम इति । मंत्रैः स्वाहान्तैर्नाममंत्रैः यथान्याय यथाक्रमेणैव अग्नये स्विष्टकृते स्वाहेत्येवं स्विष्टकृतं च हुत्वा ४०

ध्यायन्नभ्यर्च्य शारूणि हविषाभिघृतानि च ॥ प्रास्याज्यभागावाघारौ दत्वा चाज्यप्लुतं हविः ३९ जुहुयान्मूल
मंत्रेण षोडशार्चावदानतः ॥ धर्मादिभ्यो यथान्यायं मंत्रैः स्विष्टकृतं बुधः ४० अभ्यर्च्याथ नमस्कृत्य पार्षदे
भ्यो बलिं हरेत् ॥ मूलमंत्रं जपेद् ब्रह्म स्मरन्नारायणात्मकं ४१ दत्वाचमनमुच्छेषं विष्वक्सेनाय कल्पयेत् ॥ मु
खवासं सुरभिमत्तांबूलाद्यमथार्हयेत् ४२ उपगायन् गृणन् नृत्यन् कर्माण्यभिनयन्मम ॥ मत्कथाः श्रावयन् शृ
ण्वन् मुहूर्तं क्षणिको भवेत् ४३ स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि ॥ स्तुत्वा प्रसीद भगवन्निति वंदेत दंड
वत् ४४ शिरो मत्पादयोः कृत्वा बाहुभ्यां च परस्परं ॥ प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ४५ श्रीराम ॥
ततो वह्निस्थं भगवंतमभ्यर्च्याथ नमस्कृत्य पार्षदेभ्यो नंदादिभ्यो दुसुरेभ्यो बलिं हरेत् ततः पूजास्थानमागत्य देवस्याग्रे समुप
विश्य यथाशक्ति मूलमंत्रं जपेत् ४१ ततश्च भगवतो निवेदितं समर्पितं ध्यात्वा आचमनं दत्वा उच्छेषं विष्वक्सेनाय कल्पयित्वा
तदनु तस्मै पश्चात् तदीयेभ्यो जातु ततः सुरभिमत् सुगंधवत् तांबूलं मुखवासं दत्वाथ पुनरपि अर्हयेत् पुष्पांजलिना पूजयेत् ४२
उपगायन् गृणन् नृत्यन् कर्माण्यभिनयन् मम विष्णुस्वरूपिणः कर्माणि .... मुहूर्तं च क्षणिको भवेत् ४३ स्तवस्तोत्राणां भेदः दर्शयति पौराणैः
प्राकृतैरिति ४४ कथं प्रणमेदित्यपेक्षायामाह शिर इति बाहुभ्यां दक्षिणोत्तराभ्यां परस्परं मम दक्षिणोत्तरौ पादौ गृहीत्वा

तत्र शेषाग्रहणपूर्वकं वैकल्पिकोद्वासनप्रकारमाह इति अनयैव प्रार्थनया शेषां निर्माल्यं मया दत्तां ध्यात्वा शिरस्याधाय मि
धृत्वा यद्युद्वासयेत तर्हि प्रतिमायां यन्न्यस्तं ज्योतिस्तत्पुनरपि हृत्स्थज्योतिषि वोद्वासनीयं ४६ एतेष्वधिष्ठानेषु किं
मुख्यमित्यपेक्षायामाह अर्चादिष्विति यदा यत्र श्रद्धा तदा तत्र तत्वधिष्ठाने मुख्यामुख्यत्वं कुतः सर्वभूतेष्विति ४७ उभ
यतः इहामुत्र च ४८ समर्थं प्रत्याह मदर्चामिति त्रिभिः पुष्पोद्यानानि कारयेत् तत्पूजायात्रोत्सवाश्रितान् पूजा प्रत्यहं यात्रा विशि ष्ट

इति शेषां मया दत्तां शिरस्याधाय सादरं ॥ उद्वासयेच्चेदुद्वास्यं ज्योतिर्ज्योतिषि तत्पुनः ४६ अर्चादिषु यदा यत्र श्र
द्धा स्यात्तत्र चार्चयेत ॥ सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः ४७ एवं क्रियायोगपथैः पुमान्वैदिकतांत्रि
कैः ॥ अर्चन्नुभयतः सिद्धिं मत्तो विंदत्यभीप्सितां ४८ मदर्चां संप्रतिष्ठाप्य मंदिरं कारयेद्दृढं ॥ पुष्पोद्यानानि
रम्याणि पूजायात्रोत्सवाश्रितान् ४९ पूजादीनां प्रवाहार्थं महापर्वस्वथान्वहं ॥ क्षेत्रापणपुरग्रामान्दत्वा
मत्सार्ष्टितामियात ५० प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयं ॥ पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यता
मियात ५१ मामेव नैरपेक्ष्येण भक्तियोगेन विंदति ॥ भक्तियोगं स लभते नित्यं यः पूजयेत मां ५२ यः स्वदत्तां
परैर्दत्तां हरेत सुरविप्रयोः ॥ वृत्तिं स जायते विड्भुक् वर्षाणामयुतायुतं ५२

हेपर्वसु बहुजनसमागमः उत्सवः वसंतादिमहोत्सवः तदाश्रितान् क्षेत्रादीन् दत्वा ४९ पूजायात्रोत्सवाश्रितानित्यस्य
विवरणं पूजादीनामिति प्रवाहार्थं संतताऽनुवृत्त्यर्थं मत्सार्ष्टितां मत्समानैश्वर्यं ५० प्रतिष्ठादीनां व्यस्तसमस्तानां
ता फलमाह प्रतिष्ठयेति मत्साम्यतां मया साम्यमित्यर्थः ५१ सकामं प्रस्तुत्य अहैतुकं भक्तं प्रत्याह मामेवेति अहैतुके
भक्तियोगः कथं भवति तत्राह भक्तियोगमिति ५२ दातुः फलमुक्त्वापहर्तारं निंदति य इति विड्भुक् विष्ठाभोजी कृमिः ५३

कर्तुर्यत्फलं तरे वान्येषामप्याह कर्तुरिति । सारथेः सहकारिणः हेतोः प्रयोजकस्य अनुमोदितुश्च प्रेत्य तत्फलमित्यन्वयः ॥ ५४
कुलः यतः कर्मणामेते भागिनः भागाहीः तत्रापि विशेषमाह भूयसि कर्मणि सारथ्यादौ वभूयः अधिकं फलमिति
पयः पत्रादिभि मेंगा पूजितोयः परं पदं ॥ आगे वदिं शति प्रीतः स कृष्णः शरणं मम ॥ ॥ इत्येकादशे सप्तविंशः ॥ ॥
अष्टाविंशे तु यः पूर्वं विस्तरेण प्रवर्णितः ॥ ज्ञानयोगः पुनश्चासौ समासेनात्र निरूप्यते । इदानीमति विस्तरेणोक्तं ज्ञानयो
गं संक्षेपेण वक्तुमाह परेति । परेषां स्वभावान् शांतघोरादीन् कर्माणि वा न प्रशंसेत् न गर्हेत् किंतु विश्वमिति १ विपक्षे दोषमाह परे

कर्तुश्च सारथेर्हेतोरनुमोदितुरेव च ॥ कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलं ५४ ॥ ॥ इति श्री ७०
भागवते महापुराणे ए० सप्तविंशतितमोऽध्यायः ॥ ॥ २७ ॥ ॥ ॥ श्रीभगवानुवाच परस्वभावकर्माणि
न प्रशंसेन्न गर्हयेत् ॥ विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च १ परस्वभावकर्माणि यः प्रशंसति निंदति
॥ स आशु भ्रश्यते स्वार्थादसत्यभिनिवेशतः २ तैजसे निद्रयापन्ने पिंडस्थो नष्टचेतनः ॥ मायां प्रा
प्नोति मृत्युं वा तद्वन्नानार्थदृक् पुमान् ३ किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत् ॥ वाचोदितं तदनृतं मनसा

निः स्वार्थात् ज्ञाननिष्ठालक्षणात् असति मिथ्याभूते द्वैते अभिनिवेशात् २ भ्रंशमेव दृष्टांतेनोपदर्शयति तैजसे राजसा प्र
हंकारकार्ये इंद्रियगणे निद्रया आपन्ने अभिभूते सति पिंडस्थो जीवः केवलं मनोमात्रेण मायां स्वप्नरूपां प्राप्नोति । ततो म
नसि लीने सति नष्टचेतनः सन् मृत्युं वा मृत्युतुल्यां सुषुप्तिं वा प्राप्नोति यथा तद्वदेव नानार्थदृक् द्वैताभिनिवेशी वि
क्षेपलयं वा प्राप्नोतीति ३ द्वैतासत्त्वं तयोः स्तुतिनिंदयोर्निर्विषयत्वं प्रपंचयति सार्धेः षड्भिः किं भद्रमिति अवस्तुनो
द्वैतस्य मध्ये किं भद्रं किं वा अभद्रं कियत् इदं कियद्वा अभद्रमित्यर्थः अवस्तुत्वमेवाह । वाचेति वाचा इंद्रियोपलक्षणं वाचा
उदितं तदुक्तं चक्षुरादिभिः श्रुतं दृष्टं यत्तदनृतमिति ४ श्री ॥

नन्वेवं सति देहादिसाक्षिणा वानामप्यसत्वात्कथं भयहेतुत्वं तत्राह दृष्टान्तमाह छायाप्रतिबिंबं प्रत्याह्वयः प्रतिध्वनिः आभासः शुक्ति
रजतादिः एते यथा सन्तोऽप्यर्थकारिणो भवन्ति । आमृत्युतो मृत्युमभिव्याप्य यद्वाऽऽमृत्युर्लयः यावन्नैव लीयते तावत्पश्यति मि
त्यर्थः ५ ननु सृष्ट्यादिश्रुतिभिरद्वैतं निरूपितं कथमसत्यं स्यात्तत्राह आत्मैवेति सार्धद्वाभ्यां त्रायते पाल्यते त्राति
पालयति ६ अन्यस्मात्कस्याद्व्यतिरिक्तात् । त्रिविधा अध्यात्मादिरूपा भातिः प्रतीतिः ७ ननु कथं निर्मूलं प्रतीयते न
त्वहं ज्ञानविज्ञाननैपुण्यो निष्ठां सर्पवत् सामीभूत्वा ८ एतन्निष्ठाप्राप्त्युपायमाह प्रत्यक्षेणेति यदा घंतवत्स्वद्वैतं न रस

छायाप्रत्याह्वयाभासा ह्यसन्तोऽप्यर्थकारिणः । एवं देहादयो भावा यच्छन्त्यामृत्युतो भयं ५ आत्मैव तदिदं वि
श्वं सृज्यते सृजति प्रभुः । त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ६ तस्मान्नह्यात्मनोऽन्यस्मादन्यो भावो
निरूपितः । निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि ७ इदं गुणमयं विद्धि त्रिविधं मायया कृतं । ए
